Barcode : 99999990066639
Title -
Author -
Language - sanskrit
Pages - 126
Publication Year - 1927
Barcode EAN.UCC-13



केन्द्रीय पुस्तकालय
वनस्थली विद्यापीठ
891.28
श्रेणी संख्या M58Y:-S
पुस्तक संख्या 2241
अवाप्ति क्रमांक

K OF INDIA BULLETIN

B/Rog.

The Librarian,
College of Arts & Science,
Banasthali Vidyapith,
P.O. BANASTHALI VIDYAPITH,
Rajasthan.

6356

Registered according to Act XXV of 1867. (All Rights Reserved.)

THE

CHOWKHAMBÁ SANSKRIT SERIES,

A

COLLECTION OF RARE & EXTRAORDINARY SANSKRIT WORKS.

NO. 353.

याज्ञवल्क्यस्मृतिः ।

श्रीमित्रमिश्रकृत 'वीरमित्रोदय' टीकया श्रीविज्ञानेश्वरकृत-
'मिताक्षरा' टीकया च सहिता ।

साहित्याचार्य-खिस्ते नारायणशास्त्रिणा
साहित्योपाध्याय-होशिङ्ग जगन्नाथशास्त्रिणा च
संशोधिता ।

YĀJŇAVALKYA SMRTI

With the Commentary of Mitra Mis'ra's
Vīramitrodaya and Vijnānes'vara's 'Mitāksarā.

EDITED BY

Pt. Nārāyaṇa S'āstrī khiste Sāhityāchārya Assistant Librarian and
Pt. Jagannātha S'āstrī Hos'iṅga Sāhityopādhyāya Sādholāl Scholar
Sarasvatībhavana Benares.

FASCICULAS. V–५.

PUBLISHED & SOLD BY THE SECRETARY,
CHOWKHAMBA SANSKRIT SERIES OFFICE, BENARES.
Printed by Jai Krishna Das Gupta,
at the Vidya Vilas Press, Benares.

1927

Agents:

1 Luzac & co, Booksellers,
LONDON.

2 *Otto Harrassowitz, Leipzig:*
GERMANY.

3 The Oriental Book-supplying Agency,
POONA.

अथ व्यवहाराध्यायः ।

(वी० मि०) निःसाम्यं स्वस्य शंसन्निव विदधदिव द्वैतवार्तामिहार्ता-
मद्वन्द्वं शीलयिष्यन्निव च निजपदं शीलिताद्वन्द्वभावः ॥
अव्यात्त्वां शुद्धसत्त्वाङ्कुर इव विशदो विश्वभृत्क्रोडभर्तु-
र्दंष्ट्रवोच्चैरनाशी, (१) हरमुकुटशशी चैकदन्तस्य दन्तः ॥ १ ॥

अस्ति क्षोणीप्रशस्तिस्तनुरिव गिरिशस्योंडछापूरपूर्वा
दुर्वारारीभकुम्भक्षतजरुचिरतनुरिर्पुविभ्रती भूरिभूतिम् ॥
नीराजद्रजलक्ष्मीः सगुणमपि रुचा निर्धुनाना पिनाकं
हृद्यन्नागाजिनश्रीः सुदृषमधिगता नागराजद्रशोभा ॥ २ ॥

अरिकुलकरिकुम्भकूटपाटीशिखारितटीमिव यां प्रभापटीयान् ॥
अधिवसति महीन्दुवीरसिंहो मधुकरसाहिमहीशसिन्धुजन्मा ॥ ३ ॥

श्रेयःसम्भृतवीरसिंहनृपतेरापः प्रतापोदया-
द्यावोद्दामहुताशनेहितचमूरार्द्रेन्धनस्य श्रियम् ॥
येनान्तः स्फुटति ध्वनिं प्रकटयत्यप्यश्रुधारारसा-
द्विभर्ति तनुते तनोति कुयशोदग्धं जगच्छ्यामलम् ॥ ४ ॥

गाम्भीर्यं बहु वीरसिंहनृपतेरम्भोधिरन्तः स्मरन्
दुर्वारैर्वडवाशिखिच्छलेन निविडप्रौढोपतापं दधौ ॥
स्मारंस्मारमुदारसारमधिकोदञ्चच्चमत्कारतो
जातोऽचेतन एव जातजडिमा श्यामाकृतिः क्ष्माधरः ॥ ५ ॥

बाल्यावाल्यान्तरालस्थगितमिव मनः कामकौमारकेली-
मस्वीकुर्वन् किशोरीचरण इव रिपुश्रृङ्खलीभूय भूयः ॥
क्रीडान्तावस्थकान्ताजन इव विगलत्कुन्तलो व्यस्तवासा
यस्य त्रासाज्जरत्याः स्तन इव निपतन्नुन्नतिं नैव लेभे ॥ ६ ॥

---

(१) दंष्ट्रवोच्चैरनाशाहिरमुकुटशशी चैकदन्तस्य दन्तः इति ख० पुं० पाठः ।

भगोलाद् भूगोलाद्बहिरभियियासन्ति भवितुं
पठानाः पाठीना इव जलविलीनां वियमधुः ॥
मघो मोघारम्भोऽपसरति वुंदेलाकुलपतौ
रणार्थं दुर्वारे रणति रणसारे रणभुवि ॥ ७ ॥
विभ्राणो बुधमित्रतां कविगुरू राजा धरानन्दनः
शोभाभिर्विलसत्तमो दिवि लसत्केतुश्च भास्वत्सुतः ॥
इत्थं जन्यजनुर्नवग्रहतनुः किन्त्वस्ति तुङ्गः सदा
सोद्रेकः किल वीरसिंहधरणीधौरेयचूडामणिः ॥ ८ ॥
शुभ्राभाविभवार्थमात्तवृषभो भोगीन्द्रभागीरथी-
भास्वद्भूतिभनाथभूषितवपुः कैलासवासी भवन् ॥
वीरश्रीयुतवीरसिंहनृपतेः सम्भाव्य शम्भुर्यशः
शान्त्यै साम्यविधेर्बभार गरलं कण्ठे किमुत्कण्ठितः ॥ ९ ॥
हेमोर्वीधरकर्णिकापरमहाशैलौघसंवर्त्तिका
व्यालेन्द्रैकमृणालिका गजघटाव्यालीनभृङ्गालिका ॥
सप्ताम्भोधिमधूलिकाविमलिका क्षोणीयशोमालिका
सम्पर्केऽप्रतिमल्लवीरनृपतेः शुभ्राऽरविन्दायते ॥ १० ॥
व्रीडाभिर्जडिमोदयादुपलतां चिन्तामणिः पाशवं
कामं कामगवी च कल्पविटपी स्वर्गाटवीं गाहते ॥
आकर्ण्योर्ज्जितवीरसिंहनृपतेर्दानोर्ज्जिहानं यशः
सान्तर्द्धानतयाऽद्य निर्दयमघो नेतारमस्तौद्बलिः ॥ ११ ॥
वसु वर्षति वीरसिंहदेवे जलदः केवलमम्बु यद्विजेषु ॥
इयतैष यशोऽवदातविश्वो मलिनः सोऽजनि लज्जया तयैव ॥१२॥
दूराद् दुश्च्यवनो दिवस्पतिरभूद्दिक्कोणभाक् पावकः
क्षीनाशः स्वयमेव दण्डमितवान् रक्षोऽपि रक्षोक्तिभाक् ॥
पाशं च स्वयमाददे पतिरपां वातो गतोऽदृश्यतां
प्रस्थाने धनदोऽस्य गुह्यकपदं दुर्गाप्तिमुग्रोऽचरत् ॥ १३ ॥
आरोहो गीर्लतायाः सदुपक्रान्तिपदं धर्मभूमीरुहाणा-
मुद्यानं शुद्धकीर्तेरुपचयभवनं श्रीमृगीवागुरैव ॥
आकारो विप्रताया निधिरपि महसः सर्वविद्याऽनवद्यो
यद्वारि द्योतते श्रीद्युमणिरिव तमो मूर्च्छयन् मित्रमिश्रः ॥ १४ ॥

क्ष्माचक्रं चारु चक्रे समुचितनयतो रक्षितं भूमिदेवान्
देवांश्च प्राप्तसेवान् विमलमपि यशो वीरसिंहो नरेन्द्रः॥
वित्तं मत्वाऽप्यसारं वितरदविरतं याज्ञवल्क्योक्तिमुक्ता-
हारं स्मृत्यर्थसारं रचयितुमथ सः प्रादिशन्मित्रमिश्रम्॥ १५॥

उत्तंसस्तीरभुक्तेरखिलबुधगुरुः श्रीसदानन्दधीमान्
श्रीभाजो मित्रमिश्राज्जगदुपकृतये बिभ्रदादेशदीपम्॥
ज्ञानानां दैन्यदोषापहमकलिभयं याज्ञवल्क्योक्तिकोशात्
दृष्ट्वा स्मृत्यर्थसारं समुचिनुत यशो धर्मलक्ष्मीविहारम्॥ १६॥

अथ 'व्यवहारान्स्वयं पश्येत्सभ्यैः परिवृतोऽन्वह'मिति पूर्वाध्यायोक्तं प्रपञ्चयति सम्पूर्णाध्यायेन—

व्यवहारान्नृपः पश्येद्विद्वद्भिर्ब्राह्मणैः सह॥
धर्मशास्त्रानुसारेण क्रोधलोभविवर्जितः॥ १॥

अत्र यद्यपि व्यवहारदर्शनं पूर्वाध्याय एवोक्तं तथापि सकलाङ्गोपेतव्यवहारस्याऽत्रैव प्रदर्शनादयं 'व्यवहाराध्याय इति श्लोकैरुच्यते। तत्र चैतानि प्रकरणानि-(१)व्यवहारमातृकाप्रकरणम् [श्लो० १-३६] (२)ऋणदानप्रकरणम् [श्लो०३७-६४] (३)निक्षेपप्रकरणम् [श्लो०६५-६७](४)साक्षिप्रकरणम् [श्लो० ६८-८३] (५)लेख्यप्रकरणम् [श्लो० ८४-९४] (६)दिव्यप्रकरणम् [श्लो० ९५-११३] (७) विभागप्रकरणम् [श्लो० ११४-१४९] (८)सीमाविवादप्रकरणम् [श्लो० १५०-१५८] (९)स्वामिपालविवादप्रकरणम् [श्लो० १५९-१६७] (१०)अस्वामिविक्रयप्रकरणम् [श्लो०१६८-१७४](११) दत्ताप्रदानिकप्रकरणम् [श्लो० १७५-१७६] (१२) क्रीतानुशयप्रकरणम् [श्लो० १७७-१८१] (१३)अभ्युपेत्याशुश्रूषाप्रकरणम् [श्लो० १८२-१८४](१४)संविद्व्यतिक्रमप्रकरणम् [श्लो० १८५-१९२](१५)वेतनानपाकर्मप्रकरणम्[श्लो०१९३-१९८](१६)द्यूतसमाह्वयप्रकरणम्[श्लो० १९९-२०३](१७) वाक्पारुष्यप्रकरणम् [श्लो० २०४-२११] (१८)दण्डपारुष्यप्रकरणम् [श्लो० २१२-२२९](१९)साहसप्रकरणम् [श्लो०२३०-२५३] (२०) विक्रीयासम्प्रदानप्रकरणम् [श्लो० २५४-२५८] (२१)सम्भूयसमुत्थानप्रकरणम् [श्लो० २५९-२६५] (२२)स्तेयप्रकरणम्

[श्लो० २६६-२८२] (२३) स्त्रीसङ्ग्रहप्रकरणम् [श्लो० २८३-२९४] (२४) प्रकीर्णकप्रकरणम् [श्लो० २९५-३०७] इति।

विद्वद्भिर्व्यवहारज्ञैर्ब्राह्मणैः सह नृपः क्रोधलोभाभ्यां विशेषतो वर्जितः सन् धर्मशास्त्रानुसारेण अविरोधेन—

विनीतवेशो नृपतिः सभां गत्वा समाहितः।
आसीनः प्राङ्मुखो भूत्वा पश्येत्कार्याणि कार्यिणाम् ॥

इत्यादिप्रकारेण च व्यवहारान् भाषोत्तरक्रियारूपान् पश्येत् विचारयेत्। नृपपदेन क्षत्रियातिरिक्तस्यापि प्रजापालकस्य ग्रहणम्। ब्राह्मणैरिति मुख्यः कल्पः। असम्भवे क्षत्रियैर्वैश्यैर्वा सहेति प्रागुक्तम्। धर्मशास्त्रस्य प्राधान्यं दर्शयितुं विशेषोपन्यासः, विचारेऽर्थशास्त्रस्याऽप्यनुसरणीयत्वात्। तदुक्तं कात्यायनेन—

धर्मशास्त्रार्थकुशलैरर्थशास्त्रविशारदैः।

धर्मशास्त्राऽर्थशास्त्रयोर्विरोधे तु बलाबलमग्रे वक्ष्यति। धर्मशास्त्रानुसार्यपि निर्णयो न वादिक्षोभकरपरुषभाषणपराजिताधिकदण्डादियुक्तः कार्य इति दर्शयितुं क्रोधलोभविवर्जितत्वमुक्तम्। व्यवहारनिरुक्तौ कात्यायनः—

वि नानार्थेऽव सन्देहे हरणं हार उच्यते।
नानासन्देहहरणाद् व्यवहार इति स्मृतः ॥

स चायं द्विविधः। यदाह नारदः—

सोत्तरोऽनुत्तरश्चैव स विज्ञेयो विलक्षणः।
सोत्तरोऽभ्यधिको यत्र विलेखात्पूर्वकः पणः ॥

योऽत्र जीयते स इयन्तं दण्डं जेत्रे राज्ञे वा ददातीत्यादिरूपः पणो यत्र भाषालिखनात्पूर्वं क्रियते स सोत्तरः, तद्भिन्नोऽनुत्तरः। धर्मशास्त्रानुसारेणेत्युक्तं तत्र धर्मशास्त्रस्थितिमाह सम्पूर्णाध्यायेन। एवं च साक्षिवाद्यादिकृतस्याऽग्रेऽभिधानं सङ्गच्छते धर्मशास्त्रास्थित्यन्तर्गतत्वात् ॥ १ ॥

(मिता०) अभिषेकादिगुणयुक्तस्य राज्ञः प्रजापालनं परमो धर्मः। तच्च दुष्टनिग्रहमन्तरेण न संभवति। दुष्टपरिज्ञानं च न व्यवहारदर्शनमन्तरेण संभवति। तद्व्यवहारदर्शनमहरहः कर्तव्यमित्युक्तं—

(१) दर्शनेन विनेति व्यवहारदर्शनं ग०।

'व्यवहारान्स्वयं पश्येत्सभ्यैः परिवृतोऽन्वहम्' इति । स च व्यवहारः कीदृशः कतिविधः कथं चेतीतिकर्तव्यताकलापो नाभिहितस्तदभिधानाय द्वितीयोऽध्याय आरभ्यते—

व्यवहारानिति । अन्यविरोधेन स्वात्मसम्बन्धितया कथनं (१)व्यवहारः । यथा कश्चिदिदं क्षेत्रादि मदीयमिति कथयति, अन्योऽपि तद्विरोधेन मदीयमिति । तस्याऽनेकविधत्वं दर्शयति बहुवचनेन । नृप इति न क्षत्रियमात्रस्यायं धर्मः किन्तु प्रजापालनाधिकृतस्यान्यस्यापीति दर्शयति । पश्येदिति पूर्वोक्तस्यानुवादो धर्मविशेषविधानार्थः । विद्वद्भिर्वेदव्याकरणादिधर्मशास्त्राभिज्ञैः । ब्राह्मणैर्न क्षत्रियादिभिः । ब्राह्मणैः सहेति तृतीयानिर्देशादेषामप्राधान्यम् । 'सहयुक्तेऽप्रधाने' इति स्मरणात् । अतश्चाऽदर्शनेऽन्यथादर्शने च राज्ञो दोषो न ब्राह्मणानाम् । यथाह मनुः (८।१२८)—'अदण्ड्यान्दण्डयन्राजा दण्ड्यांश्चैवाप्यदण्डयन् । अयशो महदाप्नोति नरकं चा(२)धिगच्छति' ॥ इति । कथम् ? धर्मशास्त्रानुसारेण नाऽर्थ(३)शास्त्रानुसारेण । देशा(४)दिसमयधर्मस्यापि धर्मशास्त्राविरुद्धस्य धर्मशास्त्रविषयत्वान्न पृथगुपादानम् । तथा च वक्ष्य(५)ति—'निजधर्माविरोधेन यस्तु साम(६)यिको भवेत् । सोऽपि यत्नेन संरक्ष्यो धर्मो राजकृतश्च यः' ॥ इति । क्रोधलोभविवर्जित इति । धर्मशास्त्रानुसारेणेति सिद्धे 'क्रोधलोभविवर्जित' इति वचनमादरार्थम् । क्रोधोऽमर्षः । लोभो लिप्सातिशयः ॥ १ ॥

(वी० मि०) तत्र चादौ विद्वद्भिर्ब्राह्मणैः सहेत्युक्तैर्विद्वत्तां विशिष्यैव ब्राह्मणान् विशिनष्टि—

॥ श्रुताध्ययनसम्पन्ना धर्मज्ञाः सत्यवादिनः ॥

राज्ञा सभासदः कार्या रिपौ मित्रे च ये समाः ॥ २ ॥

---

(१) 'विप्रतिपद्यमाननरान्तरज्ञाताज्ञाताधर्मज्ञापनानुकूलो व्यापारो व्यवहारः । वादिप्रतिवादिकर्तृकः संभवद्धेतुसाक्षिप्रमाणको विरोधकोटिव्यवस्थापनानुकूलो व्यापारो वा सः । संप्रतिपत्त्युत्तरे तु व्यवहारपदप्रयोगो भाक्तः इति मदनरत्ने इति व्य. म.—'वि नानार्थेऽव संदेहहरणाद्व्यवहार इति स्मृतेः' ॥ इति कात्यायनम्० । (२) चैव गच्छति ख० । (३) 'अर्थशास्त्रं नीतिशास्त्रं औशनसादिकम् । (४) देशेति । आदिना देवगृहादिपरिग्रहः । पारिभाषिकधर्मेण व्यवस्थानं समयः । (५) वक्ष्यति अग्रे संविद्व्यतिक्रमप्रकरणे (श्लो. १८६) । (६) सामयिको धर्मो यावत्पथिकं भोजनं देयमस्मदरातिमण्डलं तुरङ्गादयो न प्रस्थापनीया इत्येवंरूपः ।

श्रुतं मीमांसादिनाऽर्थावधारणं तद्युक्तेन वेदशास्त्राध्ययनेन सम्पन्ना युक्ताः । अत एव धर्मज्ञाः धर्माधर्मविवेचनकुशलाः । अत एव च सत्याभिधानशीलाः । ये रिपौ मित्रे च समा द्वेषरागादिहीनास्ते ब्राह्मणा राज्ञां सभासदः सभोपवेशिनः कार्याः । यथा ते विचारार्थं सभामुपविशन्ति तथा तेषां समानादि विधेयमित्यर्थः । चकाराद्दुदासीनपरिग्रहः । बहुवचनेन स्मृत्यन्तरोक्तसंख्याविशेषमभिप्रैति । तथा च मनुः—

यस्मिन्देशे निषीदन्ति विप्रा वेदविदस्त्रयः ।

बृहस्पतिश्च—'सप्त पञ्च त्रयो वा सभासदो भवन्ती'ति । वस्तुतस्तु अनियुक्तब्राह्मणसाहित्यस्य प्रागुक्तत्वात्तदतिरिक्तानामपि सभासदां विधानार्थमयं श्लोकः । अत एव सप्राड्विवाक सामात्ययोः सब्राह्मणपुरोहितयोः कात्यायनेनोपादानं कृतम् । उक्तं च का(१)रणमुपक्रम्य—

कुलशीलवयोवृत्तविद्यावद्भिरमत्सरैः ।
वणिग्भिः स्यात्कतिपयैः कुलभूतैरधिष्ठितम् ॥

इति । मनुनाप्युक्तम्—

वणिक्पशुशिल्पप्रयोगेषु कृषिरक्षोपजीविषु ।
अशक्यो निर्णयो ह्यत्र तत्त्वज्ञैरेव कारयेत् ॥

इति । उपलक्षणं चैतत् । यो यत्र विज्ञस्तत्साहित्येनैव तन्निर्णेयमिति निगर्वः । न्याययोग्यान्नाह बृहस्पतिः—

शब्दाभिधानतत्त्वज्ञौ गणनाकुशलौ शुची ।
नानालिपिज्ञौ कर्तव्यौ राज्ञा गणकलेखकौ ॥
आकारणे रक्षणे च साक्ष्यर्थिप्रतिवादिनाम् ।
सभ्याधीनः सत्यवादी कर्तव्यः शुद्धपूरुषः ॥—॥ २ ॥

(मिता०) सभ्यांश्चाह—

श्रुतेति । किञ्च श्रुताध्ययनसम्पन्नाः श्रुतेन मीमांसाव्याकरणादिश्रवणेन अध्ययनेन च वेदाध्ययनेन सम्पन्नाः । धर्मज्ञाः । सत्यवादिनः सत्यवचनशीलाः । रिपौ मित्रे च ये समाः रागद्वेषादिरहिताः । एवंभूताः सभासदः सभायां संसदि यथा सीदन्त्युपविशन्ति तथा दानमानसत्कारैः राज्ञा कर्तव्याः । यद्यपि श्रुताध्ययनसम्पन्ना इत्यविशेषेणोक्तं तथापि ब्राह्मणा एव । यथाह कात्यायनः—'स तु सभ्यैः स्थि-

---

(१) करण०—इति क० पु० पाठः ।

रैर्युक्तःप्राज्ञैर्मौलै(१)र्द्विजोत्तमैः। धर्मशास्त्रार्थकुशलैरर्थशास्त्रविशारदैः' इति । ते च त्रयः कर्तव्याः बहुवचनस्यार्थवत्त्वात्, 'यस्मिन्देशे निषीदन्ति विप्रा वेदविदस्त्रयः' इति (८।११) मनुस्मरणाच्च । बृहस्पतिस्तु सप्त पञ्च त्रयो वा सभासदो भवन्तीत्याह—'लोकवेदज्ञधर्मज्ञाः सप्त पञ्च त्रयोऽपि वा । यत्रोपाविष्टा विप्राः स्युः सा यज्ञसदृशी सभा' इति । न च ब्राह्मणैः सहेति पूर्वश्लोकोक्तानां ब्राह्मणानां श्रुताध्ययनसम्पन्ना इत्यादि विशेषणमिति मन्तव्यम् । तृतीयाप्रथमान्तनिर्दिष्टानां विशेषणविशेष्यभावासंभवात् । विद्वद्भिरित्यनेन पुनरुक्तिप्रसङ्गाच्च । तथा च कात्यायनेन ब्राह्मणानां सभासदां च (२)स्पष्टं भेदो दर्शितः—'सप्राड्विवाकः सामात्यः सब्राह्मणपुरोहितः । ससभ्यः प्रेक्षको राजा स्वर्गे तिष्ठति धर्मतः' ॥ इति । तत्र ब्राह्मणा अनियुक्ताः, सभासदस्तु नियुक्ता इति भेदः । अत एवोक्तम्—'नियुक्तो वाऽनियुक्तो वा धर्मज्ञो वक्तुमर्हति' इति । तत्र नियुक्तानां यथावस्थितार्थकथनेऽपि यदि राजाऽन्यथा करोति तदाऽसौ निवारणीयोऽन्यथा दोषः । उक्तं च कात्यायनेन—'अन्यायेनापि तं यान्तं येऽनुयान्ति सभासदः । तेऽपि तद्भागिनस्तस्माद्बोधनीयः स तैर्नृपः' इति । अनियुक्तानां पुनरन्यथाभिधानं वा दोषो न तु राज्ञोऽनिवारणे । 'स(३)भा वा न प्रवेष्टव्या वक्तव्यं वा समञ्जसम् । अब्रुवन्विब्रुवन्वापि नरो भवति किल्बिषी' ॥ इति (८।१३) मनुस्मरणात् । रिपौ मित्रे चेति चकाराल्लोकरञ्जनार्थं कतिपयैर्वणिग्भिरप्यधिष्ठितं सदः कर्तव्यम् । यथाह कात्यायनः—'कुलशीलवयोवृत्तवित्तवद्भिरमत्सरैः । वणिग्भिः स्यात्कतिपयैः कुलभूतैरधिष्ठितम्' ॥ इति ॥ २ ॥

(वी०मि०) 'व्यवहारान् स्वयं पश्ये'दिति पूर्वाध्यायेऽभिहितं तदसम्भवे त्वाह—

अपश्यता कार्यवशाद्व्यवहारान्नृपेण तु ॥
सभ्यैः सह नियोक्तव्यो ब्राह्मणः सर्वधर्मवित् ॥ ३ ॥

कार्यान्तरव्यग्रतावशाद् व्यवहारान् द्रष्टुमक्षमेन तु राज्ञा सभ्यैः सहितो व्यवहारोपयोगिसर्वधर्मज्ञो ब्राह्मणो व्यवहारदर्शनार्थं नि-

---

(१) मौलैः सेवकत्वेन पितृपितामहादिपरंपरायातैः ।
(२) च भेदः स्पष्टो ग । (३) सभां वा न प्रवेष्टव्यं ग० ।

योक्तव्य इत्यर्थः । अत्र विशेषमाह कात्यायनः—'दान्तं कुलीनं मध्यस्थमनुद्वेगकरं स्थिरम् । परत्र भीरुं धर्मिष्ठमुद्युक्तं क्रोधवर्जितम् ॥ एतादृशब्राह्मणाभावे क्षत्रियो वैश्यो वा नियोक्तव्य इति प्रागुक्तम् । नारदः—तपस्विनां तु कार्याणि त्रैविद्यैरेव कारयेत् । मायायोगविदां चैव न स्वयं कोपकारणात् ॥ येषां कोपाद्भयं भवति तेषां विचारस्तज्जातिद्वारैव कारयितव्य इत्यर्थः । स्वयं विचारकरणेऽपि प्राड्विवाकसाहित्यमपेक्षितमेव । तदाह नारदः—धर्मशास्त्रं पुरस्कृत्य प्राड्विवाकमते स्थितः । समाहितमतिः पश्येद्व्यवहाराननुक्रमात् ॥—॥ ३ ॥ (मिता०) व्यवहारान्नृपः पश्येदित्युक्तं तत्रानुकल्पमाह । अपश्यतेति । कार्यान्तर(१)व्याकुलतया व्यवहारानपश्यता नृपेण पूर्वोक्तैः सभ्यैः सह सर्वधर्मवित् सर्वान्(२) धर्मान् शास्त्रोक्तान् सामयिकांश्च धर्मान्वेत्ति विचारयतीति सर्वधर्मवित् ब्राह्मणो नियोक्तव्यो व्यवहारदर्शने । तं च कात्यायनोक्तगुणविशिष्टं कुर्यात् । यथाह—'दान्तं कुलीनं मध्यस्थमनुद्वेगकरं स्थिरम् । परत्र भीरुं धर्मिष्ठमुद्युक्तं क्रोधवर्जितम्' ॥ इति । एवंभूतब्राह्मणासंभवे क्षत्रियं वैश्यं वा नियुञ्जीत न शूद्रम् । यथाह कात्यायनः—'ब्राह्मणो यत्र न स्यात्तु क्षत्रियं तत्र योजयेत् । वैश्यं वा धर्मशास्त्रज्ञं शूद्रं यत्नेन वर्जयेत्' ॥ इति । नारदेन (३)त्वयमेव मुख्यो दर्शितः—'धर्मशास्त्रं पुरस्कृत्य प्राड्विवाक्रमते स्थितः । समाहितमतिः पश्येद्व्यवहाराननुक्रमात्' ॥ इति । प्राड्विवाकमते स्थितो न स्वमते स्थितः । राजा चारचक्षुषा परसैन्यं पश्यतीतिवत् । तस्य चेयं यौगिकी संज्ञा । अर्थिप्रत्यर्थिनौ पृच्छतीति प्राट् तयोर्वचनं विरुद्धमविरुद्धं च सभ्यैः सह विविनक्ति (४)विवेचयति वेति विवाकः । प्राट् चासौ विवाकश्च प्राड्विवाकः । उक्तं च—'विवादानुगतं पृष्ट्वा ससभ्यस्तत्प्रयत्नतः । विचारयति येनासौ (५)प्राड्विवाकस्ततः स्मृतः' इति ॥ ३ ॥

---

(१) व्यग्रतया ख० ग० । (२) धर्मशास्त्रोक्तान् ।

(३) ब्राह्मण एव । (४) विवक्तीति वा ग. ।

(वी० मि०) असाद्विचारकारिणां सभ्यानां राज्ञा दण्डः कार्य इत्याह—

रागाल्लोभाद्भयाद्वापि स्मृत्यपेताद्विकारिणः ॥
सभ्याः पृथक्पृथग्दण्ड्या विवादाद् द्विगुणं दमम् ॥ ४ ॥

रागादिवशात्स्मृत्यपेतस्य स्मृतिविरुद्धस्य आदिपदादेशाचारादिविरुद्धस्य च [सङ्ग्रहः] कर्तव्यः। सभ्या विचारार्थं सभायां नियुक्ताः प्राड्विवाकपर्यन्ताः पृथक् पृथक् प्रत्येकं विवादात् प्रकृताविवादपराजयनिमित्तकाद्दण्डाद्धनग्रहणरूपाद् द्विगुणं दमं दण्ड्याः प्रापणीयाः। अपिकारेणाऽज्ञातसमुच्चयः। तदाह कात्यायनः—

कार्यस्य निर्णयं सम्यग् ज्ञात्वा सभ्यस्ततो वदेत्।
अन्यथा नैव वक्तव्यं वक्ता द्विगुणदण्डभाक् ॥
सभ्यदोषात्तु यन्नष्टं देयं सभ्येन तत्तथा।
कार्यं तु कार्यिणामेव निश्चितं तु विचारयेत् ॥

एवं निश्चितं सम्यग्विचारितं पुनः विचारयेत् न तु वादिपराजयनिमित्तक्रोधेन दण्डः। तत्र—

अन्यायवादिनः सभ्यास्तथैवोक्तौ च जीविनः।
विश्वस्तवञ्चकाश्चैव निर्वास्याः सर्व एव ते ॥

इति बृहस्पत्युक्तादिर्दण्डो द्रष्टव्यः ॥ ४ ॥

(मिता०) प्राड्विवाकादयः (१)सभ्या यदि रागादिना स्मृत्यपेतं व्यवहारं विचारयन्ति तदा राज्ञा किं कर्तव्यमित्यत आह—

रागादिति। अपि च पूर्वोक्ताः सभ्या रजसो निरङ्कुशत्वेन तदभिभूता रागात्स्नेहातिशयाल्लोभाल्लिप्सातिशयाद्भयात्संत्रासात्स्मृत्यपेतं स्मृतिविरुद्धं आदिशब्दादाचारापेतं कुर्वन्तः पृथक्पृथगेकैकशो विवादाद्विवादपराजयनिमित्ताद्दमाद्द्विगुणं दमं दण्ड्याः न पुनर्विवादास्पदीभूताद्द्रव्यात्। तथा हि सति स्त्रीसङ्ग्रहणादिषु दण्डाभावप्रसङ्गः। रागलोभभयानामुपादानं रागादिष्वेव द्विगुणो दमो नाज्ञानमोहादिष्विति नियमार्थम्। न च 'राजा सर्वस्येष्टे ब्राह्मणवर्जम्' इति गौतमवच(२)नान्न ब्राह्मणा दण्ड्या इति मन्तव्यं तस्य प्रशंसार्थ-

---

(१)-बृहस्पतिस्तु-'विवादे पृच्छति प्रश्नं प्रतिप्रश्नं तथैव च। नयपूर्वं प्राग्वदति प्राड्विवाकस्ततः स्मृतः ॥ इति व्य. म.। (२) न ब्राह्मणो दण्ड्य इति क. ग.।

त्वात् । यत्तु षड्भिः परिहार्यो रा(१)ज्ञाऽवध्यश्चावन्ध्यश्चादण्ड्यश्चा-वाहिष्कार्यश्चापरिवाद्यश्चापरिहार्यश्चेति तदपि स एष बहुश्रुतो भवति लोकवेदवेदाङ्ग(२)विद्वा(३)कोवाक्येतिहासपुराणकुशलस्तदपेक्षस्त-दृत्तिश्चाष्टचत्वारिंशत्संस्कारै संस्कृतास्त्रिषु कर्मस्वभिरतः षट्सु वा समयाचारिकेष्वभिविनीत इति प्रतिपादितबहुश्रुतविषयं न ब्राह्मण-मात्रविषयम् ॥ ४ ॥

(वी० मि०) व्यवहारदर्शनस्य व्यवहारविषयज्ञानाधीनत्वात्सा-मान्यतो व्यवहारविषयमाह—

स्मृत्याचारव्यपेतेन मार्गेणाऽऽधर्षितः परैः ॥
आवेदयति चेद्राज्ञे व्यवहारपदं हि तत् ॥ ५ ॥

स्मृतिसदाचारबहिर्भूतेन मार्गेणोपायेन परैराधर्षित आस्क-न्दितो राज्ञे चेत्परकृताधर्षणमावेदयति तत्तदा व्यवहारस्य पदं वि-षयो ऋणादानादिर्भवति । चेदित्यनेन स्वयं विवादोत्थापनं न कार्य-मिति सूचितम् । तदाह मनुः—

नोपादयेत्स्वयं कार्यं राजा नाऽप्यस्य पूरुषः ।
न च प्रापितमन्येन प्रसेदर्थं कथञ्चन ॥

यदिति पाठस्तु मिश्रादिसंमतः । यद्ऋणादानादि आवेदयति त-दिति योज्यम् । परैरिति बहुवचनं साध्यस्यैकत्वे । साध्यभेदे तु—

एकस्य बहुभिः सार्द्धं स्त्रीभिः प्रेष्यकरैः सह ।
अनादेयो भवेद्धादः—

इति नारदवचनं हिशब्देनाऽऽवेदितस्याऽवश्यविचार्यत्वमभि-प्रैति । तत्र विशेषमाह बृहस्पतिः—

गुरुशिष्यौ पितापुत्रौ दम्पती स्वामिभृत्यकौ ।
एतेषां समवेतानां व्यवहारो न सिद्ध्यति ॥
एकस्य बहुभिः सार्द्धं स्त्रीभिः प्रेष्यकरैः सह ।
अनादेयो भवेद्धादो विद्वद्भिः परिकीर्तितः ॥
राज्ञा विवर्जितो यस्तु यस्तु पौरविरोधकृत् ।
राष्ट्रस्य वा समस्तस्य प्रकृतीनां तथैव च ॥

---

(१) राज्ञा वऽयश्चावध्यश्च ग. ।
(२) वेदाङ्गविद्वाक्येतिहास ग. ।
(३) वाकोवाक्यं-उक्तिप्रत्युक्तिमद्वाक्यम् . ।

अन्येपि ये पुरग्राममहाजनविरोधिनः ।
अनादेयास्तु ते सर्वे व्यवहाराः प्रकीर्तिताः ॥

तच्च व्यवहारपदं सामान्यतो द्विविधं शाङ्कताभियोगान्निश्चिताभियोगाच्च । अभियोगश्च द्विविधो विधिनिषेधरूपत्वात् । यथा ममाऽनेन हिरण्यमपहृतमिति मत्त ऋणत्वेन गृहीतं धनमयं न ददातीति च । यदाह कात्यायनः—

न्याय्यं स्वं नेच्छते कर्तुमन्याय्यं वा करोति यः ।

विशेषतो व्यवहारपदानि विभजते मनुः—

तेषामाद्यमृणादानं निःक्षपोऽस्वामिविक्रयः ।
सम्भूय च समुत्थानं दत्तस्याऽनपकर्म च ॥
वेतनस्यैव चादानं संविदश्च व्यतिक्रमः ।
क्रयविक्रयानुशयो विवादः स्वामिपालयोः ॥
सीमाविवादधर्मश्च पारुष्ये दण्डवाचिके ।
स्तेयं च साहसं चैव स्त्रीसङ्ग्रहण एव च ॥
स्त्रीपुंधर्मौ विभागश्च द्यूतमाह्वय एव च ।
पदान्यष्टादशैतानि व्यवहारस्थिताविह ॥—॥ ५ ॥

(मिता०) व्यवहारविषयमाह—

स्मृत्येति । धर्मशास्त्रसमयाचाराविरुद्धेन मार्गेण परैराधर्षितोऽभिभूतो यद्राज्ञे प्राड्विवाकाय वा आवेदयति विज्ञापयति चेद्यदि तदावेद्यमानं व्यवहारपदं प्रतिज्ञोत्तरसंशयहेतुपरामर्शप्रमाणनिर्णयप्रयोजनात्मको व्यवहारस्तस्य पदं विषयस्तस्य चेदं सामान्यलक्षणम् । स च द्विविधः शङ्काभियोगस्तत्त्वाभियोगश्चेति । यथाह नारदः—'ह्यभियोगस्तु विज्ञेयः शङ्कातत्त्वाभियोगतः । शङ्काऽसतां तु संसर्गात्तत्त्वं होढाऽभिदर्शनात्' ॥ इति । होढा लो(१)प्त्र लि(२)ङ्गमिति यावत् । तेन दर्शनं, साक्षाद्वा दर्शनं होढाभिदर्शनं तस्मात् । तत्त्वाभियोगोऽपि द्विविधः । प्रतिषेधात्मको विध्यात्मकश्चेति । यथा मत्तो हिरण्यादिकं गृहीत्वा न प्रयच्छति । क्षेत्रादिकं ममायमपहरतीति च । उक्तं च कात्यायनेन—'न्याय्यं स्वं नेच्छते कर्तुमन्याय्यं वा करोति यः' इति । स पुनश्चाष्टादशधा भिद्यते । यथाह मनुः (८.४-७)—'तेषा-

(१) लुप्यत इति लोप्त्रं चौर्यधनम् । (२) लिङ्गं अव्यभिचारितं चिह्नमित्यर्थः ।

मा(१)द्यमृणादानं निक्षेपोऽस्वामिविक्रयः। संभूय च समुत्थानं दत्तस्यानपकर्म च ॥ वेत(२)नस्यैव चाऽदानं संविदश्च व्यतिक्रमः। क्रयविक्रयानुशयो विवादः स्वामिपालयोः ॥ सीमा(३)विवादधर्मश्च पारुष्ये दण्डवाचिके। स्तेयं च साहसं चैव स्त्रीसंग्रहणमेव च ॥(४) स्त्रीपुंधर्मो विभागश्च द्यूतमाह्वय एव च। पदान्यष्टादशैतानि व्यवहारस्थितौविह' ॥ इति ॥ एतान्यपि साध्यभेदेन पुनर्बहुत्वं गतानि। यथाह नारदः—'एषामेव प्रभेदोऽन्यः शतमष्टोत्तरं (५)भवेत्। क्रियाभेदान्मनुष्याणां शतशाखो निगद्यते' ॥ इति ॥ आवेदयति चेद्राज्ञे इत्यनेन स्वयमेवागत्यावेदयति, न राजप्रेरितस्तत्पुरुषप्रेरितो वेति दर्शयति। यथाह मनुः (८।४३)—'नोत्पादयेत्स्वयं कार्यं राजा नाप्यस्य पूरुषः। न च प्रापितमन्येन प्रसेतार्थं कथञ्चन' ॥ इति। परैरिति परेण पराभ्यां परैरित्येकस्यैकेन द्वाभ्यां बहुभिर्वा व्यवहारो भवतीति दर्शयति। यत्पुनः—'एकस्य बहुभिः सार्धं स्त्रीणां प्रेष्यजनस्य च। अनादेयो भवेद्वादो धर्मविद्भिरुदाहृतः' ॥ इति नारदवचनं तद्भिन्नसाध्यद्वयविषयम्। आवेदयति चेद्राज्ञ इत्यनेनैव राज्ञा पृष्टो विनीतवेष आवेदयेत्। आवेदितं च युक्तं च चेग्मु(६)द्रादिना प्रत्यर्थ्याह्वानमक(७)लपादीनां चानाह्वानमित्यार्थसिद्धमिति नोक्तम्। स्मृत्यन्तरे तु स्पष्टार्थमुक्तम्। यथा—'काले कार्यार्थिनं पृच्छे(८)द्गृणन्तं पुरतः स्थितम्। किं कार्यं का च ते पीडा मा मैवीर्ब्रूहि मानव ॥ केन कस्मिन्कदा कस्मात्पृच्छेदेवं सभागतम्। एवं पृष्टः स य-

---

(१) ऋणादानं ऋणस्य न दानमदानम्, निक्षेपः स्वधनस्यान्यस्मिन्नर्पणम्, अस्वामिना सम्भूय समुत्थानं अनेकैर्मिलित्वा यत्र धनार्थं वाणिज्यायुद्यमः क्रियते, दत्तस्यानपकर्म अप्रत्यर्पणम्।

(२) कर्मकरस्य भृतेरदानम्, संविदः कृतव्यवस्थाया अतिक्रमः, अनुशयः क्रयविक्रये चैं कृते पश्चात्तापाद्विप्रतिपत्तिः, स्वामिपशुपालयोर्विवादः।

(३) ग्रामसीमाविप्रतिपत्तिः, वाक्पारुष्यमाक्रोशनादि, दण्डपारुष्यं ताडनादि, स्तेयं निह्नवेन धनग्रहणम्, साहसं प्रसह्यधनहरणादि, स्त्रियश्च परपुरुषसंपर्कः।

(४) स्त्रीसहितस्य पुंसो धर्मे व्यवस्था, विभागः पैतृकादिधनस्य, द्यूतं अक्षादिक्रीडा पणव्यवस्थापनपूर्वकं पक्षिमेषादिप्राण्ययोधनं, समाह्वयस्य प्राणिद्यूतरूपत्वेन द्यूतावान्तरविशेषत्वादष्टादशसंख्योपपत्तिः।

(५) स्मृतम् घ।

(६) 'शिक्का'परपर्यायगरुडादिचिह्नेन। (७) अधिभ्याधिसहितादीनाम्।

(८) पृच्छेत्त्वणतं इति पाठः।

द्ब्रूयात्ससभ्यैर्ब्राह्मणैः सह ॥ विमृश्य कार्यं न्याय्यं चेदाह्वानार्थमतः परम् । मुद्रां वा निक्षिपेत्तस्मिन्पुरुषं वा समादिशेत् ॥ (१)अकल्पवालस्थविरविषमस्थाक्रियाकुलान् । (२)कार्यातिपातिव्यसनिनृपकार्योत्सवाकुलान् । मत्तो(३)न्मत्तप्रमत्तार्तान्भृत्याज्ञाह्वानयेन्नृपः॥ न हीनपक्षां युवतिं कुले जातां प्रसूतिकाम् । सर्ववर्णोत्तमां कन्यां ता(४)ज्ञातिप्रभुकाः स्मृताः ॥ तदधीनकुटुम्बिन्यः स्वैरिण्यो गणिकाश्च याः । नि(५)ष्कुला याश्च पतितास्तासामाह्वानमिष्यते ॥ (६)कालं देशं च विज्ञाय कार्याणां च बलाबले । अकल्पादीनपि स्वैर्यानैराह्वानयेन्नृपः ॥ ज्ञात्वा(७)भियोगं वेऽपि स्युर्वने प्रव्रजितादयः । तानप्याह्वानयेद्राजा गुरुकार्येष्वकोपयन्' ॥ इति । (८)आसेधन्यवस्थाप्यर्थसिद्धैव नारदेनोक्ता-'वक्तव्येऽर्थे ह्यतिष्ठन्तमुत्क्रामन्तं च तद्वचः । आसेधयेद्वि(९)वादार्थी यावदाह्वानदर्शनम् ॥ (१०)स्थानासेधः कालकृतः प्रवासात्कर्मणस्तथा । चतुर्विधः स्यादासेधो नासिद्धस्तं विलङ्घयेत् । आसेधकाल (११)आसिद्ध आसेधं योऽतिवर्तते । स धि(१२)नेयोऽन्य(१३)थाकुर्वन्नासेद्धा(१४) दण्डभाग्भवेत् ॥ (१५)नदीसन्तारक्षान्तारदुर्देशोपप्लवादिषु । आसिद्धस्तं परासेधमुत्क्रामन्नापराध्नुयात् ॥

---

(१) अकल्पो व्याध्याद्यभिभूतः. विषमस्थ उत्पन्नसङ्कटः ।

(२) मत्तो मादकद्रव्येण, उन्मत्तः उन्मादेन पञ्चविधेन वातपित्तश्लेष्मसन्निपातग्रहसम्भवेनोपसृष्टः, प्रमत्तः सर्वदावधानहीनः ।

(३) ता हीनपक्षादयः ज्ञातिस्वामिका इत्यर्थः । (४) निष्कुलाः कुलहीनाः ।

(५) एतत्प्रसङ्गादकल्पाद्याह्वाने पूर्वनिषिद्धेपि प्रतिप्रसवमाह कालमिति । तत्र प्रकारद्वयं शवैर्यानैरिति ।

(६) अभियोगोऽभिग्रहः आरोपस्तम् । (७) आसेधो राजाधिकारिभिर्निरोधः ।

(८) विवादार्थी वादी, आसेधयेत्प्रत्यर्थिनं निरोधयेत् ।

(९) आसेधं इति । स चतुर्विधः—१ प्रकृते अस्मात्प्रदेशान्न गन्तव्यमिति स्थानासेधः, २ आसन्ध्यं न गन्तव्यमिति कालासेधः, ३ देशान्तरं प्रति न गन्तव्यमिति प्रवासासेधः, ४ असौ व्यापारो न कर्तव्य इति प्रवासासेधः ।

(१०) आसिद्धो निरुद्धः । (११) विनेयः शिक्षणीयः ।

(१२) अन्यथा कुर्वन् अनासेधकाले आसेधं कुर्वन् ।

(१३) आसेद्धा आसेधकर्ता राजाधिकारी ।

(१४) नासिद्धं विलङ्घयेदित्यस्य प्रतिप्रसवमाह नदीति ।

निर्वे(१)ष्टुकामो रोगार्तो यि(२)यक्षुर्व्यसने स्थितः । अभि(३)युक्तस्तथान्येन राजकार्योद्यतस्तथा ॥ गवां प्रचारे गोपालाः सस्यावापे कृषीवलाः । शिल्पिनश्चापि (४)तत्कालमायुधीया(५)श्च विग्रहे' इति । आसेधो राजाज्ञयाऽवरोधः । अकल्पादयः पुत्रादिकमन्यं वा सुहृदं प्रे(६)षयेयुः, न च ते परार्थवादिनः । 'यो न भ्राता न च पिता न पुत्रो न नियो(७)गकृत् । परार्थवादी दण्ड्यः स्याद्व्यवहारेषु विद्रु(८)वन्' ॥ इति नारदवचनात् ॥ ५ ॥

(वी० मि०) चतुष्पाद्व्यवहारोऽयमिति वक्ष्यति तत्र प्रथमं भाषापादे राजकृत्यमाह—

प्रत्यर्थिनोऽग्रतो लेख्यं यथावेदितमर्थिना ॥
समामासतदर्द्धाहर्नामजात्यादिचिह्नितम् ॥ ६ ॥

अर्थिना प्रत्यर्थिनोऽग्रतो लेखयितव्यम् । समा वर्षं, मासः प्रसिद्धः, तदर्द्धं पक्षः, अहः दिवसः एते भाषाधिकाराः एते भाषाधिकरणे कालाः नाम जातिप्रतिवादिनः स्वस्य च । आदिपदात्—

साम्बन्ध्याप्रमाणं द्रव्यं च संख्या नाम तथात्मनः ।
राज्ञां च क्रमशो नाम निवासं साध्यनाम च ॥
क्रमात्पितॄणां नामानि पीडामार्हतुदायकौ ।
क्षमालिङ्गानि चान्यानि पक्षे सङ्कीर्त्य कल्पयेत् ॥

इति कात्यायनोक्ता द्रव्यसंख्यादयः ।

एतेनाऽमुकवर्षेऽमुकमासादौ अमुकपौत्रस्याऽमुकपुत्रस्य अमुकजातीयस्याऽमुकनाम्नो ममाऽमुकपौत्रेणाऽमुकपुत्रेणाऽनेनाऽमुकनाम्नाऽमुकजातीयेनाऽमुकस्य राज्ञो राज्ये इयत्परिमितं हिरण्यं ऋणत्वेन गृहीतं तद्दातु मया चैतावद्दिनपर्यन्तमेतत्प्रणयवशान्न प्रार्थितं पूर्ववर्षे प्रार्थितं चेत्यादि भाषितमर्थिना राजलेख्यशरीरं पर्यवस्यति । परन्तु तत्र त्वं मह्यं सुवर्णस्य शतं धारयसि मत्त ऋणत्वेन गृहीतता-

---

(१) निर्वेष्टुकाम आश्रमान्तरं गन्तुकामः, विवाहादावुद्यत इति यावत् ।
(२) यियक्षुर्यष्टुमिच्छुः । (३) अभियुक्तो नियोजितः ।
(४) तत्कालं शिल्पकाले । (५) आयुधीया आयुधजीविनो योद्धारः । विग्रहे संग्रामे ।
(६) प्रेषयेत । (७) नियोगकृदाज्ञाकारी ।
(८) विद्रुवन् व्यवहारेषु विरुद्धं विवधं विशेषण वा ब्रुवन् ।

वद्धनकत्वादिति भाषाशरीरं ददात्विति चार्थिताव्यञ्जकः, इतरच्च निर्णयोपयोगि । एवं च यत्र यावता भाषितार्थसिद्धिर्भवति तत्र तावदर्थिना भाषितव्यं च राज्ञा च लेखनीयमन्यथा दृष्टार्थतापत्तेरिति विवेक्तव्यम् । (अर्थतत्त्वं चाऽधिकपीडाकार्यं चाऽप्याधिकं भवेत् । तस्याऽपि (१)दातव्यो नयः पूर्वं निवेदयेत् । अर्थिनेति सति सम्भवे । तस्याप्रगत्वे तु नारदः—)

अर्थिना सन्नियुक्तो वा प्रत्यर्थी प्रहितोऽपि वा ।
यो यस्यार्थे विवदते तयोर्जयपराजयौ ॥
यो न भ्राता न च पिता न पुत्रो न नियोगकृत् ।
परार्थवादी दण्ड्यः स्याद्व्यवहारेषु विब्रुवन् ॥

बृहस्पतिः—

अप्रगल्भजडोन्मत्तवृद्धस्त्रीबालरोगिणाम् ।
पूर्वोत्तरं वदेत्तद्वदनियुक्तोऽथवा नरः ॥

क्वचित्तु प्रतिनिध्यभावमाह कात्यायनः—

ब्रह्महत्यासुरापाने स्तेये गुर्वङ्गनागमे ।
अन्येष्वप्यभिशापेषु प्रतिवादी न दीयते ॥
मनुष्यमरणे स्तेये परदाराभिमर्षणे ।
अभक्ष्यभक्षणे चैव कन्याहरणदूषणे ॥
पारुष्ये कूटकरणे नृपद्रोहे तथैव च ।
प्रतिवादी न दातव्यः कर्ता तु विवदेत्स्वयम् ।

भाषापूर्वकृत्यानि राज्ञो वादिनो वा संहिताकृता स्मृत्यन्तरेष्वतिप्रसिद्धान्न लिखितानि । यथाह कात्यायनः—

गृहीतग्रहणो न्यायो न प्रवर्त्यो महीभुजा ।
तस्य वा तत्समर्प्यं स्यात्स्थापयेद्वा परस्य तत् ॥

नारदः—

वक्तव्येऽर्थे न तिष्ठन्तमुत्क्रामन्तं च तद्वचः ।
आसेधयेद्विवादार्थं यावदाह्वानदर्शनम् ॥
आसेधकाल आसिद्ध आसेधं योऽतिवर्तते ।
स विनेयस्तथाकुर्वन्नासेद्धा दण्डमर्हति ॥

---

(१) तस्यार्थिदातव्यो—इति क. पु. पाठः ।

तथा—

नदीसन्तारकान्तारदुर्देशोपप्लवादिषु।
आसिद्धः परमासेधमुत्क्रामन्नाऽपराध्नुयात् ॥

तथा—

निर्वेष्टुकामो रोगार्तो यियक्षुर्व्यसने स्थितः।
अभियुक्तस्तु न्यायेन बीजकर्मोद्यतस्तथा ॥
गवां प्रचारे गोपालाः सस्यबन्धे कृषीवलाः।
शिल्पिनश्चाऽपि तत्काले आयुधीयाश्च विग्रहे ॥
अवाप्तव्यवहारश्च दूतो दानोन्मुखो व्रती।
विषयस्थाश्च नासेध्या न चैतानाह्वयेन्नृपः ॥

अत्र भाषाया गुणः अल्पाक्षरः प्रभूतार्थ इति बृहस्पत्याद्युक्तः। दोषाणाम्—

अप्रसिद्धं सदोषं च निरर्थं निष्प्रयोजनम्।

इत्याद्युक्तानामभावाश्च आवेदितमित्याङ्शब्देन दर्शितास्ते च ग्रन्थगौरवभयान्नेह तन्यन्ते। वादी तु प्रथमभाषितविपरीतं न वदेत्। यथाह बृहस्पतिः—

यं चार्थमभियुञ्जीत न तं विप्रकृतिं नयेत्।
न च पक्षान्तरं गच्छेत् गच्छन् पूर्वात्स हीयते ॥

विचारारम्भात्पूर्वं तु भाषायां न्यूनाधिकाभिधानवादिनो नो हानिः करम्। तदाह—

नारदः—

भाषायामुत्तरं यावत्प्रत्यर्थी नाभिलेखयेत्।
अर्थी तु लेखयेत्तावद्यावन्नोत्तरदर्शनम् ॥
अवष्टब्धस्योत्तरेण निवृत्तं लेखनं भवेत्।

अत्रोत्तरपदं विचारारम्भपरम् ॥

उभयोर्लिखिते कार्ये प्रारब्धे तत्त्वनिर्णये।
अयुक्तं तत्र यो ब्रूयात्स तदर्थान्न हीयते ॥
पूर्वोत्तर निविष्टे तु विचारे सम्प्रवेशिते।
निर्णिक्तं तु तयोस्तत्र वचनं वादिनोर्भृगुः ॥
मोहाद्वा यदि वा शाठ्याद्यन्नोक्तं पूर्ववादिना।
उत्तरान्तर्गतं चापि तद्ग्राह्यमुभयोरपि ॥

श्रुतं च लिखितं चैव शोधितं च विचारितम्।
इति बृहस्पतिवचनात्। शोधने व्यासः—
पाण्डुलेखेन फलके भूमौ चाफलके लिखेत्।
ऊनाधिकं तु संशोध्य पश्चात्पत्रे निवेशयेत्॥
अन्यथा लेखस्य दण्डमाह कात्यायनः—
अन्यदुक्तं लिखेदन्यद्योऽर्थिनां × × × वचः।
चौरवच्छासयेत्तं तु धार्मिकः पृथिवीपतिः॥—॥ ६॥

(मिता०) प्रत्यर्थिनि मुद्रालेख्यपुरुषाणामन्यतमेनानीते किं कुर्यादित्यत आह—

प्रत्यर्थिन इति। अर्थ्यते इत्यर्थः साध्यः सोऽस्यास्तीत्यर्थी तत्प्रतिपक्षः प्रत्यर्थी तस्याग्रतः पुरतो लेख्यं लेखनीयम्। यथा येन प्रकारेण पूर्वमावेदनकाले आवेदितं तथा न पुनरन्यथा। अन्यथावादित्वेन व्यवहारस्य भङ्गप्रसङ्गात्। 'अन्यवादी क्रि(१)याद्वेषी नो(२)पस्थाता निरुत्तरः। (३)आहूतप्रपलायी च हीनः पञ्चविधः स्मृतः'॥ इति। आवेदनकाल एवार्तिवचनस्य लिखितत्वात्पुनर्लेखनमनर्थकमित्यत आह-समामासेत्यादि। संवत्सरमासपक्षतिथिवारादिनार्थिप्रत्यर्थिनाम-ब्राह्मणजात्यादिचिह्नितम्। आदिशब्देन द्रव्यतत्संख्यास्थानव(४)लाक्षमालिङ्गादीनि गृह्यन्ते॥ यथोक्तम्—'अर्थव(५)द्धर्मसंयुक्तं परिपूर्णमनाकुलम्। साध्यवद्वाचकपदं प्रकृतार्थानुबन्धि च॥ प्रसिद्धमविरुद्धं च निश्चितं (६)साधनक्षमम्। संक्षिप्तं नि(७)खिलार्थं च देशकालविरोधि च॥ वर्षर्तुमासपक्षाहोवेलादेशप्रदेशवत्। स्थानावसथसाध्याख्याजात्याकारवयोयुतम्॥ साध्यप्रमाणसंख्यावदात्मप्रत्यर्थिनामवत्। परात्मपूर्वजानेकराजनामाभिरङ्कितम्॥ क्षमालिङ्गात्मपीडावत्कथिताहर्तृदायकम्। यदावेदयते राज्ञे तद्भाषेत्यभिधीयते'॥ इति। भाषा प्रतिज्ञा पक्ष इति नार्थान्तरम्। आवेदनसमये कार्यमात्रं लिखितं प्रत्यर्थिनोऽग्रतः समामासा-

---

(१) क्रियाद्वेषी कार्यद्वेषी। (२)नोपस्थाता समीपे न तिष्ठन्। (३) आहुतव्यपलापी ग। (४) वेलेति दिनमध्येऽपि प्रातरादिमुहूर्तरूपो वा कालविशेष इत्यर्थः। (५) अर्थवदिति। अर्थवत्प्रयोजनवत्, धर्मसंयुक्तं धर्मो गुणः अल्पाक्षरत्वप्रभूतार्थवत्त्वादिकस्तेन युक्तं, परिपूर्णमध्याहारानपेक्षं, अनाकुलमसंदिग्धाक्षरं, साध्यवत् सिषाधयिषितार्थसहितम्, वाचकपरं बहुव्रीहिगौणलाक्षणिकादिरहितं, प्रकृतार्थानुबन्धि पूर्वावेदितार्थानुरोधि। (६) साधने क्षमम् ख. (७) नियतार्थं ग.

द्विविशिष्टं लिख्यत इति विशेषः। संवत्सरविशेषणं यद्यपि सर्वव्यवहारेषु नोपयुज्यते तथाप्याधिप्रतिग्रहक्रयेषु निर्णयार्थमुपयुज्यते। '(१)आधौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्तरा' इति वचनात्। अर्थव्यवहारेऽपि एकस्मिन्संवत्सरे यत्संख्याकं यद्द्रव्यं यतो येन गृहीतं प्रत्यर्पितं च पुनरन्यस्मिन्वत्सरे तद्द्रव्यं तत्संख्याकं ततस्तेन गृहीतं याच्यमानो यदि ब्रूयात्सत्यं गृहीतं प्रत्यर्पितं चेति। वत्सरान्तरे गृहीतं प्रत्यर्पितं नास्मिन्वत्सरे इत्युपयुज्यते। एवं मासाद्यपि योज्यम्। देशस्थानादयः पुनः स्थावरेष्वेवोपयुज्यन्ते-'देशश्चैव तथा स्थानं संनिवेशस्तथैव च। जातिः संज्ञाऽधिवासश्च प्रमाणं क्षेत्रनाम च॥ पि(२)तृपैतामहं चैव पूर्वराजानुकीर्तनम्। स्थावरेषु विवादेषु दशैतानि निवेशयेत्'॥ इति स्मरणात्। देशो मध्यदेशादिः। स्थानं वाराणस्यादि। संनिवेशस्तत्रैव पूर्वापरदिग्विभागपरिच्छिन्नः सम्यङ्निविष्टो गृहक्षेत्रादिः। जातिरर्थिप्रत्यर्थिनोर्ब्राह्मणत्वादिः। संज्ञा च देवदत्तादिः। अधिवासः समीपदेशनिवासी जनः। प्रमाणं निवर्तनादि भूपरिमाणम्। क्षेत्रनाम शालिक्षेत्रं क्रमुकक्षेत्रं (३)कृष्णभूमः पाण्डुभूमः इति। पितुः पितामहस्य च नामार्थिप्रत्यर्थिनोः पूर्वेषां त्रयाणाम्। राज्ञां नामकीर्तनं चेति समासादीनां यस्मिन् व्यवहारे यावदुपयुज्यते तत्र तावल्लेखनीयमिति तात्पर्यार्थः। एवं पक्षलक्षणे स्थिते पक्षलक्षणरहितानां पक्षवदवभासमानानां पक्षाभासत्वं सिद्धमेवेति योगीश्वरेण न पृथक्पक्षाभासा उक्ताः। अन्यैस्तु विस्पष्टार्थ(४)मुक्ताः। 'अप्रसिद्धं नि(५)रावाधं निरर्थं निष्प्रयोजनम्। असाध्यं वा विरुद्धं वा पक्षाभासं विवर्जयेत्'॥ इति। अप्रसिद्धं मदीयं शशविषाणं गृहीत्वा न प्रयच्छतीत्यादि। निरावाधं अस्मद्गृहदीपप्रकाशेनायं स्वगृहे व्यवहरतीत्यादि। निरर्थं अभिधेयरहितं कचटतपजडदगवेत्यादि। निष्प्रयोजनं यथायं देवदत्तोऽस्मद्गृहसंनिधौ सुस्वरमधीत इत्यादि। असाध्यं यथाहं देवदत्तेन सभ्रूभङ्गमुपहसित इत्यादि। एतत्साधनासम्भवादसाध्यम्। अल्पकाल-

---

(१) इदमग्रे स्फुटीभविष्यत्यसाधारणव्यवहारमातृकाप्रकरणे।

(२) पितृ इति लुप्तषष्ठीकं पृथक्पदं, पितुरिति पाठो वा।

(३) कृष्णोदकपाण्ड्वत्यच्प्रत्ययो बहुव्रीहेः। (४) अत्र अप्रसिद्धादेः साधयितुमशक्यत्वादिनिराकरणम् इति ख. पुस्तके विशेषः। (५) पीडारहितमित्यर्थः।

त्वान्न साक्षिसम्भवो, लिखितं दूरतः, अल्पत्वान्न दिव्यमिति । विरुद्धं यथाहं मूकेन शप्त इत्यादि । (१)पुरराष्ट्रादिविरुद्धं (२)वा–'राज्ञा विवर्जितो यश्च यश्च पौरविरोधकृत् । राष्ट्रस्य वा समस्तस्य (३)प्रकृतीनां तथैव च ॥ अन्ये वा ये पुरग्राममहाजनविरोधिकाः । अनादेयास्तु ते सर्वे व्यवहाराः प्रकीर्तिताः' ॥ इति । (४)यत्तु–'अनेकपदसङ्कीर्णः पूर्वपक्षो न सिद्ध्यति' इति, (५)तत्र यद्यनेकवस्तुसङ्कीर्णं इत्युच्यते तदा न दोषः । मदीयमनेन हिरण्यं वासो रूपकादि वाऽपहृतमित्येवंविधस्यादुष्टत्वात् । ऋणादानादिपदसङ्करे पक्षाभास इति चेत्तदपि न । मदीया रूपका अनेन वृद्ध्या गृहीताः सुवर्णं चास्य हस्ते निक्षिप्तम् । मदीयं क्षेत्रमयमपहरतीत्यादीनां पक्षत्वमिष्यत एव । किन्तु क्रियाभेदात्क्रमेण व्यवहारो न युगपदित्येतावत् ॥ यथाह कात्यायनः–'(६)बहुप्रतिज्ञं यत्कार्यं व्यवहारे सुनिश्चितम् । कामं तदपि गृह्णीयाद्राजा तत्त्ववुभुत्सया' ॥ इति । तस्मादेनकपदसङ्कीर्णः पूर्वपक्षो युगपन्न सिद्ध्यतीति तस्यार्थः । अर्थि(७)ग्रहणात्पुत्रपित्रादिग्रहणं तेषामेकार्थत्वात् । नियुक्तस्यापि नियोगेनैव तदेकार्थत्वाक्षेपात् ॥ 'अर्थिना संनियुक्तो वा प्रत्यर्थिप्रहितोऽपि वा । यो यस्यार्थे विवदते तयोर्जयपराजयौ' ॥ इति स्मरणात् नियुक्तजयपराजयौ मूलस्वामिनोरेव । (८)एतच्च भूमौ फलके वा (९)पाण्डुलेखेन लिखित्वा (१०)आवापोद्धारेण विशोधितं पश्चात्पत्रे निवेशयेत् । 'पूर्वपक्षं (११)स्वभावोक्तं प्राड्विवाकोऽभिलेखयेत् । पाण्डुलेखेन फलके ततः पत्रे विशोधितम्' ॥ इति कात्यायनस्मरणात् । शोधनं च यावदुत्तरदर्शनं कर्तव्यं नातः परमनवस्थाप्रसङ्गात् । अत एव नारदेनोक्तम्–

---

(१) विनिगमनाभावादाह पुरेति ।

(२) अत्र 'एतेषां स्वभावेनैव निराकारणमिति न निराक्रियते' इति ख. पुस्तके विशेषः ।

(३) प्रकृतीनां जनानां नगरस्थानाम् । (४) अप्रसिद्धादीनां पक्षाभासत्वमिवानेकपदसङ्कीर्णपूर्वपक्षस्यापि तत्त्वमेव । अनेकैः पदैः सङ्कीर्णो यः पूर्वपक्षः प्रतिज्ञा सा न सिध्यति आभासरूपा भवतीति तदर्थप्रतीतिस्तन्निराकरोति यत्त्वित्यादिना । (५) तत्र पदशब्दः पद्यते ज्ञायते इति व्युत्पत्त्या किं वस्तुपर उत ऋणादानादिरूपव्यवहारविषयपरः । तत्र न तावदाद्ये पक्षाभासत्वमित्याह तत्रेति । (६) बहुप्रतिज्ञं बहुपूर्वपक्षम् ।

(७) पुत्रपौत्रादीनां क । (८) अर्थिवादितामित्यर्थः ।

(९) पाण्डुवति खडीति भाषाप्रसिद्धः । (१०) आवापेति न्यूनाधिक्यपरिहाराय प्रक्षेपनिष्कासनाभ्यामित्यर्थः । (११) सहजोक्तं न तु छलादिना ।

'शोधयेत्पूर्ववादं तु यावन्नोत्तरदर्शनम् । (१)अवष्टब्धस्योत्तरेण निवृत्तं शोधनं भवेत्' ॥ इति । पूर्वपक्षमशोधयित्वैव यदोत्तरं दापयन्ति सभ्यास्तदा रागाल्लोभादित्युक्तदण्डेन सभ्यान्दण्डयित्वा पुनः प्रतिज्ञापूर्वकं व्यवहारः प्रवर्तनीयो राज्ञेति ॥ ६ ॥

(वि० मि०) तदेवं भाषास्वरूपे लिखिते च राज्ञा प्रतिपाद्युत्तररूपद्वितीयव्यवहारपादे राज्ञः कृत्यमाह—

श्रुतार्थस्योत्तरं लेख्यं पूर्ववेदकसन्निधौ ॥

श्रुतो योग्यतयाऽवधारितोऽर्थो श्रुतार्थे भाषावाक्यं तत्सम्बन्धे उत्तरं प्रत्यर्थिकृत्यं पूर्ववेदकस्याऽर्थिनः सन्निधौ राज्ञा लेखनीयम् । श्रुतार्थस्येत्यभिधानाद्भाषाभासे मद्भिभक्तोऽप्ययमर्जितं धनमर्जकत्वान्मह्यं ददात्वित्यादिरूपमुत्तरं विनैव जय इति द्रष्टव्यम् । एते भाषालिखनानन्तरं प्रतिवादौ वादिसन्निधौ—

पत्रस्य व्यापकं सारमसन्दिग्धमनाकुलम् ।
अव्याख्यागम्यमित्येतदुत्तरं तद्विदो विदुः ॥

इति नारदादिलक्षितमुत्तरं वदेत् । ततो राजोत्तरं लेखयेदिति सिद्धम् । भाषावदुत्तरस्यापि दोषाः स्मृत्यन्तरेऽनुसन्धेयाः । उत्तरादानार्थं च प्रतिवादिनोऽवधिर्देयः । तदाह कात्यायनः—

श्रुतालेखयतोऽत्यर्थं प्रत्यर्थी कारणाद्यदि ।
कालं विवादं याचेत तस्य देयो न संशयः ॥
सद्यो वैकाहपञ्चाहौ त्र्यहं वा गुरुलाघवात् ।
लभेताऽसौ त्रिपक्षं वा सप्ताहं (२)वा ऋणादिषु ॥
सद्यःकृते सद्योवादसमानीते दिनं क्षिपेत् ।
षडाब्दिके त्रिरात्रं तु सप्ताहं द्वादशाब्दिके ॥
विंशत्यब्दे दशाहं तु मासार्द्धं वा लभेत सः ।
मासं त्रिंशत्समानीतं त्रिपक्षं परतो लभेत् ॥
कालं शक्तिं विदित्वा तु कार्याणां च बलाबलम् ।
अल्पं वा बहु वा कालं दद्यात्प्रत्यर्थिने प्रभुः ॥

यद्वक्ष्यति च कालोद्धृतः स्मृतः ? इति ।

---

(१) उत्तरेणावष्टब्धस्य प्रतिबद्धस्य पूर्ववादस्य शोधनं भवेदित्यर्थः ।
(२) चा-इत्युभयत्र पाठ ।

व्यासः—

राजदैवं ततो दोषास्तस्मिन् काले यदा न चेत् ।
अवधित्यागमात्रेण न भवेत्स पराजितः ॥
राजदैवकृतं दोषं साक्षिभिः प्रतिपादयेत् ।
भैक्ष्येण वर्तमानस्तु दण्ड्यो दाप्यस्तु तद्धनम् ॥

वादी तु भाषाकरणाय कालं न लभते । तदाह कात्यायनः—

यस्मात्कार्यसमारम्भश्चिरं तेन विनिश्चितः ।
तस्मान्न लभते कालमभियुक्तस्तु कालभाक् ॥

अस्यापवादमाह बृहस्पतिः—

अभियोक्ताऽप्रगल्भत्वाद्वक्तुं नोत्सहते यदि ।
तदा कालः प्रदातव्यः कार्यशास्त्र्यनुरूपतः ॥

यदा तु प्रतिवादी शास्त्रानुमतोपार्धिं विना उत्तरं न ददाति तदा भङ्गी भवति ।

अन्यवादी क्रियाद्वेषी नोपस्थायी निरुत्तरः ।
आहूतप्रपलायी च हीनः पञ्चविधः स्मृतः ॥

इति वचनात् ।

पूर्वपक्षे यथार्थं तु न दद्यादुत्तरं तु यः ।
अतिक्रान्ते सप्तरात्रे जितोऽसौ दण्डमर्हति ॥

इति कथनाच्च । तच्चोत्तरं चतुर्विधम् । तदाह कात्यायनः—

सत्यं मिथ्योत्तरं चैव प्रत्यवस्कन्दनं तथा ।
पूर्वन्यायविधिश्चैवमुत्तरं स्याच्चतुर्विधम् ॥

व्यासः—

साध्यस्य सत्यवचनं प्रतिपत्तिरुदाहृता ।
कारणं स्यादवस्कन्दो मिथ्या स्यात्साध्यनिन्हुतिः ॥

बृहस्पतिः—

आचारेणाऽवसन्नोऽपि पुनर्लेखयते यदि ।
सोऽभिधेयो जितः पूर्वं प्राङ्न्यायस्तु स उच्यते ॥

अत्राद्यं सम्प्रतिपत्तिरूपासिद्धसाधनापादकत्वेन सदुत्तरम् । न चैवं भाषितुर्निग्रहः, अस्मिन् तत्त्वनिर्णयार्थकविचारे तस्य निग्रहाप्रयोजकत्वात् । मिथ्योत्तरं तु चतुर्विधम् । तदाह व्यासः—

मिथ्यैतन्नाभिजानामि मम तत्र न सन्निधिः ।
अजातश्चाऽस्मि तत्काले इति मिथ्या चतुर्विधम् ॥

अत्र मिथ्यैतदिति कण्ठतो न जानामीत्यादि त्रयं अर्थतोऽपन्हवः। 'न जानामी'ति योग्यास्मरणप्रतिपादनद्वाराऽभावप्रतिपादकं, वाराणस्यां त्वया ऋणं गृहीतमिति भाषायां वाराणस्यां नाऽऽसमिति, चत्वारिंशे वर्षे त्वया गृहीतमिति भाषायां न हि तदा जात इति चावापोद्वापदर्शनेन भावबोधकं त्वत्पित्रा शतं सुवर्णानां गृहीतमिति भाषायां नाऽहं जानामीति तूत्तरप्रतिरूपकं न तु मिथ्योत्तरम्। न चैवमुत्तराभावाद्धारयितुर्जय इति वाच्यं, धर्मव्यवहारेण छलस्यावश्यनिरस्यत्वेन तत्र स्थापकेन ग्रहणस्याऽवश्यप्रमापणीयत्वात्। अत एव प्रकाशक्रयेणाष्टिकेनादत्तत्वादिकमपि प्रमापणीयमिति वदन्ति। अत्र च हेत्वसिद्धिर्भाषायां दोषः। कारणोत्तरं च त्रिविधं पूर्वाद्युक्तहेत्वपेक्षयाऽधिकबलं समबलं दुर्बलं च। तत्राद्यं यथा मया त्वत्तः शतं गृहीतमिति सत्यं परं तु परिशोधितमिति। अत्र च हृदि स्थितस्याग्निर्घातितत्वविशेषणस्याऽसिद्ध्या त्वसिद्धिर्भाषायां दोषः। एतदेव च प्रत्यवस्कन्दनमित्युच्यते।

अर्थिनाऽभिहितो योऽर्थः प्रत्यर्थी यदि तं तथा।
प्रपद्य कारणं ब्रूयात्प्रत्यवस्कन्दनं हि तत्॥

इति बृहस्पतिवचनात्। द्वितीयं यथा मदीयेयं भूः क्रमागतत्वादिति भाषायामिदमेवोत्तरम। इदं च सत्प्रतिपक्षपरम्। तृतीयं यथा मदीयेयं भूः तावत्समयमारभ्य स्वामिना ममाहितत्वादिति भाषायां पञ्चवर्षादारभ्य सा मदीया पञ्चमेऽब्दे तेन ममाहितत्वादित्युत्तरम्। इदमपि सत्प्रतिपक्षपरम्।

आधौ प्रतिग्रहे क्रीते पूर्वैव बलवत्तरा।

इति वचनाद् दुर्बलम्। अत्रापि छलनिरासार्थं क्रियादिप्रवृत्तिः। प्राङ्न्यायोत्तरं तु अस्मिन्नर्थे मयाऽयं जित इत्येवं रूपमिति दिक्।
अत्र कात्यायनः—

पक्षैकदेशे यत्सत्यमेकदेशे च कारणम्।
मिथ्या चैवैकदेशे स्यात्सङ्कीर्त्तदनुत्तरम्॥

तत्र केचित् शतग्रहणे भाषिते पञ्चाशतं धारयाम्येव पञ्चविंशतिः परिशोधिता पञ्चविंशतिर्न गृहीता इत्यादिकं नोत्तरमिति वाक्यार्थः।

अत एव—

न चैकस्मिन्विवादे तु क्रिया स्याद्वादिनोर्द्वयोः ।
न चाऽर्थसिद्धिरुभयोर्न चैकस्मिन् क्रियाद्वयम् ॥

इतिवचनमपि सङ्गच्छते । यथोक्तसङ्कीर्णोक्तस्य ग्राह्यतेति तत्सर्वं प्रसज्येतेति वदन्ति, तदयुक्तं न हीदृशो विषय एव न सम्भवति बहुशो दर्शनात् । नापीदृशमुत्तरमदेयं यथावस्थितोत्तरदानस्य निषेद्धुमशक्यत्वात् । न चेदृशोत्तरे पराजय एवेति । वादे सत्यङ्करणं मिथ्या च यदुत्तरं भवति तत्सङ्करादाभासरूपमिति वाक्यार्थः । शेषमेकदेशपदद्वयं चाऽनुवादः । नन्वेवं न चैतस्मिन्विवादे त्वित्याद्युदाहृतवचनस्य का गतिः। उच्यते एकस्मिन्विवादे एकावच्छेदेन न द्वयोः क्रियेत्यादिस्तदर्थः। यद्वा युगपत् क्रियाद्वयनिषेधपरं तद्वचनमिति संक्षेपः ॥

(मिता०) एवं शोधितपत्रारूढे पूर्वपक्षे किं कर्तव्यामित्यत आह-

श्रुतेति । श्रुतो भाषार्थो येन प्रत्यर्थिनाऽसौ श्रुतार्थः तस्योत्तरं पूर्वपक्षादु(१)त्तरत्र भवतीत्युत्तरं लेख्यं लेखनीयम् । पूर्ववेदकस्यार्थिनः संनिधौ समीपे उत्तरं च यत्पूर्वोक्तस्य निराकरणं तदुच्यते । यथाह-'पक्षस्य व्यापकं सारमसन्दिग्धमनाकुलम् । अव्याख्यागम्यमित्येतदुत्तरं तद्विदो विदुः' ॥ इति । पक्षस्य व्यापकं निराकरणसमर्थम् । सारं न्याय्यं न्यायादनपेतम् । असन्दिग्धं सन्देहरहितम् । अनाकुलं पूर्वापराविरुद्धम् । अव्याख्यागम्यं अप्रसिद्धपदप्रयोगेण दुः(२)श्लिष्टविभक्तिसमाससाध्या(३)हाराभिधानेन वा (४)अन्यदेशभाषाभिधानेन वा यत् व्याख्येयार्थं न भवति तत्सदुत्तरम् ॥ तच्च चतुर्विधम्-संप्रतिपत्तिर्मिथ्या प्र(५)त्यवस्कन्दनं पूर्वन्यायश्चेति । यथाह कात्यायनः-सत्यं मिथ्योत्तरं चैव प्रत्यवस्कन्दनं तथा । पूर्वन्यायविधिश्चैवमुत्तरं स्याच्चतुर्विधम्' ॥ इति । तत्र सत्योत्तरं यथा रूपकशतं मह्यं धारयतीत्युक्ते सत्यं धारयामीति । यथाह-'साध्यस्य सत्यवचनं प्रतिपत्ति(६)रुदाहृता' इति । मिथ्योत्तरं तु नाहं धारयामीति । तथा च कात्यायनः-"अभियुक्तोऽभियो(७)गस्य यदि कुर्या-

---

(१) उत्तरत्र अग्रे । (२) दुःश्लिष्टमसंबद्धम् । अश्लिष्टमिति पाठः । (३) अध्याहारेण सहितं साध्याहारम् । (४) अदेशभाषेति पाठः । (५) प्रत्यवस्कन्दनं कारणोत्तरम् ।
(६) प्रतिपत्तिः संप्रतिपत्तिः सत्योत्तरमित्यनर्थान्तरम् । (७) अभियुक्तस्य. ग ।

दपह्नवम् । मिथ्या तत्तु विजानीयादुत्तरं व्यवहारतः' ॥ इति ॥ तच्च मिथ्योत्तरं चतुर्विधम्-'मिथ्यैतन्नाभिजानामि तदा तत्र न संनिधिः । अज्ञातश्चास्मि तत्काल इति मिथ्या चतुर्विधम्' ॥ इति । प्रत्यवस्कन्दनं नाम सत्यं गृहीतं प्रतिदत्तं प्रतिग्रहेण लब्धमिति वा । यथाह नारदः-'अर्थिना (१)लेखितो योऽर्थः प्रत्यर्थी यदि तं त(२)था । प्रपद्य कारणं ब्रूयात्प्रत्यवस्कन्दनं स्मृतम्' ॥ इति । प्राङ्न्यायोत्तरं तु यत्राभियुक्त एवं ब्रूयादस्मिन्नर्थेऽनेनाहमभियुक्तस्तत्र चायं व्यवहारमार्गेण पराजित इति । उक्तं च कात्यायनेन-(३)'आचारेणावसन्नोऽपि पुनर्लेखयते यदि । सोऽभिधेयो जितः पूर्वं प्राङ्न्यायस्तु स उच्यते' इति । एवमुत्तरलक्षणे स्थिते उत्तरलक्षणरहितानामुत्तरवदवभासमानानामुत्तराभासत्वमर्थसिद्धम् । स्पष्टीकृतं च स्मृत्यन्तरे-'सन्दिग्धमन्यत्प्रकृतादत्यल्पमतिभूरि च । पक्षैकदेशव्याप्यन्यत्तथा नैवोत्तरं भवेत् ॥ यच्चास्तपदमव्यापि निगूढार्थं तथाकुलम् । व्याख्यागम्यमसारं च नोत्तरं स्वार्थसिद्धये' इति । तत्र सन्दिग्धं-सुवर्णशतमनेन गृहीतमित्युक्ते सत्यं गृहीतं सुवर्णशतं वेति । प्रकृतादन्यत्-यथा-सुवर्णशताभियोगे पणशतं धारयामीति । अत्यल्पं-सुवर्णशताभियोगे (४)पञ्चशतं धारयामीति । अतिभूरि-सुवर्णशताभियोगे द्विशतं धारयामीति । पक्षैकदेशव्यापि-हिरण्यवस्त्राद्यभियोगे हिरण्यं गृहीतं (५)नान्यादिति । (६)व्यस्तपदं-ऋणादानाभियोगे पदान्तरेणोत्तरम्, यथा सुवर्णशताभियोगे अनेनाहं ताडित इति । अव्यापि-देशस्थानादिविशेषणाव्यापि, यथा म(७)ध्यदेशे वाराणस्यां पूर्वस्यां दिशि क्षेत्रमनेनापहृतमिति पूर्वपक्षे लिखि-(८)ते, क्षेत्रमपहृतमिति । निगूढार्थं यथा-सुवर्णशताभियोगे किमहमेवास्मै धारयामीत्यत्र ध्व(९)निना प्राङ्विवाकः सभ्यो वा अर्थी वा अन्यस्मै धारयतीति सूचयतीति निगूढार्थम् । आकुलं पूर्वापरविरुद्धम्, यथा-सुवर्णशताभियोगे कृते सत्यं गृहीतं न धारयामीति ।

---

(१) ष्यन्तस्येदं रूपम् । (२) तथा प्रपद्य तथैवाङ्गीकृत्येत्यर्थः ।
(३) व्यवहारेण पराजितोऽपि । (४) अर्धन्यूनतयात्यल्पत्वमस्य ।
(५) अन्यत् पक्षैकदेशव्यापि चेत्यर्थः । (६) व्यस्तपदं असंबद्धपदकम् ।
(७) विन्ध्यहिमाचलयोर्मध्यं मध्यदेशः । (८) अन्तर्भावितण्यर्थमिदम् ।
(९) ध्वनिना किमादिबोध्येन ।

व्याख्यागम्यं—दुःश्लिष्टविभक्तिसमाससाध्याहाराभिधानेन व्याख्यागम्यम्, अन्यदेशभाषाभिधानेन वा । यथा सुवर्णशतविषये पितृऋणाभियोगे गृहीतशतवचनात् सुवर्णानां पितुर्न जानामीति । अत्र गृहीतशतस्य पितुर्वचनात्सुवर्णानां शतं गृहीतामिति न जानामीति । असारं—न्यायविरुद्धम्, यथा-सुवर्णशतमनेन वृद्ध्या गृहीतं वृद्धिरेव दत्ता न मूलमित्यभियोगे सत्यं वृद्धिर्दत्ता न मूलं गृहीतमिति । उत्तरमित्येकवचननिर्देशादुत्तराणां सङ्करो निरस्तः। यथाह कात्यायनः—'पक्षैकदेशे यत्सत्यमेकदेशे च कारणम्। मिथ्या चैवैकदेशे च सङ्करात्तदनुत्तरम्' ॥ इति । अनुत्तरत्वे च कारणं तेनैवोक्तम्—'न चैकस्मिन्विवादे तु क्रिया स्याद्वादिनोर्द्वयोः । न चार्थसिद्धिरुभयोर्न चैकत्र क्रियाद्वयम्' ॥ इति । मिथ्याकारणोत्तरयोः सङ्करे अर्थिप्रत्यर्थिनोर्द्वयोरपि क्रिया प्राप्नोति, 'मिथ्या (१)क्रिया पूर्ववादे (२)कारणे प्रतिवादिनि' इति स्मरणात्। तदुभयमेकस्मिन्व्यवहारे विरुद्धम् । सुवर्णं रूपकशतं चानेन गृहीतामित्यभियोगे सुवर्णं न गृहीतं रूपकशतं गृहीतं प्रतिदत्तं चेति । (३)कारणप्राङ्न्यायसङ्करे तु प्रत्यर्थिन एव क्रियाद्वयम्—(४)'प्राङ्न्यायकारणोक्तौ तु प्रत्यर्थी निर्दिशेत्क्रियाम्' इति । यथा-सुवर्णं गृहीतं प्रतिदत्तं (५)रूपके व्यवहारमार्गेण पराजित इति । (६)अत्र च प्राङ्न्याये जयपत्रेण वा प्राङ्न्यायदर्शिभिर्वा (७)भावयितव्यम्। (८)कारणोक्तौ तु साक्षिलेख्या(९)दिभिर्भावयितव्यमिति विरोधः । एवमुत्तरत्र(१०)यसङ्करेऽपि द्रष्टव्यम्। यथाऽनेन सुवर्णं रूपकशतं वस्त्राणि च गृहीतानीत्यभियोगे सत्यं सुवर्णं गृहीतं प्रति(११)दत्तं रूपकशतं न गृहीतं वस्त्रविषये तु पूर्व-

---

(१) न वादिद्वयपरत्वमिति सूचयितुं मिथ्येति। मिथ्योत्तरे इत्यर्थः । पूर्ववादे कर्मण्यण् पूर्ववादिनीत्यर्थः।

(२) कारणे कारणोत्तरे। (३) तयोर्मिथः संकरे त्वित्यर्थः।

(४) तयोरुक्तावित्यर्थः। नेदं प्रत्येकपरम्। करणांशे 'कारणे प्रतिवादिनि' इत्यनेन सिद्धत्वात्। तस्मात्सांकर्यपरमेवेदम्। अत एव समासनिर्देशसंगतिरपि।

(५) रूपकशते ग। (६) द्वितीयसंकरे त्वित्यर्थः।

(७) साधयितव्यमेतैः कृत्वा। (८) कारणोत्तरे तु ग।

(९) आदिना दिव्यपरिग्रहः। (१०) उत्तरत्रयेति मिथ्या-कारण-प्राङ्न्यायरूपे।

(११) प्रतिदास्यामि ग।

न्यायेन पराजित इति। एवं (१)चतुःसङ्करेऽपि। एतेषां चानुत्तरत्वं यौगपद्येन तस्यांशस्य तेन तेन विनाऽसिद्धेः। (२)क्रमणोत्तरत्वमेव। (३)क्रमश्चार्थिनः प्रत्यर्थिनः सभ्यानां चेच्छया भवति। (४)यत्र पुनरुभ(५)योः सङ्करस्तत्र यस्य प्रभूतार्थविषयत्वं (६)तत्क्रियोपादानेन पूर्वं व्यवहारः प्रवर्तयितव्यः पश्चादल्पविषयोत्तरापादानेन च व्यवहारो द्रष्टव्यः। (७)यत्र च संप्रतिपत्तेरुत्तरान्तरस्य च सङ्करस्तत्रोत्तरान्तरोपादानेन व्यवहारो द्रष्टव्यः। संप्रतिपत्तौ क्रियाभावात्। यथा हारीतेन-'मिथ्योत्तरं कारणं च स्यातामेकत्र चेदुभे। सत्यं वापि सहान्येन तत्र ग्राह्यं किमुत्तरम्'॥ इत्युक्त्वोक्तम्-(८)'यत्प्रभूतार्थविषयं यत्र वा स्यात्क्रियाफलम्। उत्तरं तत्र तज्ज्ञेयमसंकीर्णमतोऽन्यथा'॥ संकीर्णं भवतीति शेषः। (९)शेषापेक्षया ऐच्छि(१०)कक्रमं भवतीत्यर्थः। तत्र प्रभूतार्थं यथा-अनेन सुवर्णं रूपकशतं वस्त्राणि च गृहीतानीत्यभियोगे सुवर्णं रूपकशतं च न गृहीतं वस्त्राणि तु गृहीतानि प्रतिदत्तानि चेति। अत्र मिथ्योत्तरस्य प्रभूतविषयत्वादर्थिनः क्रियामादाय प्रथमं व्यवहारः प्रवर्तयितव्यः पश्चाद्वस्त्रविषयो व्यवहारः। एवं मिथ्याप्राङ्न्यायसङ्करे कारणप्राङ्न्यायसङ्करे च योजनीयम्। तथा तस्मिन्नेवाभियोगे सत्यं सुवर्णं रूपकशतं च गृहीतं प्रति दास्यामि वस्त्राणि तु न गृहीतानि गृहीतानि प्रतिदत्तानीति वा वस्त्रविषये पूर्वं पराजित इति चोत्तरे संप्रतिपत्तेर्भूरिविषयत्वेऽपि तत्र क्रियाभावान्मिथ्योत्तरक्रियामादाय व्यवहारः प्रवर्तयितव्यः। (११)यत्र तु मिथ्याकारणोत्तरयोः कृत्स्नपक्षव्यापित्वम्। यथा-(१२)शृङ्गग्राहिकया काश्चि(१३)द्वदति.

---

(१) चतुःसंकरेति। यथा अनेन सुवर्णं रूप्यकशतं वस्त्राणि धान्यं च गृहीतमित्यभियोगे सुवर्णं धारयामि रूपकशतं न गृहीतं वस्त्राणि प्रतिग्रहेण लब्धानि धान्यविषये पूर्वन्यायेन पराजित इति। एवं मिथ्याप्राङ्न्यायसंकरेऽपि द्रष्टव्यम्।

(२) क्रमेण त्वित्यर्थः। (३) चेन प्राङ्विवाकादेः समुच्चयः।

(४) यत्र त्वित्यर्थः। (५) मिथ्याकारणोत्तरयोः।

(६) तत्साधकक्रियाग्रहणेन। (७) सत्योत्तरसंकरस्य पूर्वमनुपन्यासे बीजं ध्वनयन् तत्र नियामकान्तरमाह यत्र चेति।

(८) यत् उत्तरम्। (९) अपेक्षाक्रमं भवतीत्यर्थः ग।

(१०) ऐच्छिकः क्रमो भवतीत्यर्थः ख।

(११) संकीर्णोत्तरस्य यौगपद्येन सर्वथाऽनुत्तरत्वे प्राप्ते क्वचित्प्रतिप्रसवमाह यत्र त्विति।

(१२) तन्न्यायेनेत्यर्थः। (१३) काश्चित् वादी।

इयं गौर्मदीया असुकास्मिन्काले नष्टा अद्यास्य गृहे दृष्टेति । (१)अन्यस्तु मिथ्यैतत्,(२)प्रदर्शितकालात्पूर्वमेवास्मद्गृहे स्थिता मम गृहं जातेति वदति । इदं तावत्पक्षनिराकरणसमर्थत्वान्नानुत्तरम् । नापि मिथ्यैव कारणोपन्यासात् । नापि कारणम्, एकदेशस्याप्यभ्युपगमाभावात् । तस्मात्स(३)कारणं मिथ्योत्तरमिदम् । अत्र च प्रतिवादिनः क्रिया, 'कारणे प्रतिवादिनि'इति वचनात् । (४)ननु 'मिथ्या क्रिया पूर्ववादे' इति पूर्ववादिनः कस्मात्क्रिया न भवति । तस्य शुद्धमिथ्याविषयत्वात् । कारणे प्रतिवादिनीत्येतदपि कस्माच्छुद्धकारणविषयं न भवति । नैतत् । सर्वस्यापि कारणोत्तरस्य मिथ्यासहचरितरूपत्वाच्छुद्धकारणोत्तरस्याभावात् । प्रसिद्ध(५)कारणोत्तरे प्रतिज्ञातार्थैकदेशस्याभ्युपगमे नैकदेशस्य मिथ्यात्वम्, यथा-सत्यं रूपकशतं गृहीतं न धारयामि प्रतिदत्तत्वादिति । प्रकृतोदाहरणे तु प्रतिज्ञातार्थैकदेशस्याप्यभ्युपगमो नास्तीति विशेषः । एतच्च हारीतेन स्पष्टमुक्तम्—'मिथ्याकारणयोर्वापि ग्राह्यं कारणमुत्तरम्' इति । यत्र मिथ्याप्राङ्न्याययोः पक्ष्यापित्वम्, यथा-रूपकशतं धारयतीत्यभियोगे मिथ्यैतदास्मिन्नर्थे पूर्वमयं पराजित इति । अत्रापि प्रतिवादिन एव क्रिया—'प्राङ्न्यायकारणोक्तौ तु प्रत्यर्थी निर्दिशेत्क्रियाम्' इति वचनात्; शुद्धस्य प्राङ्न्यायस्याभावादनुत्तरत्वप्रसङ्गात्, सं(६)प्रतिपत्तेरपि साध्यत्वेनोपदिष्टस्य पक्षस्य सिद्धत्वोपन्यासेन साध्यत्वनिराकरणत्वादेवोत्तरत्वम् । यदा तु कारणप्राङ्न्यायसङ्करः, यथा-शतमनेन गृहीतमित्यभियुक्तः प्रतिवदति सत्यं गृहीतं प्रतिदत्तं चेत्यस्मिन्नेवार्थे प्राङ्न्यायेनायं पराजित इति प्रतिवादिनो यथारुचीति न कचिद्वादिप्रतिवादिनोरेकस्मिन्व्यवहारे क्रियाद्वयप्रसङ्ग इति निर्णयः ॥

---

(१) अन्यः प्रतिवादी । (२) एतत्प्रदर्शित ख० ।

(३) अत्र कारणस्याप्राधान्यं मिथ्योत्तरस्य प्राधान्यं तस्य नदुपपादकस्यापि सम्भवात् । अत एव तत्र सहयोगे तृतीया कृता ।

(४) प्रतिवादिना तस्यैवोक्तत्वमभिप्रेत्य प्राधान्यादरेण शङ्कते नन्विति ।

(५) सत्यं गृहीतं प्रतिदत्तं चेत्येवंरूपे प्रागुक्ते । (६) सत्यस्यापि ।

(वी० मि०) राजकृत्यस्य निर्णयस्य क्रियामूलकत्वात्तन्निर्देशस्य च वादिकृत्यत्वात्तमधिकृत्य तृतीयं क्रियापादमाह—

ततोऽर्थी लेखयेत्सद्यः प्रतिज्ञातार्थसाध(१)कम् ॥ ७ ॥

ततः सदुत्तरे प्रतिवादिकृते लेखिते च राज्ञाऽर्थी चाऽभिहितार्थप्रमापणार्थी यथायथं वादी प्रतिवादी वा प्रतिज्ञातस्य स्वयं समभिहितस्याऽर्थस्य साधकं साक्षिलिखितादिकं स्वयमुपन्यस्य राजनियुक्तद्वारा लेखयेत् । सद्य इत्यनेन प्रमाणोपन्यासे न विलम्बः कार्य इत्युक्तम् । तदाह कात्यायनः—

न कालहरणं कार्यं राज्ञा साक्षिप्रमापणे ।
महान्दोषो भवेत्कालाद्धर्मव्यावृत्तिलक्षणः ॥

तच्च साधकं द्विविधं मानुषं दैवं च । यदाह बृहस्पतिः—

द्विप्रकारा क्रिया प्रोक्ता मानुषी दैविकी तथा ।
एकैकाऽनेकधा भिन्ना ऋषिभिस्तत्त्ववादिभिः ॥
साक्षिलेखानुमानं च मानुषी त्रिविधा स्मृता ।
घटाद्या धर्म(२)जाता च दैविकी नवधा स्मृता ॥

क्रिया प्रमाणं, एतत्प्रपञ्च उपरिष्टात् । सा च क्रिया सम्प्रतिपन्नयोरेव नास्त्येव, उत्तरान्तरे तु व्यवस्थामाह व्यासः—

प्राङ्न्याये कारणोक्तौ तु प्रत्यर्थी साधयेत्क्रियाम् ।
मिथ्योत्तरे पूर्ववादी प्रतिपत्तौ न भावयेत् ॥

अत्र कारणोक्तिशब्देन बलवत्कारणोत्तरमभिहितम् । यद्वक्ष्यति—

पूर्वपक्षेऽधरीभूते भवन्त्युत्तरवादिनः ।

इति । कात्यायनश्च—

प्रपद्य कारणं पूर्वमन्यद्गुरुतरं यदि ।
प्रतिवाद्यगतं ब्रूयात्साध्यते तद्धिनेतरत् ॥

धार्यमाणत्वस्य कारणमृणग्रहणं पूर्वं भाषितं प्रतिपद्य स्वीकृत्य गुरुतरमन्यत्परिशोधनादिकं प्रतिवाक्यगतं यदि ब्रूयात्तदा तत्साधकव्यते न त्वितरत् समयलमलपवलं चेत्यर्थः । मिथ्योत्तरे तु लौकिकी क्रिया पूर्ववादिनः । दैविकीति दिव्यशपथोभयरूपा प्रतिवादिन एव ।

न काश्चिद्दभियोक्तारं पुनर्दिव्ये नियोजयेत् ।
अभियुक्ताय दातव्यं दिव्यं दिव्यविशारदैः ॥

---

(१) साधनमिति मुद्रितपुस्तके पाठः । (२) दाता—इति ख० पु० पा० ।

इति वाक्ये पूर्वार्द्धेनाऽभियोक्तुस्तन्निषेधेऽर्थतो नियोज्यस्य तद्विधावुत्तरार्द्धेन तन्नियमनात् । सिद्धे सत्यारम्भस्य नियमार्थत्वादिति मिश्राः । साम्प्रदायिकास्तु अभियोगपदेनाऽत्र चौर्यमारणाद्यभिशापाभियोगो विवक्षित इति । ऋणादौ मिथ्योत्तरे दैविक्यपि क्रिया पूर्ववादिन एवेति वदन्ति ॥ ७ ॥

(मिता०) एवमुत्तरे पत्रे नि(१)वेशिते साध्यसिद्धेः साधनायत्तत्वात्साधननिर्देशं कः कुर्यादित्यपेक्षित आह—

तत इति । उत्तरानन्तर(२)मर्थी साध्यवान् सद्य एवानन्तरमेव लेखयेत् । प्रतिज्ञातः साध्यः स चासावर्थश्चेति प्रतिज्ञातार्थः तस्य साधनं साध्यतेऽनेनेति साधनं प्र(३)माणम् । अत्र सद्यो लेखयेदिति वदतोत्तराभिधाने कालविलम्बनमप्यङ्गीकृतमिति गम्यते । तच्चोत्तरत्र विवेचयिष्यते । अर्थी प्रतिज्ञातार्थसाधनं लेखयेदिति वदता यस्य साध्यमस्ति स प्रतिज्ञातार्थसाधनं लेखयेदित्युक्तम्, अतश्च प्राङ्न्यायोत्तरे प्राङ्न्यायस्यैव साध्यत्वात्प्रत्यर्थ्यैवार्थी जात इति स एव साधनं लेखयेत् । कारणोत्तरेऽपि कारणस्यैव साध्यत्वात्कारणवाद्येवार्थीति स एव लेखयेत् । मिथ्योत्तरे तु पूर्ववाद्येवार्थी स एव निर्दिशेत्(४) । ततोऽर्थी लेखयेदिति वदता (५)अर्थ्येव लेखयेन्नान्य इत्युक्तम् । अतश्च संप्रतिपत्त्युत्तरे साध्याभावेन भाषोत्तरवादिनोर्द्वयोरप्यर्थित्वाभावात्साधननिर्देश एव नास्तीति ता(६)वतैव व्यवहारः परिसमाप्यत इति गम्यते । एतदेव हारीतेन स्पष्टमुक्तम्—'प्राङ्न्यायकारणोक्तौ तु प्रत्यर्थी निर्दिशेत्क्रियाम् । मिथ्योक्तौ पूर्ववादी तु प्रतिपत्तौ न सा भवेत्' ॥ इति ॥ ७ ॥

(वी० मि०) अर्थनिर्णयाख्यं चतुर्थपादमाह—

तत्सिद्धौ सिद्धिमाप्नोति विपरीतमतोऽन्यथा ॥

तस्य उपन्यस्तस्य साक्ष्यादिप्रमाणस्य सिद्धौ निर्वाहणे सिद्धिं विजयमन्यथाऽनिर्वाहणे विपरीतमविजयमाप्नोतीत्यर्थः । विपरीतं तु भङ्गमिति मिताक्षरा, तच्चिन्त्यम् ॥

---

(१) निवेशिते लेखिते । (२) अर्थ्यत इत्यर्थः साध्यं स यस्यास्तीत्यर्थी ।
(३) प्रमाणं लिखितादि वक्ष्यमाणम् । (४) निर्दिशेल्लेखयेत् ।
(५) अर्थ्येवेति आक्षेपादेव कर्तृलाभे तदुक्तिर्नियमार्थेति भाव. । (६) तादृशोत्तरदानेनैव ।

(मिता०) त(१)तः किमित्यत आह—

तदिति । तस्य साधनस्य प्रमाणस्य वक्ष्यमाणलिखितसाक्ष्यादिलक्षणस्य सिद्धौ निर्वृत्तौ सिद्धिं साध्यस्य जयलक्षणां प्राप्नोति । अतोऽस्मात्प्रकारादन्यथा प्रकारान्तरेण साधनासिद्धौ विपरीतं साध्यस्यासिद्धिं पराजयलक्षणामाप्नोतीति सम्बन्धः ॥

(वी० मि०) उक्तं व्यवहारशरीरमुपसंहरति—

चतुष्पाद्व्यवहारोऽयं विवादेषूपदर्शितः ॥ ८ ॥

विवादेषु ऋणादानादिषु विचारविषयेषु अयमेवंविधो भाषादिसम्पन्नः, अत एव चतुष्पात्तु भागचतुष्टयवान् व्यवहारपदार्थ उपदर्शित उदाहृतः । उदाहरणं च कस्यचिदेव व्यवहारस्य । तेन—

मिथ्योक्तौ स चतुष्पादः प्रत्यवस्कन्दने तथा ।
प्राङ्न्यायेन स विज्ञेयो द्विपात्संप्रतिपत्तिषु ॥

इति बृहस्पत्युक्तद्विपाद्व्यवहारानभिधानेऽपि न क्षतिः । सम्प्रतिपत्तिष्विति उत्तरानर्हभाषायामित्यपि द्रष्टव्यम् । यद्यपि सम्प्रतिपत्तावपि निर्णयमादाय पादत्रयं तथापि तत्र निर्णयकरणाय पृथक्प्रवृत्त्यभावा द्विपादिति युक्तमुक्तम् । उत्तरप्रतिरूपकाज्ञानाद्यभिधाने तु तस्योत्तरप्रतिनिवृत्तत्वात्तमादायैव चतुष्पादत्वमिति मन्तव्यम् ॥ ८ ॥

(मिता०) एवं व्यवहाररूपमभिधायोपसंहरति—

चतुष्पादिति । व्यवहारान्नृपः पश्येदित्युक्तो व्यवहारः सोऽयमित्थं चतुष्पाच्चतुरंशकल्पनया विवादेषु ऋणादानादिषूपदर्शितो वर्णितः । तत्र प्रत्यर्थिनोऽग्रतो लेख्यमिति भाषापादः प्रथमः । श्रुतार्थस्योत्तरं लेख्यमित्युत्तरपादो द्वितीयः । ततोऽर्थी लेखयेत्सद्य इति क्रियापादस्तृतीयः । तत्सिद्धौ सिद्धिमाप्नोतीति साध्यसिद्धिपादश्चतुर्थः । यथोक्तम्-'परस्परं मनुष्याणां स्वार्थविप्रतिपत्तिषु । वाक्यन्यायाद्यवस्थानं व्यवहार उदाहृतः ॥ भाषोत्तरक्रियासाध्यसिद्धिभिः क्रमवृत्तिभिः । आख्यि(२)तचतुरंशस्तु चतुष्पादभि(३)धीयते' । इति । संप्रतिपत्त्युत्तरे तु साधनानिर्देशाद्भागार्थस्यासाध्यत्वाच्च न साध्यसिद्धिल(४)क्षणः पादोऽस्तीति द्विपात्त्वमेव । उत्तराभिधानानन्तरं

---

(१) ततः साधनलेखनोत्तरम् । (२) मुख्यपादत्वासम्भवादाह चतुरंशेति ।
(३) अभिधीयते ऋणादानादिषु वक्ष्यमाणेषु । (४) लक्षणोपि इति पाठः ।

सभ्यानामर्थिप्रत्यर्थिनोः कस्य क्रिया स्यादिति परामर्शलक्षणस्य प्रत्या(१)कलितस्य योगीश्वरेण व्यवहारपादत्वेनानभिधानात् व्यवहर्तुः सम्बन्धाभावाच्च न व्यवहारपादत्वमिति स्थितम् ॥ ८ ॥

इति साधारणव्यवहारमातृकाप्रकरणम् ।

(वी० मि०) वादिनोऽधिकृत्यमाह—

अभियोगमनिस्तीर्य नैनं प्रत्यभियोजयेत् ॥
अभियुक्तं च नान्येन नोक्तं विप्रकृतिं नयेत् ॥ ९ ॥
कुर्यात्प्रत्यभियोगे च कलहे साहसेषु च ॥

अभियोगमर्थिकृतमाक्षेपमनिस्तीर्य जयपराजयान्यतराऽवधारणेऽनपाकृत्यैनमर्थिनं प्रतिवादी न प्रत्यभियोजयेत् न स्वकृतेनाऽभियोगान्तरेण योजयेत् । अन्येनाऽऽदौ कृताक्षेपं तदपाकरणपर्यन्तं प्रतिवादिनमर्थी नाऽभियोजयेत् । आवेदितमर्थं विप्रकृतिं वैपरीत्यं न नयेदन्यथा न लेखयेदर्थी प्रत्यर्थी च । नैनं प्रत्यभियोजयेदित्यत्र प्रतिप्रसवकलहे वाक्पारुष्ये साहसेषु स्त्रीसङ्ग्रहणमनुष्यमारणादिषु चकारात् स्तेये दण्डपारुष्ये च प्रत्यभियोगं कुर्यात् । अनेनाहं शप्तोऽनेनाहं ताडित इत्यभियोगस्योत्तरमहमप्यनेन शप्तोऽहमप्यनेन ताडित इति ब्रूयादित्यर्थः । प्रथमचकारेण प्रगल्भादिसमुच्चयः ॥

(वी० मि०) अर्थिप्रत्यर्थिनोः कृत्यमुक्त्वा ससभ्यस्य सभापतेः कृत्यमाह—

उभयोः प्रतिभूर्ग्राह्यः समर्थः कार्यनिर्णये ॥ १० ॥

न्यायार्थमुपस्थितयोरर्थिप्रत्यर्थिनोः कारणप्रवेशे प्रतिभूर्ग्राह्यः । अर्थिनोऽपि दण्डभयात्पलायनसम्भवात् । कीदृशः । निर्णयस्य कार्ये साधितधनस्य दण्डस्य च दाने समर्थः । आहिताग्न्यादित्वात्कार्यशब्दस्य पूर्वनिपातः । यद्वा कार्ये कर्तव्ये निर्णये प्रतिभूर्ग्राह्यः । पाठिकक्रमेण प्रकृतनिर्णयानन्तरं प्रतिभूग्रहणं मा प्रसाक्षीदिति कार्यनिर्णयः इत्युक्तमिति । अथवा कार्य्यस्य विवादास्पदीभूतस्य ऋणादानादेर्निर्णयार्थं प्रतिभूर्ग्राह्यः । वादिपलायने निर्णयासम्भवादित्यर्थः । प्रतिभुवस्त्वभावे कात्यायनः—

---

(१) प्रत्याकलितस्य पौनःपुन्येन विचारणस्येत्यर्थः ॥

अथ चेत्प्रतिभूर्नास्ति वादयोग्यस्य वादिनः ।
स रक्षितो दिनस्यान्ते दद्यात् दूताय वेतनम् ॥
दूतो राजप्रैष्यः तद्धर्त्ता ॥ ९-१० ॥

(मिता०) एवं सर्वव्यवहारोपयोगिनीं व्यवहारमातृकामभिधायाधुना क्वचिद्व्यवहारविशेषे काञ्चिद्विशेषं दर्शयितुमाह--

अभियोगमिति । (१)अभियुज्यत इति अभियोगोऽपराधः तमभियोगमनिस्तीर्याऽपरिहृत्य, एवमभियोक्तारं न प्रत्यभियोजयेत् अपराधेन न संयोजयेत् । यद्यपि (२)प्रत्यवस्कन्दनं प्रत्यभियोगरूपं तथापि स्वापराधपरिहारात्मकत्वान्नास्य प्रतिषेधविषयत्वम् । अतः स्वाभियोगानुपर्दनरूपमस्य प्रत्यभियोगस्यायं निषेधः । इदं प्रत्यर्थिनमधिकृत्योक्तम् ॥

(मिता०) अथ अर्थिनं प्रत्याह--

अभियुक्तमिति । अभियुक्तं च नान्येनेति । अन्येनाभियुक्तमनिस्तीर्णाभियोगमन्योऽर्थी नाभियोजयेत् । किं च-उक्तमावेदनसमये यदुक्तं तद्विप्रकृतिं विरुद्धभावं न नयेन्न प्रापयेत् । एतदुक्तं भवति-यद्वस्तु येन रूपेणावेदनसमये निवेदितं तद्वस्तु (३)तथैव भाषाकालेऽपि लेखनीयं नान्यथेति ॥ ननु—'प्रत्यर्थिनोऽग्रतो लेख्यं यथावेदितमर्थिना' इत्यत्रैवेदमुक्तं किमर्थं पुनरुच्यते नोक्तं विप्रकृतिं नयेदिति । उच्यते—'यथाऽऽवेदितमर्थिना' इत्यनेनाऽऽवेदनसमये यद्वस्तु निवेदितं तदेव भाषासमयेऽपि तथैव लेखनीयम् ।(४)एकस्मिन्नपि(५)पदे न वस्त्वन्तरमित्युक्तम् । यथाऽनेन रूपकशतं वृद्ध्या गृहीतमित्यावेदनसमये प्रतिपाद्य प्रत्यर्थिसंनिधौ भाषासमये वस्त्रशतं वृद्ध्या गृहीतमिति न वक्तव्यम् । तथा सति (६)पदान्तरागमनेऽपि वस्त्वन्तरगमनाद्धीनवादी दण्ड्यः स्यादिति । नोक्तं विप्रकृतिं नयेदित्यनेनैकवस्तुत्वेऽपि पदान्तरगमनं निषिध्यते । यथा रूपकशतं वृद्ध्या गृहीत्वाऽयं न प्रयच्छतीत्यावेदनकालेऽभिधाय भाषाकाले रूपकशतं बलादपहृतवानिति व-

---

(१) अभियुज्यते दोषविषयीक्रियतेऽनेनेति शेष ।

(२) प्रत्यं गृहीतं प्रतिदत्तं चेति कारणोत्तरस्य अनेन दत्तं स्थितं मया पुनर्दत्तमित्येवं प्रत्यभियोगरूपत्वमित्यर्थः । (३) तथैवेति । अन्यथाऽन्यथावादित्वेन भङ्गप्रसङ्गात् ।

(४) ऋणादानादिव्यवहारविषये । (५) अत्र प्रकरणे पदशब्दो विषयवाची ।

(६) विषयान्तरं प्रत्यगमनेऽपीत्यर्थः ।

दतीति। तत्र वस्त्वन्तरगमनं निषिद्धमिह तु पदान्तरगमनं निषिध्यत इति न पौनरुक्त्यम्। एतदेव स्पष्टीकृतं नारदेन-'पूर्वपादं परित्यज्य योऽन्यमालम्बते पुनः। (१)पदसंक्रमणाज्ज्ञेयो हीनवादी स वै नरः' ॥ इति। हीनवादी दण्ड्यो भवति न प्रकृतादर्थाद्धीयते। अतः प्रत्यर्थिनोऽर्थिनश्च प्रमादपरिहारार्थमेवायमभियोगमनिस्तीर्यैत्याद्युपदेशो न प्रकृतार्थासि(२)द्ध्यसिद्धिविषयः। अत एव वक्ष्यति—'छलं निरस्य (३)भूतेन व्यवहारान्नयेन्नृपः' इति। (४)एतच्चार्थव्यवहारे द्रष्टव्यम्। (५)मन्युकृते तु व्यवहारे प्रमादाभिधाने प्रकृतादपि व्यवहाराद्धीयत एव। यथाह नारदः—'सर्वेष्वर्थविवादेषु वाक्छले नावसीदति। परस्त्रीभूम्यृणादाने शास्योऽप्यर्थान्न हीयते' ॥ इति। अस्यार्थः—सर्वेष्वर्थविवादेषु न मन्युकृतेषु वाक्छले प्रमादाभिधानेऽपि नावसीदति न पराजीयते न प्रकृतादर्थाद्धीयत इत्यर्थः। अत्रोदाहरणं परस्त्रीत्यादि। परस्त्रीभूम्यृणादाने प्रमादाभिधानेन दण्ड्योऽपि यथा प्रकृतादर्थान्न हीयते एवं सर्वेष्वर्थविवादेष्विति। (६)अर्थविवादग्रहणान्मन्युकृतविवादेषु प्रमादाभिधाने प्रकृतादप्यर्थाद्धीयत इति गम्यते। यथाऽहमनेन शिरसि पादेन ताडित इत्यावेदनसमयेऽभिधाय भाषाकाले हस्तेन वा ताडित इति वदन्न(७) केवलं दण्ड्यः। पराजीयते च ॥ ९ ॥

(मिता०) अभियोगमनिस्तीर्य नैनं प्रत्यभियोजयेदित्यस्यापवादमाह—

कुर्यादिति। कलहे वाग्दण्डपारुष्यात्मके साहसेषु विषशस्त्रादिनिमित्तप्राणव्यापादनादिषु प्रत्यभियोगसम्भवे स्वाभियोगमनिस्तीर्याप्यभियोक्तारं प्रत्यभियोजयेत्। नन्वत्रापि पूर्वपक्षानुप्रमर्दनरूपत्वेनानुत्तरत्वात्प्रत्यभियोगस्य प्रतिज्ञान्तरत्वे युगपद्व्यवहारासम्भवः समानः। सत्यम्। नात्र युगपद्व्यवहाराय प्रत्यभियोगोपदेशः, अपि तु न्यूनदण्डप्राप्तये अधिकदण्डनिवृत्तये वा। तथा हि-अनेनाहं ताडितः शस्तो वेत्यभियोगे पूर्वमहमनेन ताडितः शस्तो वेति प्रत्यभियोगे द-

---

(१) पदान्तरं प्रति गमनाद्वस्त्वन्तरगमनाच्चेत्यर्थः। (२) सिद्ध्यसिद्धीति। हीनवादित्वे प्रकृतार्थासिद्धिरतथात्वे तत्सिद्धिरित्यर्थः। (३) पूर्वभूतेन सत्येन व्यवहारेण। (४) हीनवादी दण्ड्य एव, न प्रकृतार्थाद्धीयत इत्येतत्। (५) मन्युकृतेवाक्पारुष्यदण्डपारुष्यादिव्यवहारे। (६) एवं शाब्दमात्रार्थमुक्त्वा द्वितीयमसंपदध्वानितमाह अर्थेति। (७) वदन्केवलं ग।

(१)ण्डाल्पत्वम्। यथाह नारदः-'पूर्वमाक्षा(२)रयद्यस्तु नियतं स्यात्स दोषभाक्। पश्चाद्यः सोऽप्यसत्कारी पूर्वं तु वि(३)नयो गुरुः'॥ इति। यदा पुनर्द्वयोर्युगपत्ताडनादिप्रवृत्तिस्तत्राधिकदण्डनिवृत्तिः-'पा(४)रुष्ये साहसे वापि युगपत्संप्रवृत्तयोः। विशेषश्चेन्न लभ्येत विनयः स्यात्समस्तयोः'॥ इति। (५)एवं युगपद्व्यवहारप्रवृत्त्यसम्भवेऽपि कलहादौ प्रत्यभियोगोऽर्थवान्नृणादानादिषु तु निरर्थक एव॥

(मिता०) अर्थिप्रत्यर्थिनोर्विधिमुक्त्वा ससभ्यस्य सभापतेः कर्तव्यमाह—

उभयोरिति। उभयोरर्थिप्रत्यर्थिनोः सर्वेषु विवादेषु निर्णयस्य कार्यं कार्यनिर्णयः। आहिताग्न्यादिषु पाठात्कार्यशब्दस्य पूर्वनिपातः। निर्णय(६)स्य कार्यं च साधितधनदानं दण्डदानं च तस्मिन्समर्थः प्रति(७)भूः प्रतिभवति तत्कार्यं तद्बन्धवतीति प्रतिभूर्ग्राह्यः ससभ्येन सभापतिना। त(८)स्यासम्भवेऽर्थिप्रत्यर्थिनो रक्षणे पुरुषा नियोक्तव्याः। तेभ्यश्च ताभ्यां प्रतिदिनं वेतनं देयम्। तथाह कात्यायनः-'अथ चेत्प्रतिभूर्नास्ति कार्ययोग्यस्तु वा(९)दिनः। स रक्षितो दिनस्यान्ते दद्याद् भृत्याय वेतनम्' इति॥ १०॥

(वी० मि०) पराजितस्य प्रार्थिनोऽर्थिनश्च कृत्यमाह—

निन्हवे भावितो दद्याद्धनं राज्ञे च तत्समम्॥
मिथ्याभियोगी द्विगुणमभियोगाद्धनं वहेत्॥ ११॥

निन्हवे साधूक्तार्थापलापभाविते साक्ष्यादिभिरपि योगमङ्गीकारितः प्रतिवादी अर्थिने विवादविषयीभूतं धनं दद्यात्। राज्ञे च तत्समं धनं दण्डरूपं दद्यात्। मिथ्याभियोगकारी तु वादी अभियोगाद्विवादधनाद्विगुणं धनं राज्ञे वहेत्। चकारेण वाक्पारुष्यादौ दण्डान्तरं समुच्चिनोति। अत्र मनुः—

अर्थेऽपव्ययमानं तु करणेन विभावितम्।
दापयेद्धनिकस्यार्थं दण्डलेशं च शक्तितः॥

---

(१) दण्डति प्रत्यभियोक्तुरिति भावः। (२) आक्षारयेत् कायेन वाचा वा क्षीणं कुर्यात्। (३) विनयो दण्डः। (४) पारुष्यं वाग्दण्डादिः। (५) एवं उक्तप्रकारद्वयेन, एवं सतीति पाठः। (६) निर्णस्य यत्कार्यं च। (७) प्रतिभूः 'जामिन' इति भाषाप्रसिद्धोऽयम्। (८) तस्य प्रतिभुवः। (९) वादिन इति द्वयोरेकशेषः, जातावार्षं वा एकवचनम्, तेनार्थिप्रत्यर्थिनोः समासेन ग्रहणम्।

यो यावन्निन्हुवीतार्थं मिथ्या यावति वा वदेत् ।
तौ नृपेणाऽप्यधर्मज्ञौ दण्ड्यौ तद्द्विगुणं दमम् ॥

अत्र च समद्विगुणदण्डलेशानामपन्होतुर्जातिवयोवित्तसमाचारादिना व्यवस्था कार्या । यद्वक्ष्यति 'ज्ञात्वाऽपराधं देशं चे'त्यादि ॥११॥

(मिता०) अर्थिप्रत्यर्थिनोर्निर्णयकार्ये ससभ्येन सभापतिना प्रतिभूर्ग्राह्य इत्युक्तम्, किं तन्निर्णयकार्यं यस्मिन्प्रतिभू(१)र्गृह्यत इत्यपेक्षित आह--

निन्हव इति । अर्थिना निवेदितस्याभियोगस्य प्रत्यर्थिनाऽपन्हवे कृते यदाऽर्थिना साक्ष्यादिभिर्भावितोऽङ्गीकारितः प्रत्यर्थी तदा दद्याद्धनं प्रकृतमर्थिने राज्ञे च त(२)त्सममपलापदण्डम् । अथार्थी भा(३)वयितुं न शक्नोति तदा स एव मिथ्याभियोगी जात इत्यभियोगाद्भियुक्तधनाद्द्विगुणं ध(४)नं राज्ञे दद्यात् । प्राङ्न्याये प्रत्यवस्कन्दने चेदमेव याजनीयम् । त(५)त्रार्थ्येवाऽप(६)ह्ववादीति प्रत्यर्थिना (७) भावितो राज्ञे प्रकृतधनसमं दण्डं दद्यात् । अथ प्रत्यर्थी प्राङ्न्यायं कारणं वा भावयितुं न शक्नोति तदा स एव मिथ्या(८)भियोगीति राज्ञे द्विगुणं धनं दद्यात् । अर्थिने च प्रकृतं धनम् । संप्रतिपत्त्युत्तरे तु दण्डाभाव एव । ए(९)तच्च ऋणादानविषयमेव । प(१०)दान्तरेषु तत्र तत्र दण्डाभिधानाद्धन(११)व्यवहारेष्वस्यासम्भवाच्च न सर्वविषयत्वम् । 'राज्ञाधमर्णिको दाप्यः' इत्यस्य ऋणादानविषयत्वेऽपि तत्रैव विशेषं वक्ष्यामः । यद्वैतदेव सर्वव्यवहारविषयत्वेनापि योजनीयम् । कथम् । अभियोगस्य निन्हवेऽभियुक्तेन कृते यद्यभियोक्त्रा साक्ष्यादिभिर्भावितोऽभियुक्तस्तदा त(१२)त्समं तत्र तत्र प्रतिपदोक्तमेव । चशब्दोऽवधारणे । धनं दण्डं दद्याद्राज्ञ इत्य(१३)नुवादः ।

---

(१) प्रतिभूर्ग्राह्य इत्यत आह ग । (२) प्रकृतधनसममपलापनिमित्तकदण्डम् । (३) भावयितुं समर्थयितुम् । (४) धनं दद्याद्राज्ञे ख । (५) तत्राप्यर्थेऽह्नपववादी प्रत्य० ख । (६) अस्मिन्नर्थेऽयं पूर्वं पराजित इति प्राङ्न्यायोत्तरे गृहीतं प्रतिदत्तमिति कारणोत्तरे च दत्ते पूर्वन्यायं प्रतिदानं च प्रतिज्ञावापेऽपह्नवतीति स एवापलापवादीत्यर्थः । (७) भावितः जयपराजयरूपप्राङ्न्यायस्य प्रतिदानस्य च साधनादङ्गीकारितो वादी । (८) मिथ्यावादी । (९) निह्नवे भावितो दद्यादित्येतत् । (१०) पदान्तराणि द्विविधानि सधनानि अधनानि च । तत्र सधनेष्वाह पदान्तरेष्विति । (११) अधनेति । वाग्दण्डपारुष्यादिव्यवहारेषु प्रकृतधनसमदण्डदानस्य तद्द्विगुणदानस्य चासम्भवाच्चेत्यर्थः । (१२) तत्समं व्यवहारतुल्यम् । (१३) अनुवाद इति । तद्व्यवहारे दण्डस्य विशिष्य विहितत्वेन प्राप्तत्वाद्विध्यसम्भवेन पूर्वार्धेन तस्य सर्वस्य सामान्येनानुवाद इत्यर्थः ।

अथाभियोक्ता अभियोगं वक्तुं न शक्नोति तदा मिथ्याभियोगीति प्रतिपदोक्तं धनं दण्डं द्विगुणं दद्यादिति विधीयते। अत्रापि प्राङ्न्याये प्रत्यवस्कन्दने च पूर्ववदेव योजनीयम्॥ ११॥

(वी० मि०) श्रुतार्थस्योत्तरं लेख्यमित्युक्ते तत्र विषयभेदेन कालस्याप्रतीक्षणं प्रतीक्षणं चाह—

साहसस्तेयपारुष्यगोभिशापात्यये स्त्रियाम्॥
विवादयेत्सद्य एव कालोऽन्यत्रेच्छया स्मृतः॥ १२॥

साहसादिषु सद्य एव प्रतिवादिनं विवादयेत् उत्तरदानादिनिर्णयोपयोगि सर्वं कारयेत्। अन्यत्र ऋणादानादौ इच्छया तत्त्वबुभुत्सयाऽवधिः कालः स्मृतः। तथा च कात्यायनः—

व्यपैति गौरवं यत्र विनाशस्त्याग एव वा।
कालं तत्र न कुर्यात्तु कार्यमात्ययिकं हि तत्॥

नारदश्च—

ऋणादिषु हरेन्कालं कामं तत्र बुभुत्सया।

साहसा बलेन जनसमक्षं यत्परहिंसादि क्रियते तत्साहसं, स्तेयं चौर्यं, पारुष्यं वाक्पारुष्यं दण्डपारुष्यं च, गौर्दोंध्री, अभिशापः पातकाभियोगः, अत्यये वादिप्रतिवादिनोरन्यतरस्य मरणे सम्भाव्यमाने। सति सप्तमी चेयम्। अन्यत्र च विषयतायामेव। स्त्रियां कुलस्त्रीचारित्र्ये॥ १२॥

(मिता०) ततोऽर्थी लेखेयत्सद्यः प्रतिज्ञातार्थसाधनमिति वदतोत्तरपादलेखने कालप्रतीक्षणं दर्शितं तत्रापवादमाह—

साहसेत्यादि। साहसं विषशस्त्रादिनिमित्तं प्राणव्यापादनादि। स्तेयं चौर्यम्। पौरुष्यं वाग्दण्डपारुष्यं वक्ष्यमाणलक्षणम्। गौर्दोग्ध्री। अभिशापः पातकाभियोगः। अत्ययः प्रा(१)णधनातिपातस्तस्मिन्। द्वन्द्वैकवद्भावादेकवचनम्। स्त्रियां कुलस्त्रियां दास्यां च। कुलस्त्रियां चारित्रविवादे, दास्यां स्वत्वविवादे। विवादयेदुत्तरं दापयेत्। सद्य एव न कालप्रतीक्षणं कुर्यात्। अन्यत्र विवादान्तरेषु काल उत्तरदानकालः इच्छयार्थिप्रत्यर्थिसभ्यसभापतीनां स्मृत उक्तः॥१२॥

---

(१) प्रागुक्तनिमित्तान्यनिमित्तकोऽत्र प्राणनाशो ग्राह्यः।

(वी० मि०) वादिलेखनीयं प्रमाणं प्रागभिहितमिदानीं तदलेखनीयं प्राड्विवाकसभ्याद्यवधारणीयं प्रत्याकलितापरनामकमनुमानाख्यं प्रमाणं दर्शयति--

देशादेशान्तरं याति सृक्किणी परिलेढि च ॥
ललाटं स्विद्यते चाऽस्य मुखं वैवर्ण्यमेति च ॥ १३ ॥
परिशुष्यत्स्खलद्वाक्यो विरुद्धं बहु भाषते ॥
वाक्चक्षुः पूजयति नो तथोष्ठौ निर्भुजत्यपि ॥ १५ ॥
स्वभावाद्विकृतिं गच्छेत् मनोवाक्कायकर्मभिः ॥
अभियोगे च साक्ष्ये च स दुष्टः परिकीर्तितः ॥ १५ ॥

मनोवाक्कायकर्मभिर्यः स्वभावाद्भङ्गादिसम्भावनातिरिक्तनिमित्तमन्तरेण विकृतिं विकारं याति प्राप्नोति स अभियोगे वादे साक्ष्ये साक्षिकृत्ये दुष्टः परिकीर्तितः। शास्त्रे तेन तत्कृतोऽभियोगः साक्ष्यं च न सितीति तात्पर्यम् । विकृतीरेवाह-देशात्स्वोपवेशनस्थलाद्देशान्तरं याति अवस्थितौ न स्थैर्यं क्वापि भजत इति यावत्। सृक्किणी ओष्ठप्रान्तौ परितो भावेन पुनःपुनरिति यावत्, जिह्वाग्रेण लेढि घट्यति। अस्य दुष्टस्य ललाटं स्विद्यते स्वेदवद्भवति । मुखं च वैवर्ण्यं पाण्डुत्वं वा एति प्राप्नोति । परिशुष्यन् मुखशोषवान् स्खलद्विपर्यस्यद्वाक्यं यस्य स च स चेति कर्मधारयः । विरुद्धं पूर्वापरविरुद्धं, बहु उपयुक्तादधिकं भाषते वदति । वाक् स्वं प्रति परोक्तं वचनं, चक्षुः परकीयं च स्वदर्शनव्यापृतम् । एकवद्भावी द्वन्द्वः, नो पूजयति नाद्रियते प्रतिवचनदानेन प्रतीक्षणेन च ओष्ठौ निर्भुजति वक्रयति । एतेषां विकाराणां मानसत्वादिकं यथायथमूह्यम् । चकारापिकारतथाशब्दैर्बहुभिर्ब्रूहीत्युक्तश्च न ब्रूयादुक्तं च विभावयेत् ।

न च पूर्वापरं विद्यात्तस्मादर्थात्स हीयते ।
सन्ति ज्ञातार इत्युक्त्वा दिशेत्युक्तो दिशेन्न यः ॥
धर्मस्थः कारणैरेतैर्हीनं तमपि निर्दिशेत् ।

इति मन्वाद्युक्तानां समुच्चयः ॥ १३-१५ ॥

(मिता०) दुष्टलक्षणमाह--

देशादित्यादि । मनोवाक्कायकर्मभिर्यः स्वभावादेव न भयादिनि-

मित्ताद्विकृतिं विकारं या(१)ति गच्छति असावभियोगे साक्ष्ये वा(२) दुष्टः परिकीर्तितः। तां विकृतिं विभज्य दर्शयति। देशाद्देशान्तरं याति न क्वचिदवतिष्ठते, सृक्किणी ओष्टप(३)र्यन्तौ परिलेढि जिह्वाग्रेण स्पर्शयति घट्टयतीति कर्मणो विकृतिः। अस्य ललाटं स्विद्यते स्वेदविन्द्वङ्कितं भवति, मुखं च वैवर्ण्यं विवर्णत्वं पाण्डुत्वं कृष्णत्वं वा एति गच्छतीति कायस्य विकृतिः। परिशुष्यत्स्खलद्वाक्यः परिशुष्यत्सगद्गदं स्खलद्यत्वस्तं वाक्यं यस्य स तथोक्तः। विरुद्धं पूर्वापरविरुद्धं बहु भाषत इति वाचो विकृतिः। परोक्तां वाचं प्रतिवचनदानेन न पूजयति, चक्षुर्वा प्रतिवीक्षणेन न पूजयतीति मनसो विकृतेर्लिङ्गम्। (४)तथा ओष्ठौ निर्भुजति वक्रयतीत्यपि कायस्य विकृतिः। एतच्च दोषसम्भावनामात्रमुच्यते न दोषनिश्चयाय। स्वाभाविकनैमित्तिकविकारयोर्विवेक(५)स्य (६)दुर्ज्ञेयत्वात्। अथ कश्चिन्निपुणमतिर्विवेकं प्रतिपद्येत तथापि न पराजयनिमित्तं कार्यं भवति। न हि मरिष्यतो लिङ्गदर्शनेन मृतकार्यं कुर्वन्ति। एवमस्य पराजयो भविष्यतीति लि(७)ङ्गादवगतेऽपि न पराजयनिमित्तकार्यप्रसङ्गः॥ १३-१४-१५॥

(वी० मि०) काश्चित्तु विकृतयो दुष्टत्वज्ञापिकाः सत्यदण्डमपि प्रयोजयन्तीत्याह—

सन्दिग्धार्थं स्वतन्त्रो यः साधयेद्यश्च निष्पतेत्॥
न चाऽऽहूतो वदेत् किञ्चिद्दीनो दण्ड्यश्च स स्मृतः॥१६॥

सन्दिग्धं विचारकेण तदीयतयाऽनिर्णीतमेवार्थमत एव स्वतन्त्रः विचारकदत्तजयपत्रादिनिरपेक्षः साधयेत् स्वाधीनं करोति। यश्च वादार्थमाहूतो निष्पतेत् विचारस्थानात्पलायते। यश्चाहूतः स्वपक्षसाधकं परपक्षबाधकं वा न किञ्चिद्ब्रूयात्स हीनः दुष्टः सन्दिग्धार्थसाधनाद्यपराधेन राज्ञा दण्ड्यश्च स्मृतः। आदिचकारेण विचारस्थानानुपस्थायिनः समुच्चयः। द्वितीयचकारेण स्वाशक्तौ प्रतिनिधिद्वारापि न वादयेदिति समुच्चीयते। तृतीयचकारेण वि-

---

(१) याति गच्छति गच्छति यातीत्यर्थः। श्लोके गच्छेदित्यस्य लिङर्थाविवक्षायां तस्य पूर्वं विवरणं प्रदर्श्य तत्तो यातीति प्रदर्शनीयम्। (२) वा चार्थे। (३)पर्यन्तौ प्रान्तौ। (४) तथा ववर्ण्यादिवत्। (५) विवेकस्य भेदस्य। (६) दुर्ज्ञानत्वात् ग। (७) यत्किंचिद्विकारात्।

वादास्पदं दापयितव्यः । एताश्च विकृतयोऽतिनिपुणेनाऽनन्यथासिद्धयोऽवतारिता भङ्गस्याऽनुमापिकाः । इतरथा तु भङ्गसम्भवनामापादिकाः । एताभिरेव च निर्णयो लोके प्रत्यक्षविचार इत्युच्यते ॥१६॥

(मिता०) किञ्च—

सन्दिग्धार्थमिति । सन्दिग्धमर्थम(१)धमर्णेनानङ्गीकृतमेव यः स्वतन्त्रः साधननिरपेक्षः साधयत्यासेधादिना स हीनो दण्ड्यश्च भवति । यश्च स्वयं सम्प्रतिपन्नं साधनेन वा साधितं याच्यमानो निष्पतेत्पलायते, यश्चाभियुक्तो राज्ञा चाहूतः सन्नसि न किञ्चिद्ब्रूयाति (२)सोपि हीनो दण्ड्यश्च स्मृत इति सम्बध्यते । 'अभियोगे च साक्ष्ये वा दुष्टः स परिकीर्तितः' इति प्रस्तुतत्वाद्धीनपरिज्ञानमात्रमेव माभूदिति दण्ड्यग्रहणम् । दण्ड्यश्चापि 'शास्योऽप्यर्थान्न हीयत' इत्यर्थादहीनत्वदर्शनादत्र तन्माभूदिति हीनग्रहणम् ॥ १६ ॥

(वी० मि०) 'ततोर्थी लखयेत्सद्यः प्रतिज्ञातार्थसाधक'मित्युक्तं तत्रोभयोरपि वादिप्रतिवादिनोः साधकप्रमाणसत्त्वे कस्य तद्विचारणोपादेयमित्यत्र व्यवस्थामाह—

साक्षिषूभयतः सत्सु साक्षिणः पूर्ववादिनः ॥
पूर्वपक्षेऽधरीभूते भवन्त्युत्तरवादिनः ॥ १७ ॥

उभयतो वादिनः प्रतिवादिनश्च साक्ष्यादिषु प्रमाणेषु सत्सु पूर्ववादिनो भाषितुः साक्ष्यादीनि प्रमाणानि उपदेयानि भवन्ति इत्युत्सर्गः । अत्रापवादमाह पूर्वपक्षे भाषारूपेऽधरीभूते उत्तरापेक्षया दुर्बले बलवत्कारणोत्तरवशात् प्राङ्न्यायोत्तराद्वा उत्तरवादिनः साक्ष्यादीनि उपादेयानि भवन्तीति । एतच्च विशिष्य प्रागेव प्रपञ्चितम् ॥१७॥

(मिता०) अथ यत्र द्वावपि युगपद्धर्माधिकरणं प्राप्तौ भाषावादिनौ । तद्यथा—कश्चित्प्रतिग्रहेण क्षेत्रं लब्ध्वा कञ्चित्कालमुपभुज्य कार्यवशात्सकुटुम्बो देशान्तरं गतः । अन्योऽपि तदेव क्षेत्रं प्रतिग्रहेण लब्ध्वा कञ्चित्कालमुपभुज्य देशान्तरं गतः । ततो द्वावपि युगपदागत्य मदीयमिदं क्षेत्रं मदीयमिदं क्षेत्रमिति परस्परं विवदमानौ धर्माधिकारिणं प्राप्तौ । तत्र कस्य कि(३)येत्याकाङ्क्षित आह—

साक्षिष्विति । उभयतः उभयोरपि वादिनोः साक्षिषु स(४)म्भ-

(१) ऋणाग्राहिणा । (२) द्विविधोपीत्यर्थः । (३) क्रिया साधनम् । (४) साक्षिषु सत्सु ग ।

वत्सु साक्षिणः पूर्ववादिनः पूर्वस्मिन्काले मया प्रतिगृहीतमुपभुक्तं चेति यो वदत्यसौ पूर्ववादी न पुनर्यः पूर्वं निवेदयति तस्य साक्षिणः प्रष्टव्याः। यदा (१)त्वन्य एवं वदति सत्यमनेन पूर्वं प्रतिगृहीतमुपभुक्तं च किन्तु राज्ञेदमेव क्षेत्रमस्मादेव क्रयेण लब्ध्वा मह्यं दत्तमिति, अनेन वा प्रतिग्रहेण लब्ध्वा मह्यं दत्तमिति। तत्र पूर्वपक्षोऽसाध्यताऽधरीभूतस्तास्मि(२)न्पूर्वपक्षेऽधरीभूते उत्तरकालं प्रतिगृहीतमुपभुक्तं चेति वादिनः साक्षिणः प्रष्टव्या भवन्ति। इदमेव व्याख्यानं युक्ततरम्। मिथ्योत्तरे पूर्ववादिनः साक्षिणो भवन्ति। प्राङ्न्यायकारणोक्तौ पूर्वपक्षेऽधरीभूते उत्तरवादिनः साक्षिणो भवन्तीति व्याख्यानमयुक्तम्। अस्यार्थस्य–'ततोऽर्थी लेखयेत्सद्यः प्रतिज्ञातार्थ(३)साधनम्' इत्यनेनैवोक्तत्वात्पुनरुक्तिप्रसङ्गात्। पूर्वव्याख्यानमेव स्पष्टीकृतं नारदेन–'मि(४)थ्या क्रिया पूर्ववादे कारणे प्रतिवादिनि। (५)प्राङ्न्यायविधिसिद्धौ तु जयपत्रं क्रिया भवेत्'॥ इत्युक्त्वा–'द्वयोर्विवदतोरर्थे द्वयोः सत्सु च साक्षिषु। पू(६)र्वपक्षो भवेद्यस्य भवेयुस्तस्य साक्षिणः'॥ इति वदता। एतस्य च पू(७)र्वव्यवहारविलक्षणत्वाद्भेदेनोपन्यासः ॥१७॥

(वी० मि०) उभयतः प्रमाणसत्त्व एव प्रायशः सपणो व्यवहारो भवतीति तत्प्रसङ्गेन सपणव्यवहारे पराजितस्य कृत्यमाह—

सपणश्चेद्विवादः स्यात्तत्र हीनं तु दापयेत् ॥
दण्डं च स्वपणं चैव धनिने धनमेव च ॥ १८ ॥

प्राग्लक्षितो विवादश्चेत्स्यात्तदा तत्र सपणविवादे हीनपराजितं पराजयनिमित्तकं दण्डं राज्ञे विवादविषयं च धनं वादिने स्वपणं विषयं धनं च यथाव्यवस्थं वादिने राज्ञे वा दापयेद्विचारकः। तुशब्देनापणविवादे पणदानव्यच्छेदः। एवकारेण प्रथमेन स्वानभ्युपगतपरोक्तपणदानव्यवच्छेदः। द्वितीयेन च धनिन एवेत्यन्वितेन धनविषयकविवादातिरिक्ते वाक्पारुष्यादौ धनदानव्यवच्छेदः। प्रथमचकारौ दण्डपणयोरदेययोर्निष्पादनसमुच्चयार्थौ। चरमचकारस्त्रयाणां दण्डादीनां मिलितानां दानबोधनार्थः ॥ १८ ॥

---

(१) उक्तपूर्ववादिभिन्नः। (२) स्तस्मिन्पक्षे ग। (३) अर्थी साध्यवान्। (४) मिथ्या मिथ्योत्तरे। (५) पूर्वन्यायकरणनिश्चये तु। (६) पूर्वत्र काले गृहीतमुपभुक्तं चेतीत्यर्थः। (७) सर्वव्यवहार इति पाठस्तत्र प्रागुक्तसर्वेत्यर्थः।

(मिता०) अपि च—

सपण इति । यदि विवादो व्यवहारः सपणः (१)पणनं पणस्तेन सह वर्तत इति सपणः स्यात्तदा तत्र तस्मिन् सपणे व्यवहारे हीनं पराजितं (२)पूर्वोक्तं दण्डं स्वकृतं पणं (३)राज्ञे, अर्थिने च विवादास्पदीभूतं धनं दापयेद्राजा । यत्र पुनरेकः कोपावेशवशाद्यद्यहमत्र पराजितो भवामि तदा पणशतं दास्यामीति प्रतिजानीते, अन्यस्तु न किंचित्प्रतिजानीते (४)तत्रापि व्यवहारः प्रवर्तते । तस्मिंश्च प्रवृत्ते पणप्रतिज्ञावादी यदि ह्रीयते तदा स एव सपणं दण्डं दाप्यः । अन्यस्तु पराजितो दण्डं दाप्यः, न पणम् । स्व(५)पणं चेति विशेषोपादानात् । यत्र त्वेकः शतम्, अन्यस्तु पञ्चाशतं प्रतिजानीते तत्रापि पराजये स्वकृतमेव पणं दाप्यौ । सपणश्चेद्विवादः स्यादिति वदता पणरहितोऽपि विवादो दर्शित इति ॥ १८ ॥

(वी० मि०) व्यवहारो यथा सपणापणभेदेन द्विविधस्तथा भूतानुसारिच्छलानुसारिभेदेन द्विविधः । तथा चोक्तम्—

भूतच्छलानुसारित्वाद् द्विगतिः समुदाहृतः ।
भूतं तत्त्वार्थसंयुक्तं प्रमादाभिहितं छलम् ॥

इति प्रमादपदमिह भूतार्थाननुसारि व्यापारमात्रपरं, तत्र सति सम्भवे भूतानुसारेणैव व्यव(६)हारो द्रष्टव्य इत्याह—

छलं निरस्य भूतेन व्यवहारान्नयेन्नृपः ॥
भूतमप्यनुपन्यस्तं हीयते व्यवहारतः ॥ १९ ॥

भूतेन तत्त्वार्थसम्बन्धेन सामादिभिरुपायैर्यथार्थवादिना दिनादिरूपेण स्वव्यापारेण परव्यापारेण वा छलरूपमुक्तं निरस्य नृपो व्यवहारान्नयेत् निर्णयरूपे स्वफले प्रापयेत् । क्वचित्तु छलानुसार्य्यपि व्यवहारो भवतीत्याह भूतं तत्त्वार्थे स सम्बन्धमपि साक्ष्यादिकं जयावधारणात्प्रागनुपन्यस्तं व्यवहारे कर्तव्ये हीयतेऽसाधकं भवति । तत्र च छलानुसार्य्येव व्यवहारः । भूतमप्यनुपन्यस्तमित्यनेन सर्वं भूता-

---

(१) पणनं व्यवहरणं, स्वोक्तसत्यतासूचनाय यथासम्भवद्रव्यदानाङ्गीकरणमित यावत् !
(२) प्रकृतार्थसमामिति निह्नवे भावित इत्यत्रोक्तम् । (३) प्राड्विवाकादिरिति शेषः ।
(४) तत्र निमित्तसत्त्वादप्रवृत्तौ मानाभावाच्चेति भावः । (५) सपणं ख० ।
(६) व्यवहारो द्रष्टव्य इत्याह—इति ख० पुस्तके नास्ति ।

र्थाननुसारित्वेन शास्त्रलोकसिद्धा(१) व्यापारा उपलक्ष्यन्ते । तत्र शास्त्रसिद्धव्यापारो यथा—

क्रियां बलवतीं त्यक्त्वा दुर्बलां यः समाश्रयेत् ।
स जयेऽवधृते सभ्यैः पुनस्तां नाप्नुयात् क्रियाम् ॥
निर्णीतव्यवहारे तु प्रमाणमफलं भवेत् ।
लिखितं साक्षिणो भुक्तिः पूर्वमावेदितं न चेत् ॥
यथा पक्वेषु धान्येषु निष्फलाः प्रावृषो गुणाः ।
निर्णीतव्यवहाराभ्यां प्रमाणमफलं भवेत् ॥

इति । लोकव्यवहारो यथा—

श्वश्चेदहं न यास्यामि तदा मम पराजयः ।

इति व्यवस्थादिरिति ॥ १९ ॥

(मिता०) किञ्च—

छलमिति । छलं प्रमादाभिहितं निरस्य परित्यज्य भूतेन वस्तुतत्त्वानुसारेण व्यवहारान्नयेद्नृपः । यस्मा(२)द् भूतमपि वस्तुतत्त्वमपि अनुपन्यस्तमन(३)भिहितं हीयते हानिमुपगच्छति व्य(४)वहारतो व्यवहारेण साक्ष्यादिभिः । तस्माद् भूतानुसरणं कर्तव्यम् । यथाऽर्थिप्रत्यर्थिनौ सत्यमेव वदतस्तथा ससभ्येन सभापतिना यतितव्यं सामादिभिरुपायैः । तथासति साक्ष्यादिनैरपेक्ष्येणैव निर्णयो भवति । अथ सर्वथापि भूतानुसरणं न शक्यते कर्तुं तथासति साक्ष्यादिभिर्निर्णयः कार्य इत्यनुकल्पः । यथोक्तम्-'भूतच्छ(५)लानुसारित्वाद्विगतिः समुदाहृतः । भूतं तत्त्वा(६)र्थसंयुक्तं प्रमादाभिहितं छलम्' ॥ इति । तत्र भूतानुसारी व्यवहारो मुख्यः, छलानुसारी त्वनुकल्पः । साक्षिलेख्यादिभिर्व्यवहारनिर्णये कदाचिद्भूस्त्वनुसरणं भवति कदाचिन्न भवति । साक्ष्यादीनां व्य(७)भिचारस्यापि संभवात् ॥ १९ ॥

(वी० मि०) राजकर्तव्यमुखेन भूतानुसारिणं छलानुसारिणं च

---

(१) शास्त्रलोकसिद्धव्यापारा—इति ख० पु० पाठः ।
(२) तस्मात् ख० । (३) अनाभिहितं अर्थिप्रत्यर्थ्यन्तरेण ।
(४) व्यवहारतः हीयमानपापयोगाच्चेति करणतृतीयान्तात्तसिः ।
(५) भूतऊले अनुसरति तच्छीलस्तत्त्वात् द्विगतिर्द्विप्रकारः ।
(६) तत्त्वार्थयुक्तं यत्प्रमादाभि० ख० । (७) व्यभिचारस्य अयथार्थवादित्वस्यापि ।

व्यवहारमुदाहरति—

निन्हुते लिखितं नैकमेकदेशे विभावितः ॥
दाप्यः सर्वं नृपेणार्थी न ग्राह्यस्त्वनिवेदितः ॥ २० ॥

लिखितं भाषादिना लिखितं नैकमनेकं हिरण्यरत्नवस्त्रादि प्रतिवादी यो निह्नुते सर्वमपलपति स एकदेशे हिरण्यादिमात्रे विभावितः साक्ष्यादिभिरपहारकत्वेनाऽवधारितः सर्वमाक्षेपविषयमर्थं नृपेणाऽर्थिने दाप्यः । इदं च भावितस्यैकदेशस्यैकदेशान्तराविना(१)भावे एकदेशविभावनेपि सर्वं दास्यामीति व्यवस्थाविशेषे च। तत्राद्यं भूतार्थसम्बद्धं, द्वितीयं छलसम्बद्धमिति । अनिवेदितः पूर्वमलेखितः तुश्चार्थे। विभावितैकदेशव्यतिरिक्तो रत्नादिरविनाभावनिरूपकोपि राज्ञा न ग्राहयितव्यः । इदमपि छलसम्बद्धस्योदाहरणम् ।

साध्यार्थांशेऽपि गदिते साक्षिभिः सकलं भवेत् ।
स्त्रीसङ्गे साहसे चौर्ये यत्साध्यं परिकीर्त्तितम् ॥

इति कात्यायनवचनात् । चौर्यादावेकदेशविभावनेपि सर्वं देयमिति तु मिताक्षरा ॥ २० ॥

(मिता०) भूतमप्यनुपन्यस्तं हीयते व्यवहारत इत्यत्रोदाहरणमाह—

निन्हुत इति । नैकमनेकं सुवर्णरजतवस्त्रादि लिखितमभि(२)युक्तमर्थिना प्रत्यर्थी यदि सर्वमेव निन्हुतेऽपजानीते तदार्थिनै(३)कदेशे हिरण्ये साक्ष्यादिभिः प्रत्यर्थी भावितोऽङ्गीकारितः सर्वं रजताद्यर्थं पूर्वलिखितं दाप्योऽर्थिने नृपेण । न ग्राह्यस्त्वनिवेदितः पूर्वं भाषाकाले अनिवेदितः पश्चादर्थिना पूर्वं मया विस्मृत इति निवेद्यमानो न ग्राह्यो न दापयितव्यो नृपेण । एतच्च न केवलं वाचनि(४)कम् । एकदेशे प्रत्यर्थिनो मिथ्यावादित्वनिश्चयादेकदेशान्तरेऽपि मिथ्यावादित्वसंभवात् । अर्थिनश्चैकदेशे सत्यवादित्वनिश्चयादेकदेशान्तरेऽपि सत्यवादित्वसम्भवात् । एवं तर्का(५)परनामसम्भावनाप्रत्ययानुगृहीतादस्मादेव योगीश्वरवचनात्सर्वं दापनीयं नृपेणेति निर्णयः । एवं(६) च

---

(१) विनाभावेन—इति ख० पु० पाठः । (२) प्रतिज्ञाकालेऽर्थिनाऽभियोगत्वेनाभिहितम् ।
(३) पूर्वोक्तार्थैकदेशहिरण्यविषये । (४) किंतु युक्तिसिद्धमपीति भावः ।
(५) तर्कापरनामिका या सम्भावना सैव यः प्रत्ययो ज्ञानं तत्सहकृतात् 'निह्नुते' इति योगीश्वरवचनादित्यर्थः । (६) अस्य तदनुगृहीतत्वे च ।

तर्कवाक्यानुसारेण निर्णये क्रियमाणे वस्तुनोऽन्यथात्वेऽपि व्यवहारदर्शिनां न दोषः। तथा च गौतमः-'न्याया(१)धिगमे तर्कोऽभ्युपायस्तेनाभ्युह्य यथास्थानं गमयेत्' इत्युक्त्वा, 'तस्माद्राजाचार्यावनिन्द्यौ' इत्युपसंहरति। न चैकदेशभावितोऽनुपादयेवचनः प्रत्यर्थीत्येतावदिह गम्यते। 'एकदेशविभावितो नृपेण सर्वं दाप्यः' इति वचनात्। य(२)त्तु कात्यायनेनोक्तम्-'अनेकार्थाभियोगेऽपि यावत्संसाधयेद्धनी। साक्षिभिस्तावदेवासौ लभते साधितं धनम्' ॥ इति तत्पुत्रा(३)दिदेयपित्राद्यृणविषयम्। तत्र हि बहूनर्थान्नभियुक्तः पुत्रादिर्न जानामी(४)ति प्रतिवदन्निह्नववादी न(५ भवतीत्येकदेशविभावितोऽपि न क्वचिदसत्यवादीति 'निह्नुते लिखितं नैकम्' इति शास्त्रं तत्र न प्रवर्तते। निह्नवाभावादपेक्षिततर्काभावाच्च। 'अनेकार्थाभियोगेऽपि' इति कात्यायनवचनं तु सामान्यविषयं, वि(६)शेषशास्त्रस्य विषयं निह्न(७)वोत्तरं परिहृत्याऽज्ञानोत्तरे प्रवर्तते। मनु-'ऋणादिषु विवादेषु स्थि(८)रप्रायेषु निश्चितम्। ऊने वाप्यऽधिके वार्थे प्रोक्ते साध्यं न सिद्ध्यति' ॥ इति वदता कात्यायनेनानेकार्थाभियोगे साक्षिभिरेकदेशे भावितेऽधिके वा भाविते साध्यं सर्वमेव न सिद्ध्यतीत्युक्तम्। तथासत्येकदेशे भाविते अभावितैकदेशसिद्धिः कुतस्या? उच्यते। लिखितसर्वार्थसाधनतयोपन्यस्तैः साक्षिभिरेकदेशाभिधानेऽधिकाभिधाने वा कृत्स्नमेव साध्यं न सिद्ध्यतीति तस्यार्थः। तत्रापि निश्चितं न सिद्ध्यतीति वचनात्पूर्ववत्संशय एवेति प्रमाणान्तरस्यावसरोऽस्त्येव। छलं निरस्येति नियमात्। साह(९)सादौ तु सकलसाध्य-

---

(१) न्यायज्ञाने तर्क उपायस्तेन तर्केण न्यायमभ्युह्य निश्चित्य नाभ्युपेत्य ख०।

(२) एवं निश्चितेऽर्थे प्रसक्तविरोधं परिहरति यत्त्विति। (३) तत्पुत्राद्यृण ख०।

(४) मीतिवदन् ग०।

(५) न भवतीति। ऋणस्यान्यकृतत्वेनाज्ञानस्यापि तत्र सम्भवेनापलापाभावात्।

(६) 'निह्नुते' इत्यस्य।

(७) निह्नवोत्तरं=ज्ञात्वापलापो निन्हवस्तद्रूपमुत्तरं परिहृत्य परित्यज्य अज्ञानोत्तरं ज्ञानाभावेनोत्तरे प्रवर्तते।

(८) स्थिरेति। लिङ्गदर्शनमात्रेणादृढहेतुनापि स्त्रीसंग्रहणादिरूपसाध्यस्य सिद्धिर्भवतीति तादृशानामस्थिरत्वम्, ऋणादानादिरूपस्य सा-यस्य तु दृढसाधनेनैव सिद्धिस्तेषा स्थिरत्वम्, तदपि माकाशादिवदिति स्थिरप्रायत्वमित्यर्थ।

(९) स्थिरप्रायोक्त्यस्य प्रत्युदाहरणमाह साहसादौ त्विति।

साधनत(१)योद्दिष्टैः साक्षिभिरेकदेशेऽपि साधिते कृत्स्नसाध्यसिद्धिर्भवत्येव । तावतैव साहसादेः सिद्धत्वात्, कात्यायनवचनाच्च । 'सा(२)ध्यार्थांशेऽपि गदिते साक्षिभिः सकलं भवेत् । स्त्रीसङ्गे साहसे चौर्ये यत्साध्यं परिकीर्तितम्' ॥ इति ॥ २० ॥

(वी० मि०) ननु शास्त्रयोर्विरोधे कथं भूतार्थसम्बद्धो व्यवहार इत्यत आह—

स्मृत्योर्विरोधे न्यायस्तु बलवान् व्यवहारतः ॥
अर्थशास्त्रात्तु बलवद्धर्मशास्त्रमिति स्थितिः ॥ २१ ॥

व्यवहारतो व्यवहारे विषये स्मृत्योः धर्मशास्त्रयोः परस्परं विरोधे तु न्यायः तत्तद्विषयव्यवस्थापकस्तर्को बलवान् निर्णायकः । न्यायेन यस्मिन्नर्थे या स्मृतिर्व्यवस्थाप्यते तस्मिन्नर्थे सा स्मृतिः प्रमाणमिति यावत् । तुशब्देन श्रुतिविरोधे स्मृतेर्बलवत्त्वं व्यवच्छिद्यते । यदुक्तम्—

श्रुतिस्मृतिविरोधे तु श्रुतिरेव गरीयसी ।
परस्परविरोधे तु योग(३)युक्तं प्रमाणवत् ॥

स्मृत्योरिति समानजातीयमात्रोपलक्षणकं, तेन श्रुत्योरेवाऽर्थशास्त्रयोरेव वा परस्परं विरोधे न्यायो विनिगमक इति मन्तव्यम् । द्वितीयतुशब्देन पुराणव्यवच्छेदः, तेन पुराणाद्धर्मशास्त्रं स्मृत्यात्मकं न बलवत् । किन्तु स्मृत्योरिव स्मृतिपुराणयोः परस्परविरोधे न्यायाद्बलाबलमिति प्रतिज्ञातार्थसाधकमित्युक्तम् ॥ २१ ॥

(मिता०) ननु 'निन्हुते लिखितं नैक'मितीयं स्मृतिस्तथानेकार्थाभियोगेपीतीयमपि स्मृतिरेव । तत्रानयोः स्मृत्योः परस्परविरोधे सतीतरेतरबाधनादप्रामाण्यं कस्मान्न भवति विषयव्यवस्था किमित्याश्रीयत इत्यत आह—

स्मृत्योरिति । यत्र स्मृत्योः (४)परस्परतो विरोधस्तत्र विरोधपरिहाराय विषयव्यवस्थापनादौत्सर्गापवादादिलक्षणो न्यायो बलवान्समर्थः । स च न्यायः कुतः प्रत्येतव्य इत्यत आह—व्यवहारत

---

(१) 'उपादिष्टैः' इति पाठः ।

(२) साध्येति । स्त्रीसंग्रहादिके विवादपदत्रये भाषावादिना यदेकार्थरूपं साध्यत्वेन कथितं तत्रानेकसाध्यसाधनतयाभिहितैः साक्षिभिः साध्यार्थजातस्यैकदेशेपि साधिते सकलं भवेत्सिध्येदित्यर्थः ।

(३) यायुक्तं— इति क० पु० पाठः । (४) परस्परविरोधः ग० ।

इति । व्यवहाराद्वृद्धव्यवहारादन्वयव्यतिरेकलक्षणादवगम्यते। अतश्च प्रकृतोदाहरणेऽपि विषयव्यवस्थैव युक्ता । एवमन्यत्रापि विषयव्यवस्थाविकल्पादि यथासम्भवं योज्यम् ॥

(मित०) एवं सर्वत्र प्रसङ्गेऽपवादमाह—

अर्थेति । धर्मशास्त्रानुसारेणेत्यनेनैवौ(१)शनसाद्यर्थशास्त्रस्य निरस्तत्वात् धर्मशास्त्रान्तर्गतमेव राजनीतिलक्षणमर्थशास्त्रमिह विवक्षितम् । (२)अर्थशास्त्रधर्मशास्त्रस्मृत्योर्विरोधे अर्थशास्त्राद्धर्मशास्त्रं बलवदिति स्थितिर्मर्यादा । यद्यपि (३)समानकर्तृकतया अर्थशास्त्रधर्मशास्त्रयोः स्वरूपगतो विशेषो नास्ति तथापि प्रमेयस्य धर्मस्य प्राधान्यादर्थस्य चाप्राधान्याद्धर्मशास्त्रं बलवदित्याभिप्रायः । धर्मस्य प्राधान्यं (४)शास्त्रादौ दर्शितम् । तस्माद्धर्मशास्त्राऽर्थशास्त्रयोर्विरोधेऽर्थशास्त्रस्य बाध एव, न विषयव्यवस्था नापि विकल्पः । किमत्रोदाहरणम् । (५)न तावत्—गुरुं वा बालवृद्धौ वा ब्राह्मणं वा बहुश्रुतम् । आततायिनमायान्तं हन्यादेवाविचारयन् ॥ नाततायिवधे दोषो हन्तुर्भवति कश्चन । (६)प्रच्छन्नं वा प्रकाशं वा मन्युस्तं मन्युमृच्छति' ॥ (मनुः ८।३५०।५१) तथा—'आततायिनमायान्तमपि वेदा(७)न्तगं रणे । जिघांसन्तं जिघांसीयान्न तेन ब्रह्महा भवेत्' । इत्यार्थशास्त्रम् । 'इयं विशुद्धिरुदिता प्रमाप्या(८)कामतो द्विजम् । कामतो ब्राह्मणवधे निष्कृतिर्न विधीयते' ॥ (मनुः ११।८९) इत्यादि धर्मशास्त्रं तयोर्विरोधे धर्मशास्त्रं बलवदिति युक्तम् । अनयोरेकविषयत्वासम्भवेन विरोधाभावान्न बलाबलचिन्तावतरति। तथा हि-'शास्त्रं

---

(१) औशनसादि केवलं नीतिशास्त्रम् ।

(२) एकविषययोर्विरुद्धार्थयोर्हि स्मृत्योर्मिथो विरोधो न तु भिन्नविषययोरविरुद्धार्थयोर्वा । सति च विरोधे प्रबलदुर्बलभावचिन्ता । एवं च पूर्वमेव धर्मशास्त्रानुसारेणैव व्यवहारानुदर्शनस्य विहितत्वादौशनसादिनीतिशास्त्रस्य न व्यवहाराविषय प्रवृत्तिरत एकविषयत्वाभावादर्थशास्त्रधर्मशास्त्रयोः सुतरां विरोधाभावादनयोः प्रबलदुर्बलभावचिन्तनमेव तावदयुक्तमिति शङ्काशयः ।

(३) मन्वादिरूपैककर्तृनिष्पन्नत्वेन । (४) आचाराध्यायस्यादौ ।

(५) अन्योक्तमुदाहरणमनूद्य खण्डयति—न तावदित्यादि युक्तमित्यन्तेन । न तावदुदाहरणं युक्तमिति व्यवहितेनान्वयः ।

(६) यतो मन्युरेव प्रकाशमप्रकाशं वा तं मन्युं हिनस्तीत्यर्थः, प्रकाशं वाऽप्रकाशं वा क० ।

(७) वेदान्तपारगम्, पाठ० ।

(८) अकामतो ब्राह्मणं हिंसित्वा स्थितस्य. ।

द्विजातिभिर्ग्राह्यं धर्मो यत्नोपरुध्यते' (मनुः ८।३४८) इत्युपक्रम्य-'आत्मनश्च परित्राणे दक्षिणानां च संगरे। स्त्रीविप्राभ्युपपत्तौ च घ्नन्धर्मेण न(१) दण्डभाक्' (मनुः ८।३४९) इत्यात्मरक्षणे दक्षिणादीनां यज्ञोपकरणानां च रक्षणे युद्धे च स्त्रीब्राह्मणहिंसायां च-'आततायिनमकुटशस्त्रेण घ्नन् न दण्डभाक्' इत्युक्त्वा तस्यार्थवादार्थमिदमुच्यते गुरुं वा बालवृद्धौ वेत्यादि । गुर्वादीनत्यन्तावध्यानप्याततायिनो हन्यात्किमुतान्यानिति । वाशब्दश्रवणादपि वेदान्तगमित्यत्रापिशब्दश्रवणान्न गुर्वादीनां वध्यत्वप्रतीतिः । 'नाततायिवधे दोषोऽन्यत्र गोब्राह्मणवधात्' इति सुमन्तुवचनाच्च । 'आचार्यं च प्रवक्तारं मातरं पितरं गुरुम् । न हिंस्याद्ब्राह्मणान्गाश्च सर्वांश्चैव तपस्विनः' ॥ इति (४।१६२) मनुवचनाच्च । आचार्यादीनामाततायिनां हिंसाप्रतिषेधेनेदं वचनमर्थवन्नान्यथा । हिंसामात्रप्रतिषेधस्य सा(२)मान्यशास्त्रेणैव सिद्धत्वात् । 'नाततायिवधे दोषो हन्तुर्भवति कश्चन' इत्येतदपि ब्राह्मणादिव्यतिरिक्तविषयमेव । यतः-'अग्निदो गरदश्चैव शस्त्रपाणिर्धनापहः । क्षेत्रदारहरश्चैव षडेते ह्याततायिनः' ॥ तथा-'उद्य(३)तासिविषाग्निश्च शापोद्यतकरस्तथा । आ(४)थर्वणेन हन्ता च पिशुनश्चापि राजनि । भार्यातिक्रमकारी च रन्ध्रान्वेषणतत्परः । एवमाद्यान्विजानीयात्सर्वानेवाततायिनः' ॥ इति सामान्येनाततायिनो दर्शिताः । अतश्च ब्राह्मणादय आततायिनश्च आत्मादित्राणार्थं हिंसानभिसन्धिना निवार्यमाणाः प्रमादाद्यदि विप(५)द्येरंस्तत्र लघुप्रायश्चित्तं राजदण्डाभावश्चेति निश्चयः । तस्मादन्यदिहोदाहरणं वक्तव्यम् । उच्यते-'हिरण्यभूमिलाभेभ्यो मित्रलब्धिर्वरा यतः । अतो यतेत तत्प्राप्तौ' इत्यर्थशास्त्रम् । 'धर्मशास्त्रानुसारेण क्रोधलोभविवर्जितः' इति धर्मशास्त्रम् । तयोः क्वचिद्विषये विरोधो भवति । यथा-'च(६)तुष्पाद्व्यवहारे प्रवर्तमाने एकस्य जयेऽवधार्यमाणे मित्रलब्धिर्भवति न धर्मशास्त्रमनुसृतं भवति । अन्यस्य जयेऽवधार्यमाणे धर्मशास्त्रमनुसृतं भवति मित्रलब्धिर्विपरीता । तत्रार्थशास्त्राद्धर्मशास्त्रं बलवत् । अत

---

(१) न दुष्यति क. ।(२) न हिंस्यादित्यादिवच्चनेनैवेत्यर्थः ।

(३) उद्यतेत्यत्र असिविषाग्नीनां द्वन्द्वं कृत्वोद्यतशब्देन बहुव्रीहिः ।

(४) अथर्ववेदप्रतिपादिताभिचारादिकर्मणा । (५) मृत्युमाप्नुयुः ।

(६) अयमास्मत्रैवाध्यायेऽष्टमश्लोके पूर्वं दर्शित . चतुर्धान्य. घ ।

एव धर्मार्थसंनिपाते अर्थग्राहिण एतदेव' इति प्रायश्चित्तस्य गुरुत्वं दर्शितमापस्तम्बेन । एतदेवेति द्वादशवार्षिकं प्रायश्चित्तं परामृश्यते ॥ २१ ॥

(वी० मि०) विभजन्नेव मानुषदैवरूपयोः साधकयोर्बलाबलमाह—

प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्तितम् ॥
एषामन्यतमाभावे दिव्यान्यतममुच्यते ॥ २२ ॥

लिखितं विवादपदनिर्णयक्षमा लिपिः, भुक्तिः विवादास्पदीभूतस्य ग्रामादेरुपभोगः, साक्षिणो वक्ष्यति । चकारात्प्रत्याकलितापरनामकमनुमानाख्यं प्रमाणं समुच्चिनोति । इति चतुर्विधलौकिके प्रमाणमुच्यते विचारकैरुपदिश्यते कर्तव्यतया । प्राक्तनचकारोऽत्राप्यन्वेति, तेनाऽलौकिकस्य शपथस्य दिव्यभिन्नतया नारदेनोक्तस्य समुच्चयः॥२२॥

(मिता०) 'ततोऽर्थी लेखयेत्सद्यः प्रतिज्ञातार्थसाधन'मित्युक्तं; किं तत्साधनमित्यपेक्षित आह—

प्रमाणमिति । प्रमीयते परिच्छिद्यतेऽनेनेति प्रमाणम् । तच्च द्विविधं मानुषं दैविकं चेति । तत्र मा(१)नुषं त्रिविधं लिखितं भुक्तिः साक्षिणश्चेति कीर्तितं महर्षिभिः । तत्र लिखितं द्विविधं शासनं चीरकं चेति । शासनमुक्तलक्षणम् । चीरकं तु व(२)क्ष्यमाणलक्षणम् । भुक्तिरुपभोगः । साक्षिणो वक्ष्यमाणस्व(३)रूपप्रकाराः । ननु लिखितस्य साक्षिणां च श(४)ब्दाभिव्यक्तिद्वारेण शब्देऽन्तर्भावाद्युक्तं प्रामाण्यम् । भुक्तेस्तु कथं प्रामाण्यम् । उच्यते—भुक्तिरपि कैश्चिद्विशे-षं(५)णैर्युक्ता स्वत्वहेतुभूताक्रियादिकमव्यभिचारादनुमापयन्त्यनुपपद्यमाना वा कल्पयन्त्यनु(६)मानेऽर्था(७)पत्तौ वाऽन्तर्भवतीति प्रमा-

(१) मानवं ख. । (२) वक्ष्यमाणमग्रे लेख्यप्रकरणे. ।

(३) स्वरूपं च प्रकारश्च वक्ष्यमाणौ येषाम्. तत्र प्रकारो भेदः स च दृष्टसाक्षिणः श्रुतसाक्षिण इत्येवमादिः ।

(४) लिपेः स्फोटकव्यञ्जकत्ववत्साक्षिणां ध्वनिद्वारा तदभिव्यञ्जकत्वात्स्वरूपतस्तेषामतत्त्वेऽपि तत्त्वातत्त्वमिति भावः. ।

(५) आसेधरहितत्वादिविशेषणैः. ।

(६) अनुमाने इति-क्षेत्रादिकमस्य क्रयादिप्राप्तम्, आसेधरहितत्वे सति चिरकालोपभुक्तत्वात् तदीयगृहादिवत् इत्यनुमानप्रयोगः ।

(७) तादृशी भुक्तिः स्वतोऽनुपपद्यमाना तादृशं तत्कल्पयतीत्यर्थापत्तिर्बोध्या: ।

णमेव । एषां लिखितादीनां त्रयाणामन्यतमस्याप्यभावे दिव्यानां वक्ष्यमाणस्वरूपभेदानामन्यतमं जातिदेशकालद्रव्याद्यपेक्षया प्रमाणमुच्यते । मानुषाभाव एव दिव्यस्य प्रामाण्यमस्मादेव वचनादवगम्यते । दिव्यस्य स्वरूपप्रामाण्ययोरागमगम्यत्वात् । अतश्च यत्र परस्परविवादेन युगपद्धर्माधिकारिणं प्रति योरेको मानुषीं क्रियामपरस्तु दैवीमवलम्बते तत्र मानुष्येव ग्राह्या । यथाह कात्यायनः-'यद्येको मानुषीं ब्रूयादन्यो ब्रूयात्तु दैविकीम् । मानुषीं तत्र गृह्णीयान्न तु दैवीं क्रियां नृपः' ॥ इति । यत्रापि प्र(१)धानैकदेशसाधनं मानुषं सम्भवति तत्रापि न दैवमाश्रयणीयम् । यथा-रूपकशतमनया वृद्ध्या गृहीत्वायं न प्रयच्छतीत्यभि(२)योगापन्हवे ग्रहणे साक्षिणः सन्ति नो संख्यायां वृद्धिविशेषे वा, अतो दिव्येन भावयामीत्युक्ते तत्रैकदेशविभावितन्यायेनापि (३)संख्यावृद्धिविशेषसिद्धेन दिव्यस्यावकाशः । उक्तं च कात्यायनेन-'यद्येकदेशव्याप्तापि क्रिया विद्येत मानुषी । सा ग्राह्या न तु(४)पूर्णापि दैविकी (५)वदतां नृणाम्' ॥ इति । यत्तु-'गूढसाहसिकानां तु प्राप्तं दिव्यैः परीक्षणम्' इति, तदपि मानुषासम्भवकृतनियमार्थम् । यदपि नारदेनोक्तम्-'अरण्ये निर्जने रात्रावन्तर्वेश्मनि साहसे । न्यासस्यापह्नवे चैव दिव्या सम्भवति क्रिया' ॥ इति । तदपि (६)मानुषासम्भव एव । तस्मान्मानुषाभाव एव दिव्येन निर्णय इत्यौत्सर्गिकम् । अस्य चापवादो दृश्यते-'प्रकान्ते साहसे वादे पारुष्ये दण्डवाचिके । बलोद्भूतेषु कार्येषु साक्षिणो दिव्यमेव च' । इति । तथा लेख्यादीनामपि क्वचिन्नियमो दृश्यते । यथा-(७)'पूगश्रेणीगणादीनां या स्थितिः परिकीर्तिता । तस्यास्तु साधनं लेख्यं न दिव्यं न च साक्षिणः' ॥ तथा-'द्वारमार्गक्रि(८)याभोगजलवाहादिषु क्रिया । भुक्तिरेव तु गुर्वी स्यान्न दिव्यं न च साक्षिणः' ॥ तथा-'(९)दत्तादत्ते-

---

(१) अत्र समस्तस्य प्रधानैकदेश इति विग्रहः ।
(२) इति योऽभियोगस्तस्यापह्नवे परेण कृते सति ।
(३) संख्यावृद्धिविशेषयोः सिद्धेः । (४) पूर्वापि ग. ।
(५) वदतां वादिनां. दैवी विवदतां ख. । (६) मानुषसम्भवकृतनियमार्थमिति पाठः ।
(७) पूगादीनां विवरणमग्रे ३० तमे पद्ये स्फुटम् ।
(८) आभोगः परिणाहः-तेन च परिणाहवदङ्गणादिकं लक्ष्यते जलवाहो जलनिगर्ममार्गः ।
(९) दत्तेति बहुवचनान्तर्यार्द्वन्द्वः दत्तादत्तं विद्यते येषु दत्तापदानिकाख्यविवादपदेषु ।

ऽथ भृत्यानां स्वामिनां निर्णये सति। वि(१)क्रयादानसम्बन्धे क्रीत्वा धनमनिच्छति । द्यूते (२)समाह्वये चैव विवादे समुपस्थिते । साक्षिणः साधनं प्रोक्तं न दिव्यं न च लेख्यकम्' ॥ इति ॥ २२ ॥

(वी०मि०) 'पूर्वपक्षेऽधरीभूते' इत्यनेन बलवत्युत्तरे प्रतिवादिनः क्रियेत्युक्तम् , तत्रोत्तरस्य विषयभूतक्रियाबलवत्त्वादेव बलवत्त्वमिति क्रियाबलवत्त्वं दर्शयति—

सर्वेष्वेव (३)विवादेषु बलवत्युत्तरा क्रिया ॥
आधौ प्रतिग्रहे क्रीते पू(४)र्वैव बलवत्तरा ॥ २३ ॥

सर्वेषु ऋणादानविषयेषु विवादेषु द्वयोः क्रिययोर्वादिप्रतिवादिभ्यां स्वस्वार्थसाधनायापन्यस्तयोर्मध्ये या उत्तरकालीना सा बलवती, तेन यत्रैकेनोक्तं मत्तः ऋणमनेन गृहीतमिति मदीयं धारयतीति, अपरेण वाऽभिहितं गृहीतमेव परन्तु(?) परिशोधनक्रिया बलवती । एवं यत्र काकिनीरूपवृद्धिव्यवस्थया प्रथममृणं गृहीतं पश्चात्तु पणव्यवस्थया तदेव केनापि हेतुना स्थाप्यते तत्रोत्तरा व्यवस्था बलवती । एवमेकस्मिन्निक्षिप्तं द्रव्यं परस्मिन् यत्र निक्षिप्तं तत्र परस्मिन्निक्षेपो बलवानित्याद्यप्यूह्यम् । एवकार उत्तरेत्यनन्तरं योज्यः, तेन पूर्वायास्तत्तुल्यबलवत्त्वं व्यवच्छिन्नम् । एवं पूर्वैवेत्यत्राप्येवकारो व्याख्येयः । क्वचित्तु सर्वेष्वर्थेति पूर्वा त्विति च पाठः । अत्रापवादमाह-आधौ आधीकरणे प्रतिग्रहे क्रयणे च पूर्वोत्तत्सजातीया बलवती । साजात्यं च यथेष्टविनियोगप्रतिबन्धकत्वस्वत्वध्वंसकत्वाभ्याम्। एवं यत्रैकस्मिन्नाधीकरणानन्तरं परस्मिन्नाधीकरणं तत्र पूर्वमाधीकरणं बलवत् । यत्र चैकेन प्रतिगृहीते क्रीते वा परेण ग्रहादिः स्वत्वोपायः कृतः, तत्र प्रथमप्रतिग्रहादिर्बलवानिति पर्यवसितार्थः । आध्यपेक्षया स्वत्वध्वंसको विक्रयादिः पूर्वकालीन उत्तरकालीनो वा बलवानेव स्यात् । एवं स्वामिनो यथेष्टविनियोगाप्रतिबन्धकनिक्षेपापेक्षया पूर्वकालीन उत्तरकालीनो वा यथेष्टविनियोगप्रतिबन्धक आधिर्बलवानित्यूह्यम् । तदेवाह रत्नाकरे नारदः—

---

(१) विक्रीयासम्प्रदानाख्ये । (२) समाह्वयः प्राणिद्यूतम् ।
(३) सर्वेष्वर्थवि०-इति मुद्रितपुस्तके पाठः । (४) पुर्वा तु-इति मुद्रितपुस्तके पाठः ।

न्यासं कृत्वा परस्यार्धिं कृत्वा चार्धिं करोति यः ।
चिक्रयं वा क्रिया तत्र पश्चिमा बलवत्तरा ॥

इति ॥ २३ ॥

(मिता०) (१)उभयत्र प्रमाणसद्भावे प्रमाणगतबलाबलविवेके चासति पूर्वापरयोः कार्ययोः कस्य बलीयस्त्वमित्यत आह-सर्वेष्विति । ऋणादिषु सर्वेष्वर्थविवादेषु उत्तरा क्रिया क्रियत इति कार्यं बलवती । उत्तरकार्ये साधिते तद्ग्राही विजयी भवति । पूर्वकार्ये सिद्धेऽपि तद्ग्राही पराजीयते । तद्यथा-कश्चिद् ग्रहणेन धारणं साधयति कश्चित्प्रतिदानेनाधारणं, तत्र ग्रहणप्रतिदानयोः प्रमाणसिद्धयोः प्रतिदानं बलवदिति प्रतिदानवादी (२)जयी भवति। तथा पूर्वं द्वि(३)कं शतं गृहीत्वा कालान्तरे त्रिकं शतमङ्गीकृतवान् तत्रोभयत्र प्रमाणसद्भावेऽपि त्रिकशतग्रहणं बलवत् । पश्चाद्भावित्वात्पूर्वाबाधेनानुत्पत्तेः । उक्तं च-'पूर्वाबाधेन नोत्पत्तिरुत्तरस्य हि लेत्स्यति' इति ॥

(मिता०) अस्यापवादमाह—

आधाविति । आध्यादिषु त्रिषु पूर्वमेव कार्यं बलवत् । तद्यथा-एकमेव क्षेत्रमेकस्यार्धिं कृत्वा किमपि गृहीत्वा पुनरन्यस्याप्याधाय किमपि गृह्णाति तत्र पूर्वस्यैव तद्भवति नोत्तरस्य । एवं प्रतिग्रहे क्रये च । नन्वाहितस्य तदानीमस्वत्वात्पुनराधानमेव न सम्भवति । एवं दत्तस्य क्रीतस्य च दानक्रयौ नोपपद्येते तस्मादिदं वचनमनर्थकम् । उच्यते-अस्वत्वेऽपि यदि मोहात्कश्चिल्लोभाद्वा पुनरुधानादिकं करोति तत्र पूर्वं बलवदिति न्यायमूलमेवेदं वचनमित्यचोद्यम्॥२३॥

(वी०मि०) प्रमाणान्युक्तानि लिखितमित्यादिना । तत्राऽनुमानरूपं प्रमाणं प्रपञ्चितं साक्षिरूपं च विस्तरेणाऽग्रे वक्ष्यतीति सूचीकटाहन्यायेन भुक्तिरूपं प्रमाणं प्रपञ्चयति षड्भिः श्लोकैः—

पश्यतोऽब्रुवतो हानिर्भूमेर्विंशतिवार्षिकी ॥
परेण भुज्यमानाया धनस्य दशवार्षिकी ॥ २४ ॥
आधिसीमोपनिक्षेपजडबालधनैर्विना ॥
तथोपनिधिराजस्त्रीश्रोत्रियाणां धनैरपि ॥ २५ ॥

---

(१) वादिप्रतिवाद्युक्तयोः ।
(२) जयति ख० । (३) द्वे वृद्धिर्यस्य तद्द्विकम् 'तदस्मिन्' इति कन् ।

आध्यादिभिर्विना स्वस्य पश्यतोऽपि मदीयेयं भूरिति अब्रुवतो मोक्तरि वचनमकुर्वतः परेण स्वभिन्नेन भुज्यमानाया भूमेर्विंशतिवार्षिकी विंशतिवर्षैर्नैरन्तर्य्येण भोगवद्भिर्निवृत्ता हानिः । स्वस्य स्वत्वप्रमितिधनस्य गवादेस्तु भुक्तिविषयस्य दशवार्षिकी हानिरिति विशेषः । हानिर्वधः । सीमा ग्रामादिमर्यादा, उपनिक्षेपः परस्य समीपे सङ्ख्यादिना परिच्छिन्नं समर्पितं वस्तु, जडस्य मन्दमतेः, बालस्य षोडशवर्षाभ्यन्तरवयस्कस्य वा, धनं गोभूम्यादि; उपनिधेर्भाण्डस्थानामपरिच्छिन्नानां राज्ञः स्त्रियाः श्रोत्रियस्य च सम्बन्धीनि धनानि । अपिशब्देन--

विवाह्य श्रोत्रियैर्भुक्तं राजामात्यैस्तथैव च ।
स्वदीर्घेणाऽपि कालेन तेषां सिध्यति तत्तु न ॥

इति बृहस्पत्युक्तं समुच्चिनोति ॥ २४-२५ ॥

(मिता०) भुक्तेः कैश्चिद्विशे(१)षणैर्युक्तायाः प्रामाण्यं दर्शयिष्यन् कस्याश्चिद् भुक्तेः कार्यान्तरमाह—

पश्यत इति । परेणासम्ब(२)न्धेन भुज्यमानां भुवं धनं वा प(३)श्यतः अब्रुवतः मदीयेयं भूः न त्वया भोक्तव्येत्यप्रतिषेधयतः तस्या भूमेर्विंशतिवार्षिकी अप्र(४)तिरवं विंशतिवर्षोपभोगानिमित्ता हानिर्भवति । धनस्य तु हस्त्यश्वादेर्दशवार्षिकी हानिः । नन्वेतदनुपपन्नम् । न ह्यप्रतिषेधात्स्वत्वमपगच्छति अप्रतिषे(५)द्धस्य दानविक्रयादिवत्स्वत्वनिवृत्तिहेतुत्वस्य लोकशास्त्रयोरप्रसिद्धत्वात् । नापि विंशतिवर्षोपभोगात्स्व(६)त्वम् । उपभोगस्य स्वत्वे (७)प्रमाणत्वात्, (८)प्रमाणस्य च प्रमेयं प्रत्यनुत्पादकत्वात्, रिक्थक्रयादिषु स्वत्वकारकहेतुष्वपाठाच्च । तथा हि-'(९)स्वामी रिक्थक्रयसंविभागपरिग्रहाधिग-

(१) कैश्चित् आसेधराहितत्वाचिरकालत्वादिभिः । (२) असंबद्धेनेति पाठः ।
(३) पश्यतः वादिनः । (४) अशब्दं यथातथेत्यर्थः । (५) अप्रतिषिद्धस्य ख० ।
(६) स्वत्वम् । उत्पद्यत इतिशेषः । (७) तस्य स्वत्वविषयकप्रमितिजनकत्वादित्यर्थः ।
(८) प्रमाणस्य = उपभोगस्य प्रमेयं = स्वत्वं प्रति ।
(९) स्वामीति रिक्थादिषु पञ्चसु सत्सु स्वामी भवति । अप्रतिबन्धो दायो रिक्थं, सप्रतिबन्धः सविभागः, क्रयः प्रसिद्धः, अरण्यादिष्वनन्यपरिगृहीततृणकाष्ठादिस्वीकरणं परिग्रहः निध्यादिप्राप्तिरधिगमः, इमे सर्वसाधारणस्वत्वकारकहेतवः । असाधारणस्तु ब्राह्मणस्य प्रतिग्रहादिना लब्धं, क्षत्रस्य परराजयेन लब्धं, वैश्यशूद्रयोः निर्विष्टं=भोगरूपेण, भृतिरूपेण वा लब्धं तदाधिकं=असाधारणं स्वत्वजनकम् ।

मेषु ब्राह्मणस्याधिकं लब्धं, क्षत्रियस्य विनिर्जि(१)तं, निर्विष्टं वैश्यशूद्रयोः' इत्यष्टावेव स्वकारकहेतून् गौतमः पठति न भोगम्। (२)न चेदमेव वचनं विंशतिवर्षोपभोगस्य स्वत्वोत्पत्तिहेतुत्वं प्रतिपादयतीति युक्तम्। स्वत्वस्य स्वत्वहेतूनां च लोकप्रसिद्धत्वेन शास्त्रैकसमधिगम्यत्वाभावात्। एतच्च विभागप्रकरणे निपुणतरमुपपादयिष्यते। गौतमवचनं तु नियमार्थम्। अपि च-'अनागमं तु यो भुङ्क्ते बहून्यब्दशतान्यपि। चौरदण्डेन तं पापं दण्डयेत्पृथिवीपतिः'॥ इत्येतदनागमोपभोगस्य स्वत्वहेतुत्वे विरुध्यते। न च-'अनागमं तु यो भुङ्क्ते' इत्येतत्परोक्षभोगविषयम्। पश्यतोऽब्रुवत इति प्रत्यक्षभोगविषयमिति युक्तं वक्तुम्। अनागमं तु यो भुङ्क्ते इत्यविशेषाभिधानात्, 'नोपभोगे बलं कार्यमार्हत्यं तत्सुतेन वा। पशुस्त्रीपुरुषादीनामिति धर्मो व्यवास्थितः'॥ इति कात्यायनवचनाच्च। समक्षभोगे च हानिकारणाभावेन हानेरसम्भवात्। न चैतन्मतव्यम्-आधिप्रतिग्रहक्रयेषु पूर्वस्याः क्रियायाः प्राबल्यादपवादेन भूविषये विंशतिवर्षोपभोगयुक्तायाः, धनविषये दशवर्षोपभोगयुक्ताया (३)उत्तरस्याः क्रियायाः प्राबल्यमनेनोच्यत इति। यतस्ते(४)पूर्वैरेव क्रिया तत्त्वतो नोपपद्यते (५)स्वमेव ह्याधेयं देयं विक्रेयं च भवति। न चाहितस्य तत्तस्य विक्रीतस्य वा स्वत्वमस्ति। (६)अस्वस्य दाने प्रतिग्रहे च दण्डः स्मर्यते-'अदेयं यश्च गृह्णाति यश्चादेयं प्रयच्छति। उभौ तौ चौरवच्छास्यौ दाप्यौ चोत्तमसाहसम्'॥ इति। तथाध्यादीनां त्रयाणामपवादत्वेऽस्य श्लोकस्याधिसीमादीनामुत्तरश्लोकेऽ(७)पवादो नोपपद्यते। तस्माद् भूम्यादीनां (८)हानिरनुपपन्नैव। नापि व्यवहारहानिः। यतः-'उपेक्षां कुर्वतस्तस्य(९) तूष्णींभूतस्य तिष्ठतः। काले विपन्ने पूर्वोक्ते व्यवहारो न सिध्यति'॥ इति नारदेनोपेक्षा(१०)लिङ्गाभावकृता व्यवहारहानिरुक्ता न तु वस्त्वभावकृता। तथा मनुनापि-'अजडश्चेदपौगण्डो विषय(११)श्चास्य भुज्यते। भग्नं तद्व्यवहारेण

---

(१) विजितं घ०। (२) नचेदं वचनं ग०।
(३) उत्तरविषयक्रियायाः ख०। (४) तेषु आध्यादिषु। (५) स्वत्वविशिष्टमेव स्वयमेव घ०।
(६) अस्वत्वस्य ख०। (७) अपवादोऽपवादत्वम्। (८) स्वत्वहान्या स्वरूपहानिः।
(९) तस्य वादिनः (१०) उपेक्षायां यानि लिङ्गानि जडत्वबालत्वादीनि तेषां योऽभावस्तत्कृता।
(११) विषयो देशः, अस्य धनिनः विषये चास्य भुञ्जते इति घ० पाठः।

भोक्ता तद्धनमर्हति' ॥ इति व्यवहारतो भङ्गो दर्शितो न वस्तुतः । व्यवहारभङ्गश्चैवम्-भोक्ता किल वदति 'अजडोऽयमपौगण्डोऽवालोऽयमस्य संनिधौ विंशतिवर्षाण्यप्रतिरवं मया भुक्तं तत्र बहवः साक्षिणः सन्ति । यद्यस्य स्वमन्यायेन मया भुज्यते तदायं किमित्येतावन्तं कालमुदास्ते' इति, तत्र चायं निरुत्तरो भवतीति । एवं निरुत्तरस्यापि वास्तवो व्यवहारो भवत्येव । 'छलं निरस्य भूतेन व्यवहारान्नयेन्नृपः' इति नियमात् । (१)अथ मतम् । यद्यपि न वस्तुहानिर्नापि व्यवहारहानिस्तथापि पश्यतोऽप्रतिषेधतो व्यवहारहानिशङ्का भवतीति तन्निवृत्तये तूष्णीं न स्थातव्यमित्युपदिश्यत इति । तच्च न (२)स्मार्तकालाया भुक्तेर्हानिशङ्काकारणत्वाभावात्, तूष्णीं न स्थातव्यमित्येतावन्मात्राभिधित्सायां विंशतिग्रहणमविवक्षितं स्यात्। अथोच्यते-'विंशतिग्रहणमूर्ध्वं पत्रदोषोद्भावननिराकरणार्थम् । यथाह कात्यायनः-'शक्तस्य संनिधावर्थो यस्य लेख्येन भुज्यते । विंशतिवर्षाण्यतिक्रान्तं तत्पत्रं दोषवर्जितम्' ॥ इति । तदपि न । आध्यादिष्वपि विंशतेरूर्ध्वं पत्रदोषोद्भावननिराकरणस्य (३)समत्वेनाधिसीमेत्याद्यपवादासम्भवात् । यथाह कात्यायनः—'अथ विंशतिवर्षाणि आधिर्भुक्तः सुनिश्चितः । तेन लेख्येन तत्सिद्धिर्लेख्यदोषविवर्जिता' ॥ तथा-'सीमाविवादे निर्णीते सीमापत्रं विधीयते । तस्य दोषाः प्रवक्तव्या यावद्वर्षाणि विंशतिः' ॥ इति । एतेन धनस्य दशवार्षिकीत्येतदपि प्रत्युक्तम् । तस्मादस्य श्लोकस्य (४)सत्योऽर्थो वक्तव्यः । उच्यते-भूमेर्धनस्य च फलहानिरिह(५) विवक्षितो न वस्तुहानिर्नापि व्यवहारहानिः । तथा हि-निराक्रोशं विंशतिवर्षोपभोगादूर्ध्वं यद्यपि स्वामी न्यायतः क्षेत्रं लभते तथापि (६)फलानुसरणं न लभते । अप्रतिषेधलक्षणात्स्वापराधादस्माच्च वचनात्। परोक्षभोगे तु विंशतेरूर्ध्वमपि फलानुसरणं लभत एव, पश्यत इति वचनात् । प्रत्यक्षभोगे च साक्रोशे, अब्रुवत इति वचनात् । विंशतेः प्राक् प्रत्यक्षे निराक्रोशे च लभते विंशतिग्रहणात् । ननु तदुत्पन्नस्यापि फलस्य स्वत्वात्तद्धानिरनुपपन्नैव । बाढम् । तस्य स्वरूपाविनाशेन तथैवा-

---

(१) अथ मतमित्यन्यथा व्याख्यानम् । (२) स्मरणविषयतायोग्यकालिकायाः ।
(३) समत्वेनापवादासंभवात् ख. । (४) सत्योऽर्थो निर्दुष्टोऽर्थः, सभ्योन्योर्थो ग. पाठः ।
(५) इह पश्यत इत्यत्र वचने. । (६) तावत्पर्यन्तं ततस्तेन लब्धेत्यादिः ।

वस्थानं यथा तदुत्पन्नपूगपनसवृक्षादीनां यत्पुनस्तदुत्पन्नमुपभोगान्नष्टं तत्र स्वरूपनाशादेव स्वत्वनाशे-'अनागमं तु यो भुङ्क्ते बहून्यब्दशतान्यपि । चौरदण्डेन तं पापं दण्डयेत्पृथिवीपतिः' ॥ इत्यनेन वचनेन निष्क्रयरूपेण गणयित्वा चौरवत्तत्समं द्रव्यदानं(१)प्राप्तं, हानिर्विंशतिवार्षिकीत्यनेनापो(२)द्यते । राजदण्डः पुनरस्त्येव विंशतेरूर्ध्वमपि, (३)अनागमोपभोगादपवादाभावाच्च । तस्मात्स्वाम्युपेक्षालक्षणस्वापराधादस्माच्च वचनाद्विंशतेरूर्ध्वं फलं नष्टं न लभत इति स्थितम् । एतेन धनस्य दशवार्षिकीत्येतदपि व्याख्यातम् ॥ २४ ॥

(मिता०) अस्यापवादमाह--

आधिसीमेत्यादि । अधिश्च सीमा च उपनिक्षेपश्च आधिसीमोपनिक्षेपाः । जडश्च बालश्च जडबालौ तयोर्धने जडबालधने आधिसीमोपनिक्षेपाश्च जडबालधने च आधिसीमोपनिक्षेपजडबालधनानि तैर्विना । उपनिक्षेपो नाम रूपसंख्याप्रदर्शनेन रक्षणार्थं परस्य हस्ते निहितं द्रव्यम् । यथाह नारदः--'(४)स्वं द्रव्यं यत्र विस्रम्भान्निक्षिपत्यविशङ्कितः । निक्षेपो नाम तत्प्रोक्तं व्यवहारपदं बुधैः' ॥ इति । उपनिधानमुपनिधिः । आध्यादिषु पश्यतोऽश्रुवतोऽपि भूमेर्विंशतेरूर्ध्वं धनस्य च दशभ्यो वर्षेभ्य ऊर्ध्वम(५)प्युपचयहानिर्न भवति । पुरुषापराधस्य तथाविधस्याभावात् । उपेक्षाकारणस्य तत्र(६) तत्र संभवात् । तथा हि-आधेराधि(७)त्वोपाधिक एव भाग इत्युपेक्षायामपि न पुरुषापराधः । सीम्नश्चिरकृततुषाङ्गारादिचिह्नैः सुसाध्यत्वादुपेक्षा सम्भवति । उपनिक्षेपोपनिध्योर्भुक्तेः प्रतिषिद्धत्वात्, प्रतिषेधातिक्रमोपभोगे च (८)सोदयफललाभादुपेक्षोपपत्तिः । जडबालयोर्जडत्वाद्बालत्वादुपेक्षा युक्तैव । राज्ञो बहुकार्यव्याकुलत्वात् । स्त्रीणामज्ञानादप्रागल्भ्याच्च । श्रोत्रियस्याध्ययनाध्यापनतदर्थविचारानुष्ठानव्याकुलत्वादुपेक्षा युक्तैव । तस्मादाध्यादिषु सर्वत्रोपेक्षाकारणसम्भवात्समक्षभोगे निराक्रोशे च न कदाचिदपि फलहानिः ॥ २५ ॥

---

(१) प्राप्तं, तत् द्रव्यदानम् । (२) अपोद्यते बाध्यते ।
(३) स्वत्वहेतुः प्रतिग्रहक्रयादिरागमः ।
(४) यत् स्वं द्रव्यं यत्र परहस्ते विस्रम्भाद्विश्वासान्निक्षिपति । (५) उपचयहानिः फलहानिः ।
(६) तत्र तत्र आध्यादिषु । (७) आधित्वनिमित्तकः-इति पाठः । (८) सोदयफलभावात् घ. ।

(वी०मि०) आध्यादीनामुक्तानां भोगबलेन केवलं न भोक्तुः स्वत्वासिद्धिमात्रं किं तु तद्भोगबलेनापहर्तुर्दण्डोऽपीत्याह—

आध्यादीनां विहर्तारं धनिने दापयेद्धनम् ॥
दण्डं च तत्समं राज्ञे शक्त्यपेक्षमथापि वा ॥ २६ ॥

आध्यादीनां विशेषतः स्वामिवत् हर्तारं यथेष्टं विनियुञ्जानं धनिने आध्यादिस्वामिने धनमाध्यादिरूपं विवादास्पदं दापयेद्विचारकः । तत्समं स्वरूपतो मूल्यतो वाऽऽध्यादिसमानमथवाऽपहर्तुः शक्त्यनुसारिणं अल्पधनत्वे ततोऽल्पमधिकधनत्वे ततोऽप्यधिकं दण्डं राज्ञे दापयेत् । चकारेण धनसामान्यशून्यस्य देशनिष्कासनादिसमुच्चयः । अथापि वेत्यव्ययसमुदायो विकल्पार्थः ॥ २६ ॥

(मिता०) आध्यादिषु दण्डविशेषप्रतिपादनार्थमाह—

आध्यादीनामिति । आध्यादीनां श्रोत्रियद्रव्यपर्यन्तानां चिरकालोपभोगबलेनाऽपहर्तारं विवादास्पदीभूतं धनं स्वामिने दापयेदित्यनुवादः । दण्डं च तत्समं विवादास्पदीभूतद्रव्यसमं राज्ञे दापयेदिति विधिः(१) । यद्यपि गृहक्षेत्रादिषु तत्समो दण्डो न सम्भवति तथापि—'मर्यादायाः प्रभेदे च सीमातिक्रमणे तथा' इत्यादिवक्ष्यमाणो दण्डो द्रष्टव्यः । अथ तत्समदण्डेनापहर्तुर्दमनं न भवति बहुधनत्वेन, तदा शक्त्यपेक्षं धनं दापयेत् । यावता तस्य दर्पोपशमो भवति तावद्दापयेत् । 'दण्डो दमनादित्याहुस्तेनादान्तान्दमयेत्' इति दण्डग्रहणस्य दमनार्थत्वात् । यस्य तु तत्सममपि द्रव्यं नास्ति सोऽपि यावता पीड्यते तावद्दाप्यः । यस्य पुनः किमपि धनं नास्ति असौ धिग्दण्डादिना दमनीयः । तथा च मनुः—'धि(२)ग्दण्डं प्रथमं कुर्याद्वाग्दण्डं तदनन्तरम् । तृतीयं धनदण्डं तु वधदण्डमतः परम्' ॥ इति वधदण्डोऽपि शारीरो ब्राह्मणव्य(३)तिरिक्तानां (४)दशधा दर्शितः । तथाह मनुः (८।१२५)–'दश स्थानानि दण्डस्य मनुः स्वायंभुवोऽब्रवीत् । त्रिषु वर्णेषु यानि स्युरक्ष(५)तो ब्राह्मणो व्रजेत् ॥

---

(१) विधिः प्राड्विवाकादेरिति शेषः ।

(२) धिग्दण्डो धिगिति कुत्सनम्, वाग्दण्डः परुषवाक्यवचनात्मकः, धनदण्डो धनापहारः, वधदण्ड शारीरो बन्धरोधादिजीवितवियोगान्तः । (३) व्यतिरिक्ताना तु इति पाठः ।

(४) नवधा इति क्वचित्पाठः । (५) अक्षत शारीरमकलवधदण्डरहितः ।

उपस्थमुदरं जिह्वा हस्तौ पादौ च पञ्चमम् । चक्षुर्नासा च कर्णौ च धनं देहस्तथैव च' ॥ इति । एतेषां यन्निमित्तापराधस्तत्रैवोपस्थादौ निग्रहः कार्य इति द्रष्टव्यम् । कर्म वा कारयितव्यो बन्धनागारं वा प्रवेशयितव्यः । यथोक्तं कात्यायनेन-'धनदानासहं बुद्ध्वा स्वाधीनं कर्म कारयेत् । अशक्तौ बन्धनागारं प्रवेश्यो ब्राह्मणादृते' ॥ इति । ब्राह्मणस्य पुनर्द्रव्याभावे कर्मवियोगादीनि प्रयोज्यानि । यथाह गौतमः-(१)कर्मावियोगविख्यापननिर्वासनाङ्कनकरणादीन्यवृत्तौ' । इति । नारदेनापि-'वधः(२) सर्वस्वहरणं पुरान्निर्वासनाङ्कने । (३)तदङ्गच्छेद इत्युक्तो दण्ड उत्तमसाहसः ॥ अविशेषेण सर्वेषामेष दण्डविधिः स्मृतः' ॥ इत्युक्त्वोक्तम्—'वधादृते ब्राह्मणस्य न वधं ब्राह्मणोऽर्हति' ॥ इति । 'शिरसो मुण्डनं दण्डस्तस्य निर्वासनं पुरात् । ललाटे चाभिशस्ताङ्कः प्रयाणं गर्दभेन च' ॥ इति । अङ्कने च व्यवस्था दर्शिता-'गुरुतल्पे भगः कार्यः सुरापाने सुराध्वजः । स्तेये तु श्वपदं कार्यं ब्रह्महण्याशिराः पुमान्' ॥ इति । यत्तु 'चक्षुर्निरोधो ब्राह्मणस्य' इत्यापस्तम्बवचनं, ब्राह्मणस्य पुरान्निर्वासनसमये वस्त्रादिना चक्षुर्निरोधः कर्तव्य इति तस्यार्थो न तु चक्षुरुद्धरणम् । 'अक्षतो ब्राह्मणो व्रजेत्' 'न शारीरो ब्राह्मणे दण्डः' इत्यादिमनुगौतमादिवचनविरोधादित्यलं प्रसङ्गेन ॥ २६ ॥

(वी० मि०) आगमविनाकृतस्त्रिपुरुषभोगातिरिक्तो भोगो न प्रमाणं किन्त्वागमसहित एवेत्याह—

आग(४)मेऽभ्यधिको भोगाद्विना पूर्वक्रमागतात् ॥
आग(५)मेऽपि बलं नैव मुक्तिः स्तोकापि यत्र नो ॥२७॥

पूर्वेषां पित्रादीनां त्रयाणां पुरुषाणां क्रमेणागतात् प्राप्ताद्विना यो भोगस्तस्मादभ्यधिकस्तद्भिन्नस्तदङ्गभूः । आगमः क्रयप्रतिग्रहादिः । आगच्छति स्वीभवत्यनेनेति व्युत्पत्तेः । अङ्गत्वलाभार्थमभीत्युक्तम् । नन्वेवमागमस्याऽवश्यमुपादेयत्वे स्वार्थसाधनाय भोगानुसरणं व्यर्थमित्याशङ्क्याह-यत्र विषये भूम्यादौ स्तोका त्रिपुंसभोगापेक्षया स्व-

---

(१) अवृत्तौ दुराचारे स्वव्यापारानिरोधान्यायप्रख्यापनादीनि ।
(२) वधः प्राणवियोगानुकूलो व्यापारः । (३)यदङ्गकृतोऽपराधस्तच्छेदः ।
(४) आगमोऽभ्यधिको भोगादिति मुद्रितपुस्तके पाठः ।
(५) आगमेऽपि बलं नैव-इति मुद्रितपुस्तके पाठः ।

लेपापि भुक्तिर्नो वर्तते तत्रागमोऽपि नैव बलं न साध्यार्थसाधकः । आगमे सत्त्वे साधितेऽपि विवादकालपर्यन्तं तदनुवृत्तेरसिद्धा तदर्थं भोगानुसरणमावश्यकमिति भावः । यद्यप्यागमो न पृथक् प्रमाणत्वेनोपदर्शितः, तथापि चकारसमुच्चितेऽनुमाने तदन्तर्भाव इत्यवधेयम् । त्रिपुरुषस्त्रिपुरुषस्यागमं विना कृतोपि भोगार्थसाधक इति वक्ष्यते ॥ २७ ॥

(मिता०) स्वत्वाव्यभिचारित्वेन भोगस्य स्वत्वे प्रामाण्यमुक्तम् । भोगमात्रस्य स्वत्वव्यभिचारित्वात्कीदृशो भोगः प्रमाणमित्यत आह—

आगम इति । स्वत्वहेतुः प्रतिग्रहक्रयादिः आगमः । स भोगाद्व्याधिको बलीयान् । स्वत्वबोधने भोगस्यागमसापेक्षत्वात् । यथाह नारदः-'आगमेन वि(२)शुद्धेन भोगो याति प्रमाणताम् । अविशुद्धागमो भोगः प्रामाण्यं नैव गच्छति' ॥ इति । न च भोगमात्रात्स्वत्वागमः । परकीयस्याप्यपहारादिनोपभोगसम्भवात् । अत एव-'भोगं के(३)वलतो यस्तु कीर्तयेन्नागमं क्वचित् । भोगच्छलापदेशेन विज्ञेयः स तु तस्करः' ॥ इति स्मर्यते । अतश्च सागमो दीर्घकालो निरन्तरो निराक्रोशः प्रत्यर्थिप्रत्यक्षश्चेति पञ्चविशेषणयुक्तो भोगः प्रमाणमित्युक्तं भवति । तथा च स्मर्यते-'सा(४)गमो दीर्घकालश्चाविच्छेदोऽप(५)रवोज्झितः । प्रत्यर्थिसंनिधानोऽपि परिभोगोऽपि पञ्चधा' ॥ इति । क्वचिच्चागमनिरपेक्षस्यापि भोगस्य प्रामाण्यमित्याह-विना पूर्वक्रमागतादिति । पूर्वेषां पित्रादीनां त्रयाणां क्रमः पूर्वक्रमः तेनागतो यो भोगस्तस्माद्विना आगमोऽभ्यधिक इति सम्बन्धः । (६)स पुनरागमादभ्यधिकः आगमनिरपेक्षः प्रमाणमित्यर्थः । तत्राप्यागमज्ञाननिरपेक्षो न सत्तानिरपेक्षः । सत्ता तु तेनैवा(७)वगम्यत इति वोद्धव्यम् । विना पूर्वक्रमागतादित्येतच्चाऽ(८)स्मार्तकालप्रदर्शनार्थम् । आगमोऽभ्यधिको भोगादिति च स्मार्तकालविषयम् । अतश्च

---

(१) उक्तं पूर्वं २४ श्लोके पश्यतोऽग्रवत इत्यत्र । (२) कापट्यरहितेन ।
(३) केवलम् । (४) सागमो विशुद्धागमसंहितः, अविच्छेदो निरन्तरः, अपरवोज्झितो निरनुक्रोशः ।
(५) अपरिवर्जित इति पाठः । (६) स पूर्वक्रमागतो भोगः ।
(७) विशिष्टेनोपभोगेनैव । (८) स्मार्तः स्मरणयोग्यकालः ।

स्मरणयोग्ये काले योग्यानुपलब्ध्या आगमाभावनिश्चयसम्भवादागमज्ञानसापेक्षस्यैव भोगस्य प्रामाण्यम् । अस्मार्ते तु काले योग्यानुपलब्ध्यभावेनागमाभावनिश्चयासम्भवादागमज्ञाननिरपेक्ष एव सन्ततो भोगः प्रमाणम् । एतदेव स्पष्टीकृतं कात्यायनेन—'स्मार्तकाले क्रि(२)या भूमेः सागमा भुक्तिरिष्यते । अस्मार्तेऽनुगमाभावात्क्रमाच्त्रिपुरुषागता' ॥ इति । स्मार्तश्च कालो वर्षशतपर्यन्तः-'शतायुर्वै पुरुषः' इति श्रुतेः । अनुगमाभावादिति योग्यानुपलब्ध्यभावेनागमाभावनिश्चयाभावादित्यर्थः । अतश्च वर्षशताधिको भोगः सन्ततो(३)ऽप्रतिरवः प्रत्यर्थिप्रत्यक्षश्चागमाभावे चाऽनिश्चितेऽव्यभिचारादाक्षिप्तागमः स्वत्वं गमयति । अस्मार्तेऽपि काले ऽनागमस्मृतिपरम्परायां सत्यां न भोगः प्रमाणम् । अत एव-'अनागमं तु यो भुङ्क्ते वहून्यब्दशतान्यपि । चौरदण्डेन तं पापं दण्डयेत्पृथिवीपतिः' ॥ इत्युक्तम् । न च 'अनागमं तु यो भुङ्क्ते' इत्येकवचननिर्देशात् 'वहून्यब्दशतान्यपि' इत्यपिशब्दप्रयोगात्प्रथम(४)स्यैव पुरुषस्य निरागमे चिरकालोपभोगेऽपि दण्डविधानमिति मन्तव्यम्, द्वितीये तृतीये वा पुरुषे निरागमस्य भोगस्य प्रामाण्यप्रसङ्गात् । न चैतदिष्यते-'आदौ तु (५)कारणं दानं मध्ये भुक्तिस्तु सागमा' इति नारदस्मरणात् । तस्मात्सर्वत्र निरागमोपभोगे-'अनागमं तु यो भुङ्क्ते' इत्येतद् द्रष्टव्यम् । यदपि—'अन्यायेनापि यद् भुक्तं पित्रा पूर्वतरैस्त्रिभिः । न तच्छक्यमपाहर्तुं क्रमात्त्रिपुरुषागतम्' ॥ इति, तदपि पित्रा सह पूर्वतरैस्त्रिभिरिति योज्यम् । तत्रापि क्रमात्त्रिपुरुषागतमित्यस्मार्तकालोपभोगलक्षणम् । त्रिपुरुषविवक्षायामेकवर्षाभ्यन्तरेऽपि पुरुषत्रयातिक्रमसम्भवात् द्वितीये वर्षे निरागमस्य भोगस्य प्रामाण्यप्रसङ्गः । तथा सति-'स्मार्तकाले क्रिया भूमेः सागमा भुक्तिरिष्यते' इति स्मृतिविरोधः । 'अन्यायेनापि यद् भुक्तम्' इत्येतच्चान्यायेनापि भुक्तमपहर्तुं न शक्यं किंपुनरन्यायानिश्चये इति व्याख्येयमपिशब्दश्रवणात् । यच्चोक्तं हारीतेन-'यद्विनागममत्यन्तं (६)भुक्तं पूर्वैस्त्रिभिर्भवेत् । न तच्छक्यमपाहर्तुं क्रमात्त्रिपुरुषागतम्' ॥ इति । तत्राप्यत्यन्तमागमं

---

(१) योग्यत्वे सत्यनुपलब्धिर्योग्यानुपलब्धिस्तस्या अभावे न । (२) क्रिया प्रमाणम् ।
(३) निरनुक्रोशः । (४) प्रथमस्य पुरुषस्य ख. ।
(५) कारणं क्रिया प्रमाणमिति यावत् । (६) भुक्तं पूर्वतरैस्त्रिभिः इति पाठः ।

विनेति अत्यन्तमुपलभ्यमानमागमं विनेति व्याख्येयं, न पुनरागमस्वरूपं विनेति । आगमस्वरूपाभावे भोगशतेनापि न स्वत्वं भवतीत्युक्तम् । क्रमाच्चिपुरुषागतमित्येतदुक्ता(१)र्थम् । ननु स्मरणयोग्ये काले भोगस्यागमसापेक्षस्य प्रामाण्यमनुपपन्नम् । तथा हि—यद्यागमः प्रमाणा(२)न्तरेणावगतस्तदा तेनैव स्वत्वावगमान्न भोगस्य स्वत्वे आगमे वा प्रामाण्यम् । अथ प्रमाणान्तरेणागमो नावगतः कथं तद्विशिष्टो भोगः प्रमाणम् । उच्यते–प्रमाणान्तरेणावगतागमसहित एव निरन्तरो भोगः कालान्तरे स्वत्वं गमयति । अवगतोऽप्यागमो भोगरहितो न कालान्तरे स्वत्वं गमयि(३)तुमलम् । मध्ये दानविक्रयादिना स्वत्वापगमसम्भवादिति सर्वमनवद्यम् ॥

(मिता०) आगमसापेक्षो भोगः प्रमाणमित्युक्तं, आगमस्तर्हि भोगनिरपेक्ष एव प्रमाणमित्यत आह—

आगमेऽपीति । यस्मिन्नागमे स्वल्पापि भुक्तिर्भोगो नास्ति तस्मिन्नागमे बलं सम्पूर्णं नैवास्ति । अयमभिसन्धिः । स्वस्वत्वनिवृत्तिः परस्वत्वापादनं च दानम् । परस्वत्वापादनं च परो यदि स्वीकरोति तदा संपद्यते नान्यथा । स्वीकारश्च त्रिविधः–मानसो वाचिकः कायिकश्चेति । तत्र मानसो ममेदमिति सङ्कल्परूपः । वाचिकस्तु ममेदमित्याद्यभिव्याहारोल्लेखी सविकल्पकः प्रत्ययः । का(४)यिकः पुनरुपादानाभिमर्शनादिरूपोऽनेकविधः । तत्र च नियमः स्मर्यते–'दद्यात्कृष्णाजिनं पृष्ठे गां पुच्छे करिणं क(५)रे । केसरेषु तथैवाश्वं दासीं शिरसि दापयेत्' ॥इति । आश्वलायनोऽप्याह—'अनुम(६)न्त्रयेत प्राण्यभिमृशेद्धप्राणि कन्यां च' इति । तत्र हिरण्यवस्त्रादावुदकदानानन्तरमेवोपादानादिसंभवात् त्रिविधोऽपि स्वीकारः संपद्यते । क्षेत्रादौ पुनः फलोपभोगव्यतिरेकेण कायिकस्वीकारासंभवात्स्वल्पेनाप्युपभोगेन भवितव्यमन्यथा दानक्रयादेः संपूर्णता न भवतीति फलोपभोगलक्षणकायिकस्वीकारविकल आगमो दुर्बलो भवति तत्सहिता(७)दागमात् ।

---

(१) अस्मार्तकालोपक्षकत्वेनोक्तार्थकम् । (२) भोगान्येन प्रत्यक्षादिना ।
(३) अलं समर्थः ।
(४) कायिकस्तु ख. । (५) करे शुण्डादण्डे ।
(६) प्रतिग्राह्यो यदा प्राणी बलवान् वक्तुं समर्थस्तदा तं प्रतिग्राहं प्रतिगृहीता अनुमंत्रयेत ।
(७) सहितादागमाभावाद् ख. घ. ।

एतच्च द्वयोः पूर्वापरकालपरिज्ञाने । पूर्वापरकालपरिज्ञाने तु विगुणोऽपि पूर्वकालागम एव बलीयानिति । अथवा—'लिखितं साक्षिणो भुक्तिः प्रमाणं त्रिविधम्' इत्युक्तं, एतेषां समवाये कुत्र कस्य वा प्राबल्यमित्यत्रेदमुपतिष्ठते—'आगमोऽभ्यधिको भोगाद्विना पूर्वक्रमागतात् । आगमेऽपि बलं नैव भुक्तिः स्तोकापि यत्र नो' ॥ इति । अयमर्थः—आद्ये पुरुषे साक्षिभिर्भावित आगमो भोगादप्यधिको बलवान् । पूर्वक्रमागताद्भोगाद्विना । स पुनः पूर्वक्रमागतो भोगश्चतुर्थपुरुषे लिखितेन भावितादागमाद्बलवान् । म(१)ध्यमे तु भोगरहितादागमात्स्तोकभोगसहितोऽप्यागमो बलवानिति । एतदेव नारदेन स्पष्टीकृतम्—'आदौ तु कारणं दानं मध्ये भुक्तिस्तु सागमा । कारणं भुक्तिरेवैका सन्तता या चिरन्तनी' ॥ इति ॥ २७ ॥

(वी० मि०) क्वचिदन्यत्रापि केवलो भोगः प्रमाणमित्याह—

आगमस्तु कृतो येन सोऽभियुक्तस्तमुद्धरेत् ॥
न तत्सुतस्तत्सुतो वा भुक्तिस्तत्र गरीयसी ॥ २८ ॥

तेनागमः क्रयादिः कृतः स विचारेणाऽभियुक्त आगमप्रमापणाय नियुक्तः सन् तमागममुद्धरेत् प्रमापयेत् । तस्यागमकर्तुः सुतस्तस्यागमकर्तृसुतस्य सुतो वा न पितामहेन वा कृतमागमं नोद्धरेत् । तत्र तत्सुतादौ भुक्तिर्गरीयसी इतरनैरपेक्ष्येणार्थसाधिका । वाशब्दोऽनास्थायाम्, तेन प्रपौत्रादिसङ्ग्रहः । तत्रेति सप्तमी पष्ठ्यर्थे । तुशब्देन भोगं व्यवच्छिनत्ति, तत्रापि कृतस्याऽप्युद्धरणीयत्वात् ॥ २८ ॥

(मिता०) 'प्रश्यतोऽब्रुवत' इत्यत्र विंशतिवर्षोपभोगादूर्ध्वं भूमेर्धनस्यापि दशवर्षोपभोगादूर्ध्वं फलानुसरणं न भवतीत्युक्तम्, तत्र फलानुसरणवद्दण्डानुसरणमपि न भविष्यतीत्याशङ्क्य पुरुषव्यवस्थया प्रामाण्यव्यवस्थया च दण्डव्यवस्थां दर्शयितुमाह—

आगमस्त्विति । येन पुरुषेण भूम्यादेरागमः स्वीकारः कृतः स पुरुष कुतस्ते क्षेत्रादिकमित्यभियुक्तस्तस्यागमं प्रतिग्रह(२)दिकं लिखितादिभिरुद्धरेत् भा(३)वयेत् । अनेन चाऽऽद्यस्य पुरुषस्यागममनुद्धरतो दण्ड इत्युक्तं भवति । तत्सुतो द्वितीयोऽभियुक्तो नागममुद्धरेत्, किंतु

---

(१) केवलभोगस्य स्मार्तकालत्वात् स्वत्वे अप्रामाण्यात् ।

(२) प्रतिग्रहादेरिति ख. । (३) प्रतिपादयेत् ।

अविच्छिन्नाऽप्रतिरवसमक्षभोगम् । अनेन चाऽऽगममनुद्धरतो द्वितीयस्य न दण्डोऽपितु विशिष्टं भोगमनुद्धरतो दण्ड इति प्रतिपादितम् । तत्सुतस्तृतीयो नागमं नापि विशिष्टं भोगमुद्धरेदपितु क्रमागतं भोगमात्रम् । अनेनापि तृतीयस्य क्रमायातभोगानुद्धरणे दण्डो नागमानुद्धरणे न विशिष्टभोगानुद्धरणे चेत्यभिहितम् । तत्र तयोर्द्वितीयतृतीययोर्भुक्तिरेव गरीयसी । तत्रापि द्वितीये गुरुस्तृतीये गरीयसीति विवेक्तव्यम् । त्रिष्वप्यागमानुद्धरणेऽर्थहानिः समानैव, दण्डे तु विशेष इति तात्पर्यार्थः । उक्तं च हारीतेन-'आगमस्तु कृतो येन स दण्ड्यस्तमनुद्धरन् । न तत्सुतस्तत्सुतो वा भो(१)ग्यहानिस्तयोरपि' ॥ इति ॥ २८ ॥

(वी०मि०) अत्रापवादमाह--

योऽभियुक्तः परेतः स्यात्तस्य रिक्थी तमुद्धरेत् ॥

यतस्तादृशि स्थले आगमेन विनाकृता रहिता भुक्तिर्न कारणमर्थसिद्धेरिति शेषः । अत्र च--

सागमो दीर्घकालश्च निश्छिद्रोऽन्यरवोर्ज्जितः ।
प्रत्यर्थिसन्निधानश्च पञ्चाङ्गो भोग इष्यते ॥

इति पञ्चाङ्गो भोगः प्रमाणम् । तथा हि-आगमोऽभ्यधिक इत्यनेन सागमत्वं, विंशतिवार्षिकीत्यादिना दीर्घकालत्वं निश्छिद्रत्वं च, 'अश्रुवत' इत्यनेनाऽन्यरवोर्ज्जितत्वं, 'पश्यत' इत्यनेन प्रत्यर्थिसन्निधानत्वं च दर्शितम् । क्वचित् त्रिपुरुषभोगादौ सागमत्वं नाऽपेक्षितमित्युक्तम्, तत्र चिन्त्यते-आगमव्यतिरेकेण भोगप्रामाण्ये स्मृतिविरोधः तथा च नारदः--

अनागमं तु यो भुङ्क्ते बहून्यब्दशतान्यपि ।
चौरदण्डेन तं पापं दण्डयेत्पृथिवीपतिः ॥

तथा--

आगमेन विशुद्धेन भोगो याति प्रमाणताम् ।
अपि शुद्धागमो भोगः प्रामाण्यं नैव गच्छति ॥

इति । अत्रैवकारेण सिद्धस्य पुनरभिधानेन च सर्वत्र भोगस्यागमसापेक्षत्वमवगम्यत इति नैवम् । आगमव्यतिरेकनिश्चयपरत्वात्

(१) भोग्येति । भोग्यहानिरर्थहानिस्तदनुद्धरणे तयोर्द्वितीयतृतीययोरित्यर्थः ।

नारदवचनस्य । एवं च त्रिपुरुषभोगादेरागमसन्देहेऽपि प्रामाण्यम् ।
एतदेव चाऽभिप्रेत्याह स एव--

अन्यायेनापि यत् भुक्तं पित्रा पूर्वतरैस्त्रिभिः ।
न तच्छक्यमपाकर्तुं क्रमात्त्रिपुरुषागतम् ॥
यद्विनाप्यागमं पूर्वं भुक्तं पूर्वैस्त्रिभिर्भवेत् ।
न तच्छक्यमपाकर्तुं क्रमात्त्रिपुरुषागतम् ॥

व्यासश्च--

यद्विनागममत्यर्थं भुक्तं पूर्वैस्त्रिभिर्भवेत् ।
न तच्छक्यमपाकर्तुं क्रमात्त्रिपुरुषागतम् ॥
प्रपितामहेन यद्भुक्तं तत्पुत्रेण च तं विना ।
तौ विना यस्य पित्रा च तस्य भोगस्त्रिपूरुषः ॥
वर्षाणि विंशतिं भुक्त्वा स्वामिनाऽव्याहता सती ।
भुक्तिस्त्वापौरुषी भूमेर्द्विगुणी च द्विपौरुषी ॥
त्रिपौरुषी च त्रिगुणा न तत्रापेक्ष्य आगमः ।

एवं च विंशतिवर्षादिभुक्तिरागमनिश्चयसापेक्षैव प्रमाणमिति व्यवस्थितम् । नन्वेवमपि 'पश्यतोऽद्रुवतो हानि'रित्यादेरध्यासनात्समारभ्य 'भुक्तिर्यस्यापि घातिनी, त्रिंशद्वर्षाण्यविच्छिन्ना तस्य तां न विचालये'दिति वचनविरोधस्तदवस्थ एव । त्रिंशद्वर्षभुक्तेः प्रामाण्याभिधानेनाऽर्थतो विंशतिवर्षभुक्तेः प्रामाण्यनिरासादिति चेत् न, 'पश्यतोऽद्रुवत' इत्यादेर्नीरवभोगपरत्वात् बृहस्पतिवचनस्य च विघातिनीतिशब्देन कलहताडनादिरूपविघाताभावविशिष्टाया रवयुक्तायाऽपि भुक्तेः प्रामाण्यबोधकत्वात् । एवं च सर्वेषां वचनानां विषयभेदेन विरोधे परिहृतं दशवर्षादिभोगादीनां स्वत्वजनकत्वं तत्प्रमापकत्वं वा । नाद्यः प्रतिग्रहादेरिव भोगस्य सत्त्वहेतुत्वबोधकाभावात् । नान्त्यः भूयशोऽन्यायकृतभोगे व्याभिचारादिति । हन्तैवं त्रिपुरुषभोगेऽपि दीयतां दृष्टिः । यदि तु वचनबलात्तत्र छलव्यवहारेणैव निर्णयः । यद्वा त्रिपुरुषभोगप्रामाण्यप्रतिपादकवचनमेव तत्र स्वत्वोत्पत्तौ मानं तदा प्रकृतेऽपि तुल्यं, न त्वेवं षण्मासादिभोगोपि न्यायतौल्येन प्रमाणं स्यादिति चेत् न, वाचनिकेऽर्थे न्यायानवकाशादिति दिक् ॥ २९ ॥

(मिता०) अस्मार्तकालोपभोगस्यागमज्ञाननिरपेक्षस्य प्रामाण्यमुक्तं विनापूर्वक्रमागतादित्यत्र तस्यापवादमाह--

योऽभियुक्त इति। यदा पुनराहर्त्रादिरभियुक्तोऽकृतव्यवहारनिर्णय एव परेतः स्यात् परलोकं गतो भवेत्तदा तस्य रिक्थी पुत्रादिस्तमागममुद्धरेत्। यस्मात्तत्र तस्मिन्व्यवहारे भुक्तिरागमरहिता साक्ष्यादिभिः साधितापि न प्रमाणम्। पूर्वाभियोगेन भोगस्य सापवादत्वात्। नारदेनाप्युक्तम्-'तथा(१)ऽरूढविवादस्य प्रेतस्य व्यवहारिणः। पुत्रेण सोऽर्थः संशोध्यो न तं भोगो नि(२)वर्तयेत्' ॥ इति॥२९॥

(वी० मि०) अनिर्णीते व्यवहारे व्यवहर्तरि मृते व्यवहारः प्रवर्त्तत इत्युक्तमथ निर्णीते व्यवहारे जीवत्यपि व्यवहर्त्तरि क्वचिद्व्यवहारः प्रवर्त्तते क्वचिन्नेत्याह—

नृपेणाऽधिकृताः पूगाः श्रेणयोऽथ कुलानि च ॥
पूर्वं पूर्वं गुरु ज्ञेयं व्यवहारविधौ नृणाम् ॥ ३० ॥
बलो(३)पाधिविनिर्वृत्तान् व्यवहारान्निवर्तयेत् ॥
स्त्रीनक्तमन्तरागारबहिःशत्रुकृतांस्तथा ॥ ३१ ॥
मत्तोन्मत्तार्तव्यसनिबालभीतादियोजितः ॥
असम्बद्धकृतश्चैव व्यवहारो न सिद्ध्यति ॥ ३२ ॥

नृपेणाऽधिकृताः सभ्यरूपाः। पूगो भिन्नजातीयानां वणिगादीनां समूहः।

समूहो वाणिगादीनां पूगः स परिकीर्तितः।

इति कात्यायनवचनात्। श्रेणिर्नानाजातीनामेककर्मोपजीविनां समूहः। कुलं ज्ञातिसम्बन्धिबान्धवसमूहः। एषां मध्ये पूर्वं पूर्वमुत्तरोत्तरापेक्षया नृणां व्यवहारविधौ व्यवहारदर्शने गुरु बलवत्। तथा च सभ्यदृष्टो व्यवहारो दुष्टत्वशङ्कायामपि पूगादिभिर्न द्रष्टव्यः। कुलदृष्टस्तु व्यवहारः श्रेणिपर्यन्तेन द्रष्टव्य इति सिद्ध्यति। एवमन्यदूहनीयम्। अथशब्देन सर्वेषां राजनि सत्त्वपरत्वेन राज्ञः सर्वतो गुरुत्वं दर्शितम्। चशब्देन सभ्येभ्यः प्राड्विवाको गुरुरिति समुच्चीयते।

---

(१) तथाशब्दः पूर्वसमुच्चये। नवारूढ ख. ग.। (२) निवारयेत्. घ.।
(३) बलोपाधि--इति मुद्रितपुस्तके पाठः।

तथा च कात्यायनः—

कुलादिभ्योऽधिकास्तेभ्योऽध्यक्षः स्मृतोऽधिकः ।
सर्वेषामधिको राजा धर्म्मो यत्तेन निश्चितम् ॥
उत्तमाधममध्यानां विवादानां विचारणात् ।
उपर्युपरिबुद्धीनां चरन्तीश्वरबुद्धयः ॥

बलं महः उपधिर्भयलोभादिः ताभ्यां विनिर्वृत्तान्निष्पन्नान् स्त्रीभिर्नक्तं रात्रावस्त्रीभिरपि अन्तरागारे गृहाभ्यन्तरे बहिर्ग्रामादिभ्यो वनादौ शत्रुभिश्च कृतान् व्यवहारान्निवर्तयेत् न प्रमाणीकुर्यात् पुनर्विचारयेदिति यावत् । स्त्रीनक्तमन्तरागारबहिःशत्रूणां कृतमिति विग्रहः । षष्ठ्यर्थश्च भिन्नभिन्नरूपः सम्बन्धत्वेनोच्यते । स च यथायोगितप्रदर्शित एव । तथाशब्देन पुरराष्ट्रविरुद्धसमुच्चयः । मत्तो मद्यादिना, उन्मत्तो ग्रहादिकृतोन्मादयुक्तः, आर्तो व्याधिग्रस्तः, व्यसनी शोकादिपीडितः, बालः षोडशवर्षाभ्यन्तरवयस्कः, भीतो भयवान्, आदिपदेन कामक्रोधाद्याक्रान्तपरिग्रहः । एतैर्योजितः कृतोऽसम्बन्धेन भ्रातृत्वादिसम्बन्धरहितेनाऽनियुक्तेन कृतश्च व्यवहारो न सिध्यति न फलपर्याप्तो भवति । तथा च पुनस्तत्र विचारयेदिति तात्पर्यम् । चकारेण दासादिकृतसमुच्चयः । एवकारो नो सिध्यतीत्यत्राऽन्वेति, तेन कुलादिकृतस्य क्वचित्सिद्धावपि नैतादृशस्य क्वचिदपि सिद्धिरित्युक्तं भवति । अत्र व्यवहारो न न्यायमात्रं किन्तु दानविक्रयाधमनादिरूपाः सर्वाः क्रियाः ।

योगाधमनविक्रीतं योगदानप्रतिग्रहम् ।
यत्र चाप्युपधिं पश्येत्तत्कार्यं विनिवर्तयेत् ॥
बलाद्दत्तं बलाद् भुक्तं बलाद्यच्चापि लेखितम् ।
सर्वान् बलकृतानर्थानकृतान्मनुरब्रवीत् ।

नारदः—

यद् बालः कुरुते कार्यम(१)स्वतन्त्रस्तथैव च ।
अकृतं तदपि प्राहुः शास्त्रे शास्त्रविदो जनाः ॥
स्वतन्त्रोऽपि हि यत्कार्यं कुर्यादप्रकृतिं गतः ।
तदप्यकृतमेवाहुरस्वतन्त्रः सहेतुभिः ॥
कामक्रोधाभिभूतार्त्तभयव्यसनपीडिताः ।

(१) अस्वतन्त्रं त०—इति ख० पुस्तके पाठः ।

रागद्वेषपरीताश्च ज्ञेयास्त्वप्रकृतिं गताः ॥
तदा तु तत्कृतं कार्यमतन्त्रं परिचक्षते ।
अन्यत्र स्वामिसन्देशान्न दासः प्रभुरात्मनः ॥
पुत्रेण च कृतं कार्यं यत्स्यादच्छन्दतः पितुः ।
तदप्यकृतमेवाहुर्दासः पुत्रश्च तत्समौ ॥
न क्षेत्रगृहदासानां दानाधमनविक्रयाः ।
अस्वतन्त्रकृताः सिद्धिं प्राप्नुयुर्नानुवर्णिताः ॥
स्त्रीकृतान्यप्रमाणानि कार्याण्याहुरनापदि ।
विशेषतो गृहक्षेत्रदानाधमनविक्रयाः ॥
एतान्येव प्रमाण्यानि भर्त्ता यद्यनुमन्यते ।
पुत्रः पत्युरभावे वा राजा वा पतिपुत्रयोः ॥
कुले ज्येष्ठस्तथा श्रेष्ठः प्रकृतिस्थश्च यो भवेत् ।
तत्कृतं स्यात्कृतं कार्यं नाऽस्वतन्त्र्यकृतं तथा ॥
कुटुम्बार्थेऽध्यधीनोऽपि व्यवहारं यमाचरेत् ।
स्वदेशे वा विदेशे वा तं ज्यायान्न विचालयेत् ॥

अध्यधीनो दासादिः । अस्वतन्त्रश्च लक्षयिष्यत इत्यास्तां विस्तरः ३०-३१-३२ ॥ ८६

(मिता०) अनिर्णीतव्यवहारे व्यवहर्तरि प्रेते व्यवहारो न निवर्तत इति स्थितम् । निर्णीतेऽपि व्यवहारे स्थिते च व्यवहर्तरि व्यवहारः क्वचित्प्रवर्तते क्वचिन्न प्रवर्तते इति व्यवस्थासिद्धये व्यवहारदर्शिनां बलाबलमाह—

नृपेणेति । नृपेण राज्ञा (१)अधिकृताः व्यवहारदर्शने नियुक्ताः 'राज्ञा सभासदः कार्याः' इत्यादिनोक्ताः । पूगाः समूहाः । भिन्नजातीनां भिन्नवृत्तीनां एकस्थाननिवासिनां यथा ग्रामनगरादयः । श्रेणयो नानाजातीनामेकजातीयकर्मोपजीविनां संघाताः । यथा (२)हेडाबुकादीनां ताम्बूलिककु(३)विन्दचर्मकारादीनां च । कुलानि ज्ञातिसम्बन्धिबन्धूनां समूहाः । एतेषां नृपाधिकृतादीनां चतुर्णां पूर्वं पूर्वं यद्यत्पूर्वं पठितं तत्तद् गुरु बलवज्ज्ञेयं वेदितव्यम् । नृणां व्यवहर्तृणां व्य-

---

(१) अधिकृताः प्राड् विवाकादयः । (२) देशान्तरं गत्वा प्रत्याप्यवाऽऽवविक्रेतारो हेडाबुकाः ।
(३) कुविन्दस्तन्तुवायः ।

वहारविधौ व्यवहारदर्शनकार्ये एतदुक्तं भवति । नृपाधिकृतैर्निर्णीते व्यवहारे पराजितस्य यद्यप्यसन्तोषः कुदृष्टियुक्त्या भवति तथापि न पूगादिषु पुनर्व्यवहारो भवति । एवं पूगनिर्णीतेऽपि न श्रेण्यादिगमनम् । तथा श्रेणिनिर्णीते कुलगमनं न भवति । कुलनिर्णीते तु श्रेण्यादिगमनं भवति । श्रेणीनिर्णीते पूगादिगमनम् । पूगनिर्णीते नृपाधिकृतगमनं भवतीति । नारदेन पुनर्नृपाधिकृतैर्निर्णीतेऽपि व्यवहारे नृपगमनं भवतीत्युक्तम्-'कुलानि श्रेयणश्चैव (१)गणश्चाधिकृता (२)नृपः। प्रतिष्ठा व्यवहाराणां गुर्वेषामुत्तरोत्तरम्' इति । तत्र च नृपगमने सो-(३)त्तरसभ्येन राज्ञा पूर्वैः सभ्यैः (४)सपणे व्यवहारे निर्णीयमाने यद्यसौ कुदृष्टवादी पराजितस्तदासौ दण्ड्यः । अथासौ जयति तदाधिकृताः सभ्या दण्ड्याः ॥ ३० ॥

(मिता०) दुर्बलैर्व्यवहारदर्शिभिर्दृष्टो व्यवहारः परावर्तते प्रबलदृष्टस्तु न निवर्तत इत्युक्तम् । इदानीं प्रबलदृष्टोऽपि व्यवहारः कश्चिन्निवर्तते इत्याह—

बलेत्यादि । बलेन बलात्कारेण (६)उपाधिना भयादिना विनिर्वृत्तान्निष्पन्नान् व्यवहारान्निवर्तयेत् । तथा स्त्रीभिः । नक्तं रात्रावस्त्रीभिरपि । अन्तरागारे गृहाभ्यन्तरे बहिर्ग्रामादिभ्यः । शत्रुभिश्च कृतान्व्यवहारान्निवर्तयेदिति सम्बन्धः ॥ ३१ ॥

(मिता०) असिद्धव्यवहारिण आह—

मत्तोन्मत्तेति । अपि च—मत्तो मदनीयद्रव्येण । उन्मत्त उन्मादेन पञ्चविधेन वातपित्तश्लेष्मनिपातग्रहसंभवेनोपसृष्टः । आर्तो व्याध्यादिना । व्यसनमिष्टवियो(८)गाऽनिष्टप्राप्तिजनितं दुःखं तद्वान् व्यसनी । बालो व्यवहारायोग्यः । भीतोऽरातिभ्यः । आदिग्रहणात्पुरराष्ट्रादिविरुद्धः । 'पुरराष्ट्रविरुद्धश्च यश्च राज्ञा विसर्जितः । अनादेयो भवेद्वादौ धर्मविद्भिरुदाहृतः' ॥ इति मनुस्मरणात् । एतैर्योजितः कृतो व्यवहारो न सिद्ध्यतीति । अनि(९)युक्तासम्बद्धकृतोऽपि व्यवहारो न

---

(१) हीनवर्णानां संघातो गणः । (२) नृपैः ग ।

(३) सोत्तरेति उत्तरश्चासौ सभ्यश्चेति तत्सहितेन । स्वोत्तर ख० । (४) सपणे उभयकारितपणसहिते ।

(५) बलोपधि घ । तत्रोपधिः कैतवं । (६) उपधिना भयेन घ । (७) असंबन्धकृतः ख ।

(८) वियोगोऽनिष्टप्राप्तिस्तज्जनितं ख. ग. ।

(९) अनियुक्तत्वेनाप्रेषितत्वेन प्रकृतव्यवहारासंबद्धो यस्तत्कृतः ।

सिद्ध्यतीति सम्बन्धः। यत्तु स्मरणात्—'गुरोः शिष्ये पितुःपुत्रे दम्पत्योः स्वामिभृत्ययोः । विरोधे तु मिथस्तेषां व्यवहारो न सिद्ध्यति' ॥ इति, तदपि गुरुशिष्यादीनामात्यन्तिकव्यवहारप्रतिषेधपरं न भवति। तेषामपि कथञ्चिद्व्यवहारस्येष्टत्वात् । तथा हि—शिष्य(१)शिष्टिरवधेनाशक्तौ रज्जुवेणुविदलाभ्यां तनुभ्यामन्येन घनन् राज्ञा शास्यः' इति गौतमस्मरणात्। 'नोत्तमाङ्गे कथञ्चने'ति मनुस्मरणाच्च । यदि गुरुः कोपावेशवशान्महता दण्डेनोत्तमाङ्गे ताडयति तदा स्मृतिव्यपेतेन मार्गेणाधर्षितः शिष्यो यदि राज्ञे निवेदयति तदा भवत्येव व्यवहारपदम् । तथा—'भूर्या (२)पितामहोपात्ता' इत्यादिवचनात्पितामहोपात्ते भूम्यादौ पितापुत्रयोः स्वाम्ये समाने यदि पिता विक्रयादिना पितामहोपात्तं भूम्यादि नाशयति तदा पुत्रो यदि धर्माधिकारिणं (३)प्रविशति तदा पितापुत्रयोरपि भवत्येव व्यवहारः। तथा—'दुर्भिक्षे धर्मकार्ये च व्याधौ (४)संप्रतिरोधके । गृहीतं स्त्रीधनं भर्ता नाकामो दातुमर्हति' ॥ इति स्मरणाद् दुर्भिक्षादिव्यतिरेकेण यदि स्त्रीधनं भर्ता व्ययीकृत्य विद्यमानधनोऽपि याच्यमानो न ददाति तदा दम्पत्योरपीष्यत एव व्यवहारः। तथा (५)भक्तदासस्य स्वामिना सह (६)व्यवहारं वक्ष्यति । गर्भदासस्यापि, गर्भदासीदानधिकृत्य-'यश्चैषां स्वामिनं कश्चिन्मोचयेत्प्राणसंशयात् । दासत्वात्स विमुच्येत पुत्रभागं लभेत च' ॥ इति नारदोक्तत्वात् तदमोचने पुत्रभागादाने च स्वामिना सह व्यवहारः केन वार्यते । तस्माद् दृष्टादृष्टयोः श्रेयस्करो न भवति गुर्वादिभिर्व्यवहार इति प्रथमं शिष्यादयो निवारणीयाः राज्ञा सस्भ्येनेति 'गुरोः शिष्ये' इत्यादिश्लोकस्य तात्पर्यार्थः । अत्यन्तनिर्बन्धे तु शिष्यादीनामप्युक्तरीत्या प्रवर्तनीयो व्यवहारः । यद्यपि 'एकस्य बहुभिः सार्धं स्त्रीणां प्रेष्यजनस्य च । अनादेयो भवेद्धादो धर्मविद्भिरुदाहृतः' ॥ इति नारदवचनम्, तत्रैकस्यापि-'गणद्रव्यं हरेद्यस्तु संविदं लङ्घयेच्च यः' । यथा--'एकं घृतं बहूनां च' इत्यादिस्मरणादेकार्थैर्बहुभिः सार्धं व्यवहार इष्यत एवेति, भिन्नार्थैर्बहुभिरेकस्य युगपद्व्यवहारो न भवतीति द्रष्टव्यम् । स्त्रीणामित्यपि गोपशौण्डिकादि-

(१) शिष्टि. शिक्षा, अवधेन अताडनेन। (२) भूर्येति प्रकृताध्यायस्य १२२ तमः श्लोक. ।
(३) प्रवेशयति ख. । (४) संप्रतिरोधकं नाम सर्वस्वहरणं कृत्वा दुर्गादौ परबलैर्निरोधकरम् ।
(५) भक्तमन्नम् । (६) तेनान्नार्थीदास इति गम्यते । (७) व्यवहारान्. ख. व्यवहारपदं घ. ।

स्त्रीणां स्वातन्त्र्याद्व्यवहारो भवत्येवेति तदन्यासां सकलस्त्रीणां पतिषु (१)जीवत्सु तत्पारतन्त्र्यादनादेयो व्यवहार इति व्याख्येयम् । प्रेष्यजनस्य चेत्येतदपि प्रेष्यजनस्य स्वामिपारतन्त्र्यात्स्वार्थव्यवहारेऽपि स्वाम्यनुज्ञयैव व्यवहारो नान्यथेति (२)व्याख्येयम् ॥ ३२ ॥

(वी० मि०)'व्यवहारान्न यः पश्ये'दित्युक्तं तत्र न केवलमुक्तलक्षण एव व्यवहारो द्रष्टव्यः, किन्तु प्रतिवादिशून्योऽपि साक्ष्यादिनिबन्धननिर्णयफलकतया पराजयनिबन्धनदण्डग्रहणफलकतया च व्यवहारप्रतिरूपकः सन्दिह्यमानस्वत्वनिध्यादौ ममाऽयमिति प्रतिज्ञातत्साधकप्रमाणनिर्देशरूपोऽपि तथेत्यभिप्रेत्य निध्यादौ व्यवस्थामाह चतुर्भिः—

प्रनष्टाधिगतं देयं नृपेण धनिने धनम् ॥
विभावयेन्न चेल्लिङ्गैस्तत्समं दण्डमर्हति ॥ ३३ ॥

निधिस्तावत्पूर्वनिखातं चिरप्रतिष्ठं धनम् । तच्च स्वस्वपित्रादिनिहितपरानिहतभेदाद्द्विधा । तत्राद्यं प्रनष्टमथाऽधिगतं धनिना राजपुरुषादिना धनं निधिरूपं वा धनिने ममेदं धनामिति ब्रुवते नृपेण देयं चेत् लिङ्गैः प्रमाणैस्तद्धनं विभावयेत् स्वीयतया प्रमापयेत् । न चेद्विभावयेत्तदा विवादविषयीभूतानिधिसमं दण्डं तादृगनृताभिधानापराधेनार्हति ॥ ३३ ॥

(मिता०) परावर्त्यं व्यवहारमुक्त्वा इदानीं परावर्त्यं द्रव्यमाह—

प्रनष्टाधिगतमिति । प्रनष्टं हिरण्यादि शौल्किकस्थानपालादिभिरधिगतं राज्ञे समर्पितं यत्तद्राज्ञा धनिने दा(३)तव्यं यदि रू(४)पसंख्यादिभिर्लिङ्गैर्भावयति । यदि न भावयति तदा तत्समं दण्ड्यः । असत्यवादित्वात् । अधिगमस्य स्वत्वनिमित्तत्वात्स्वत्वे प्राप्ते तत्परावृत्तिरनेनोक्ता । अत्र च कालावधिं वक्ष्यति—'शौल्किकैः स्थानपालैर्वा नष्टापहृतमाहृतम् । अर्वाक्संवत्सरात्स्वामी हरेत परतो नृपः' ॥ इति । मनुना पुनः संवत्सरत्रयमवधित्वेन निर्दिष्टम्-'प्रनष्टस्वामिकं रिक्थं राजा त्र्यब्दं निधापयेत् । अर्वाक् त्र्यब्दाद्धरेत्स्वामी परतो नृपतिर्हरेत्' ॥ इति । तत्र वर्षत्रयपर्यन्तमवश्यं रक्ष-

---

(१) जीवत्सु सत्सु घ. । (२) योजनीयम् ख. ।
(३) दाप्यम् । (४) रूपकसंख्या ग ।

णीयम् । तत्र यदि संवत्सरादर्वाक् स्वाम्यागच्छेत्तदा कृत्स्नमेव दद्यात् । यदा पुनः संवत्सरादूर्ध्वमागच्छति तदा प(१)ड्भागं रक्षणमूल्यं गृहीत्वा शेषं स्वामिने दद्यात् । यथाह-'आददीताथ षड्भागं प्रनष्टाधिगतान्नृपः । दशमं द्वादशं वापि सतां धर्ममनुस्मरन्' ॥ इति । तत्र प्रथमे वर्षे कृत्स्नमेव दद्यात्, द्वितीये द्वादशं भागं, तृतीये दशमं, चतुर्थादिषु षष्ठं भागं गृहीत्वा शेषं दद्यात् । राजभागस्य चतुर्थोऽशोऽधिगन्त्रे दातव्यः । स्वाम्यनागमे तु कृत्स्नस्य धनस्य चतुर्थमंशमधिगन्त्रे दत्त्वा शेषं राजा गृह्णीयात् । तथाह गौतमः-'प्रनष्टस्वामिकमधिगम्य संवत्सरं राज्ञा रक्ष्यमूर्ध्वमधिगन्तुश्चतु(२)र्थोऽशो राज्ञः शेषम्' इति । अत्र संवत्सरमित्येकवचनमाववक्षितम् । 'राजा त्र्यब्दं निधापयेत्' इति स्मरणात् । 'हरेत परतो नृपः' इत्येतदपि स्वामिन्यनागते त्र्यब्दादूर्ध्वं व्ययीकरणाभ्यनुज्ञापरम् । ततः परमागते तु स्वामिनि व्ययीभूतेऽपि द्रव्ये राजा स्वांशमवतार्य तत्समं दद्यात् । एतच्च हिरण्यादिविषयम् । गवादिविषये वक्ष्यति-'पणानेकशफे दद्यात्' इत्यादिना ॥ ३३ ॥

(वी० मि०) द्वितीये त्वाह—

राजा लब्ध्वा निधिं दद्याद्द्विजेभ्योऽर्द्धं द्विजः पुनः ॥
विद्वानशेषमादद्यात्स सर्वस्य प्रभुर्यतः ३४ ॥
इतरेण निधौ लब्धे राजा षष्ठांशमाहरेत् ॥
अनिवेदितविज्ञातो दाप्यस्तं दण्डमेव च ॥ ३५ ॥

राजा अज्ञातस्वामिकं निधिं लब्धाऽर्द्धं द्विजेभ्यो दद्यादर्धं कोशे निवेशयेत् । विद्वान् श्रुताध्ययनसम्पन्नो द्विजो ब्राह्मणः पुनर्निधिं लब्ध्वाऽशेषं सम्पूर्णं निधिं स्वयमादद्यात् । स विद्वान् ब्राह्मणो यतः सर्वस्य जगतः प्रभुर्भवति । तदाह मनुः—

सर्वं स्वं ब्राह्मणस्येदं यत्किञ्चिज्जगतीगतम् ।
श्रैष्ठ्येनाभिजनेनेदं सर्वं वै ब्राह्मणोऽर्हति ॥
स्वमेव ब्राह्मणो भुङ्क्ते स्वं वस्ते स्वं ददाति च ।
आनृशंस्याद् ब्राह्मणानां भुञ्जते हीतरे जनाः ॥

---

(१) किंचिद्भागं ख. । (२) चतुर्थो भागः शेषं राज्ञ इति घ. ।
(३) दद्याद्द्विजेभ्योऽर्धं घ. ।

इति । इतरेणाऽविद्वद्ब्राह्मणेन निधौ लब्धे राजा निधेः षष्ठमंशमाहरेत् गृह्णीयात् । अनिवेदित इति कर्तरि क्तः । अनिवेदितश्चासौ विज्ञातश्च निधिहर्तृत्वेन राज्ञा तं निधिं दण्डं च शक्त्यनुसारेण स्वस्मै दाप्यः । दाप्य एवेत्येवकारेण स्वल्पमपि निधिभाग न ग्राह्य इति दर्शितम् । चकारः पूर्वार्द्धान्वयी द्वादशांशाहरणादिसमुच्चयार्थः । तदाह मनुः—

ममायमिति यो ब्रूयान्निधिं सत्येन मानवः ।
तस्याददीत षड्भागं राजा द्वादशमेव वा ॥

द्वादशमिति सगुणपरम् । अत्र विष्णुः-'राजा निधिं लब्ध्वाऽर्द्धं ब्राह्मणाय समर्द्धं कोशे प्रवेशयेत्, ब्राह्मणस्तु निधिं लब्ध्वा स्वयमादद्यात् क्षत्रियश्चतुर्थमंशं राज्ञे दद्यादर्धमादद्यात् वैश्यश्चतुर्थमंशं राज्ञे दद्याद्ब्राह्मणेभ्योऽर्द्धं चतुर्थमंशं स्वयमादद्यात् शूद्रश्चाप्त द्वादशधा विभज्य पञ्चांशान् राज्ञे ब्राह्मणेभ्योऽशद्वयमादद्यादनिवेदितविज्ञातस्य सर्वस्वमाहरेत्' । एवं च 'अप्रज्ञायमानं वित्तं सोऽधिगच्छेत् राजा तदुद्धरेदधिगन्त्रे षष्ठमंशं प्रदद्या'दिति वसिष्ठवचनं विष्णुवचनानुसाराच्छूद्रपरम् ॥ ३४-३५ ॥

(मिता०) रथ्याशुल्कशालादिनिपतितस्य सुवर्णादेर्नष्टस्याधिगमे विधिमुक्त्वा अधुना भूमौ चिरनिखातस्य सुवर्णादेर्निधिशब्दवाच्यस्याधिगमे विधिमाह—

राजेति, इतरेणेति च । उक्तलक्षणं निधिं राजा लब्ध्वा अर्धं ब्राह्मणेभ्यो दत्त्वा शेषं कोशे निवेशयेत् । ब्राह्मणस्तु विद्वान् श्रुताध्ययनसंपन्नः सदाचारो यदि निधिं लभेत तदा सर्वमेव गृह्णीयात् । यस्मादसौ सर्वस्य जगतः प्रभुः । इतरेण तु राजविद्वद्ब्राह्मणव्यतिरिक्तेन अविद्वद्ब्राह्मणक्षत्रियादिना निधौ लब्धे राजा षष्ठांशमधिगन्त्रे दत्त्वा शेषं निधिं स्वयमाहरेत् । यथाह वसिष्ठः—'अप्रज्ञायमानं वित्तं योऽधिगच्छेद्राजा तद्धरे(१)त् षष्ठमंशमधिगन्त्रे दद्यात्' इति । गौतमोऽपि—'निध्यधिगमो (२)राजधनं भवति न ब्राह्मणस्याभिरूपस्य, अब्राह्मणो व्याख्याता षष्ठमंशं लभेतेत्येके' इति । अनिवेदित इति कर्तरि निष्ठा । अनिवेदितश्चासौ विज्ञातश्च राज्ञेऽप्यनिवेदितविज्ञातः यः कश्चिन्निधिं लब्ध्वा राज्ञे न निवेदितवान् विज्ञातश्च राज्ञा स सर्वं नि-

(१) तद्धरेदधिगन्त्रे षष्ठांशं दद्यात् । (२) राजधनं न ब्राह्मणस्य ग. घ. ।

धिं दाप्यो दण्डं च शक्त्यपेक्षया । अथ निधेरपि स्वाम्यागत्य (१) रूपसंख्यादिभिः स्वत्वं भावयति तदा तस्मै राजा निधिं दत्त्वा षष्ठं द्वादशं वांशं स्वयमाहरेत् । यथाह मनुः (८।३५)-'ममायमिति यो ब्रूयान्निधिं सत्येन मानवः । तस्याददीत षड्भागं राजा द्वादशमेव वा'। इति । अंशविकल्पस्तु वर्णकालाद्यपेक्षया वेदितव्यः ॥ ३४-३५ ॥

(वी० मि०) चौरहृते विशेषमाह—

देयं चौरहृतं द्रव्यं राज्ञा जानपदाय तु ॥
अददद्धि समाप्नोति किल्बिषं यस्य तस्य तत् ॥ ३६॥

चौरेण हृतं तज्जातीयं वा द्रव्यं चौराद् गृहीत्वाऽसम्भवे स्वकोशादपि जानपदाय स्वदेशवासिने देयम् । तुशब्देन जानपदातिरिक्तस्य दानं विधिवत् स्वयं भागग्रहणं च व्यवच्छिद्यते । हि यतश्चौरहृतं तद्द्रव्यं यस्य स्वत्वं तस्मै अददत् तस्य चौरस्य चौर्यजन्यं यादृशं किल्बिषं तादृशं राजाऽऽप्नोति । तदाह मनुः—

दातव्यं सर्ववर्णेभ्यो राज्ञा चौरैर्हृतं धनम् ।
राजा तदुपयुञ्जानश्चौरस्याऽऽप्नोति किल्बिषम् ।

इति । महाभारते--

प्रत्याहर्तुमशक्तस्तु धनं चौरैर्हृतं यदि ।
स्वकोशात्तद्धि देयं स्यादशक्तेन महीक्षिता ॥

इति ॥ ३६ ॥

इति श्रीमत्सकलसामन्तचक्रचूडामणिमरीचिमञ्जरीनीराजितचरणकमलश्रीमन्महाराजाधिराजमधुकरसाहिसूनुश्रीमन्महाराजचतुरुदधिवलयवसुन्धराहृदयपुण्डरीकविकासदिनकरश्रीवीरसिंहदेवोद्योजितश्रीहंसपण्डितात्मजश्रीपरशुराममिश्रसूरिसनुसकलविद्यापारावारपारीणश्रीमन्मित्रमिश्रकृते श्रीवीरसिंहमित्रोदयाख्याने याज्ञवल्क्यव्याख्याने व्यवहारमातृकाप्रकरणम् ॥

(मिता०) चौरहृतं प्रत्याह—

देयमिति । चौरैर्हृतं द्रव्यं चौरेभ्यो विजित्य जानपदाय स्वदेशनिवासिने यस्य तत् द्रव्यं तस्मै राज्ञा दातव्यम् । हि यस्मात् अददत् अप्रयच्छन् यस्य तदपहृतं द्रव्यं तस्य किल्बिषमाप्नोति । तस्य

(१) रूपकसंख्यादिभिः ख. ग. ।

चौरस्य च । यथाह मनुः-'दातव्यं सर्ववर्णेभ्यो राज्ञा चौरैर्हृतं धनम् । राजा तदुपयु(१)ञ्जानश्चौरस्याप्नोति किल्बिषम्' ॥ इति । यदि चौरहस्तादादाय स्वयमुपभुङ्क्ते तदा चौरस्य किल्बिषमाप्नोति । अथ चौरहृतमुपेक्षते तदा जानपदस्य किल्बिषम् । अथ चौरहृताहरणाय यतमानोऽपि न शक्नुयादाहर्तुं तदा तावद्धनं स्वकोशाद्दद्यात् । यथाह गौतमः-'चौरहृतमवाजित्य यथास्थानं गमयेत्कोशाद्वा दद्यात्' । कृष्णद्वैपायनोऽपि-'प्रत्याहर्तुं न शक्तस्तु धनं चौरैर्हृतं यदि । स्वकोशात्तद्धि देयं स्यादशक्तेन महीक्षिता' इति ॥ ३६ ॥

इति असाधारणव्यवहारमातृकाप्रकरणम् ।

(वी०मि०) अथ व्यवहारपदेषु निरूपणीयेषु तेषामाद्यमृणादानमिति मन्वाद्यनुसारात्प्रथममृणादाने—

ऋणं देयमदेयं च येन यत्र यथा च यत् ।
दानग्रहणधर्माश्च ऋणादानमिति स्मृतम् ॥
तत्कुसीदमिति ज्ञेयं तेन वृत्तिः कुसीदिनाम् ।

इति नारदपरिभाषिते व्यवस्थां दर्शयति प्रकरणसमाप्तिपर्यन्तेन । तत्रादौ वृद्धिमाह—

अशीतिभागो वृद्धिः स्यान्मासि मासि सबन्धके ॥
वर्णक्रमाच्छतं द्वित्रिचतुःपञ्चकमन्यथा ॥ ३७ ॥
कान्तारगास्तु दशकं सामुद्रा विंशकं शतम् ॥
दद्युर्वा स्वकृतां वृद्धिं सर्वे सर्वासु जातिषु ॥ ३८ ॥
सन्ततिस्तु पशुस्त्रीणां रसस्याष्टगुणा परा ॥
वस्त्रधान्यहिरण्यानां चतुस्त्रिद्विगुणा परा ॥ ३९ ॥

सबन्धके ऋणे प्रयुक्तं सुवर्णादिशतं द्वित्रिचतुःपञ्चकमधमर्णक्रमेण स्यात्, तेन ब्राह्मणेनाऽधर्मर्णेनाबन्धके सुवर्णादिशते ऋणे गृहीते प्रतिमासं सुवर्णाद्विद्वयं क्षत्रियेण सुवर्णादित्रयं वैश्येन सुवर्णादिचतुष्टयं शूद्रेण सुवर्णादिपञ्चकवृद्धिरूपं उत्तमर्णाय देयमिति पर्यवस्यति । एवं च सबन्धकेऽपि अशीतितमभागरूपवृद्धिस्थाने मासद्वयेनसुवर्णद्वयादिसुवर्णशतादौ क्षत्रियादिना वृद्धिर्देयेत्यूहनीयं न्यायसाम्यात् ।

---

(१) तदुपभुञ्जानः ग. घ. ।

अवन्धकेऽपि संलग्ने निराधाने द्विकं शतम्।
..... मासलाभ उदाहृतः ॥

साष्टभागः अशीतितमभागस्याऽष्टमो यो भागस्तेन सहितोऽशीतितमो भागः। अत्रापि क्षत्रियादावधमर्णे आधिक्यं न्यायसाम्यादूह्यम्। कान्तारगा बहुतरवृद्ध्यर्थम्। अरण्यादिगमनशीलास्त्वधमर्णाः शतं दशकं दशाधिकं शतम्। सामुद्रास्तु बहुतमवृद्ध्यर्थं समुद्रयानशीला विंशकं विंशत्याऽधिकं शतं मासि मासि दद्युस्तेन सुवर्णशते दश सुवर्णानारण्यका विंशतिसुवर्णान् सामुद्रा दद्युरिति पर्यवस्यति। यत्र तु उक्तादधिका न्यूना वा वृद्धिरुत्तमर्णाधमर्णाभ्यां व्यवस्थापिता तत्र तां वृद्धिं सर्वे ब्राह्मणादयोऽधमर्णाः सर्वासु जातिषु ब्राह्मणादिषु सङ्करपर्यन्तेषूत्तमर्णेषु दद्युः। बन्धकितानां पशूनां गवादीनां स्त्रीणां दास्यादीनां च सन्ततिरेव गवादिप्रयोक्तुर्वृद्धिः। अत्र पोषणासमर्थस्य प्रयोक्तुर्गोदास्यादेः पुष्टिस्तत्सन्ततिश्चापेक्षिता ग्रहीतुः क्षीरं परिचर्या च ग्रहणनिमित्तमिति ध्येयमिति रत्नाकरः। परे तु बन्धकत्वेन स्थापितस्य गोदास्यादेर्वृद्धिं तद्भावे सन्ततिमेव वृद्धिं गवादिस्वामिनोऽधमर्णा दद्युरिति व्याचक्षते। अथ परमवृद्धिमाह—रसस्य घृतादेः ऋणत्वेन प्रयुक्तस्य चिरकालमवस्थानेऽष्टगुणपर्यन्तं वृद्धिर्भवति। परेत्यनेन च गुणादिवृद्धेर्गणनया सम्भवेऽपि व्युदासः। एवमग्रेऽपि वस्त्रस्य चतुर्गुणा धान्यस्य त्रिगुणा हिरण्यस्य द्विगुणा वृद्धिः परा। अत्र वृद्धिभागे बृहस्पतिः—

वृद्धिश्चतुर्विधा प्रोक्ता पञ्चधाऽन्यैः प्रकीर्तिता।
षड्विधाऽन्यैः समाख्याता तत्त्वतस्तान्निबोधत ॥
कायिका कालिका चैव चक्रवृद्धिस्तथा परा।
कारिताऽथ शिखावृद्धिर्भोगलाभस्तथैव च ॥

एतासां लक्षणादिप्रपञ्चस्तु विस्तरभयान्नेह तन्यते स्मृत्यन्तरेष्वनुसन्धेयः। अत्राऽशीतिभागादिना धर्म्या वृद्धिरुक्ता।

द्विकं शतं हि गृह्णानो न भवत्यर्थकिल्बिषी।

इति मनुवचनात्। स्वकृतामित्यनेनोक्ताया नाधिका वृद्धिः। सापि धर्म्यैव। अवधिका स्वधर्म्या। हारीतोऽपि 'पुराणपञ्चविंशत्यां मासेनाऽष्टपणा वृद्धिः, एवं स द्विमासैश्चतुर्भिर्द्विपर्यागतं सन्तिष्ठत एषा धर्म्या वृद्धिर्नाऽनया धर्म्माच्च्यवते'। द्विपर्यागतं द्विगुणीभूतं

सन्तिष्ठते ततो न वर्द्धते । धर्म्यत्वं तूक्तवृद्धेर्वैश्यानां सर्वदा । आदिपदं त्वन्येषामपीति बोध्यम् । चक्रवृद्ध्यादिकं चाऽधर्म्यमेव । तदाह बृहस्पतिः—

भोगो यत् द्विगुणादूर्ध्वं चक्रवृद्धिश्च गृह्यते ।
मूलं च सोदयं पश्चाद्धार्धुष्यं तत्तु गर्हितम् ॥

परमवृद्धौ मनुः—

कुसीदवृद्धिर्द्वैगुण्यं नात्येति सकृदाहृता ।
धान्ये सदे लवे वाह्ये नातिक्रामति पञ्चताम् ॥

सदः सस्यं, लवो लवनीयं लोमादि आविकाभिन्नम् ।

मणिमुक्ताप्रवालानां सुवर्णारजतस्य च ॥
तिष्ठति द्विगुणा वृद्धिः कालकैटाविकस्य च ।

इति कात्यायनवचनात् । कैटं कीटभवम् । गौतमः—'कुसीदं पशूपजलोमक्षेत्रसदवाह्येषु नातिपञ्चगुणम्' । पशूपजं धृतव्यतिरिक्तं दुग्धादि ।

तैलानां चैव सर्वेषां मद्यानामथ सर्पिषाम् ।
वृद्धिरष्टगुणा प्रोक्ता गुडस्य लवणस्य च ॥

इति कात्यायनवचनात् । बृहस्पतिः—

हिरण्ये द्विगुणा वृद्धिस्त्रिगुणा वस्त्रकुप्यके ।
धान्ये चतुर्गुणा प्रोक्ता सदवाह्यलवेषु च ॥

सदो धान्यातिरिक्तं क्षेत्रभवं फलादि । तथा—

उक्ता पञ्चगुणा शाके बीजेक्षौ षड्गुणा स्मृता ।
लवणस्नेहमद्येषु वृद्धिरष्टगुणा स्मृता ॥
गुडे मधुनि चैवोक्ता प्रयुक्ते चिरकालिके ।

धान्ये द्विगुणादिनानावृध्यभिधानं मूल्यानुसारेण व्यवस्थापनीयम् । तथा हि प्रयोगकाले सस्योत्पत्तेः पूर्वं यादृशं मूल्यं सस्योत्पत्त्यनन्तरं तस्यालपह्रासे द्विगुणं, ततोऽधिकह्रासे त्रिगुणं, अधिकतरह्रासे चतुर्गुणं, अधिकतमह्रासे पञ्चगुणं भवतीति । एतच्च सर्ववृद्धिकथनं तूलमात्र एव । 'काले द्विगुणं धान्यं त्रिगुणमिव वर्द्धत' इति हारीतानुसारात् । अथवा वर्णक्रमेण वृद्धिचतुष्टयं व्यवस्थापनीयम् । 'धान्ये त्रिगुणत्वे कालभूम्नेति' शिष्टाः । वाह्यादौ तु देशकालमूल्यादिभेदेन वृद्धिभेदो व्यवस्थापनीय इत्यास्तां विस्तरः ।

अथ वृद्धिनिषेधाः—

पण्यं मूल्यं भृतिर्न्यासो दण्डो यच्चाभिहारिकम्।
वृथादानाक्षिकृपणा वर्द्धन्ते नोऽविवक्षिताः॥

पण्यं विक्रेयं, भृतिर्वेतनं, आभिहारिकं छलादिना गृहीतं, वृथादानं धर्ममनुद्दिश्य दानं, आक्षिकं द्यूतसम्बन्धी पणः एतेऽविवक्षिता अव्यवस्थापितवृद्धयो न वर्द्धन्ते। कात्यायनः—

धर्मस्यावधि?)द्यूतमूल्यपण्येषु सर्वदा।
स्त्रीशुल्केन च वृद्धिः स्यात् प्रातिभाव्यागतेषु च॥

प्रातिभाव्यागतं लग्नकस्य प्रातिभाव्याद्देयतां गतम्। संवर्तः—

न वृद्धिः स्त्रीधने लाभे निक्षेपे च तथा स्थिते।
सन्दिग्धे प्रातिभाव्ये च यदि न स्यात्स्वयङ्कृता॥

व्यासः—

प्रातिभाव्यं भुक्तबन्धमगृहीतं च दित्सतः।
न वर्धते प्रपन्नस्य दमः शुल्कं प्रतिश्रुतम्॥

प्रपन्नस्य धनिकवशगतस्याऽधमर्णस्य दीयमानं न गृह्णातीत्यादि च स्वयमेव वक्ष्यति॥३७—३९॥

(मिता०) साधारणासाधारणरूपां व्यवहारमातृकामभिधायाधुनाष्टादशानां व्य(१)वहारपदानामाद्यमृणादानपदं दर्शयति—'अशीतिभागो वृद्धिः स्यात्' इत्यादिना, 'मो(२)च्य आधिस्तदुत्पन्ने प्रविष्टे द्विगुणे धने' इत्येवमन्तेन। तच्च ऋणादानं सप्तविधम्। ईदृशमृणं देयं, ईदृशमदेयं, अनेनाधिकारिणा देयं, अस्मिन् समये देयं, अनेन प्रकारेण देयमित्यधर्मेण पञ्चविधम्। उत्तमर्णे दानविधिः, आदानविधिश्चेति द्विविधमिति। एतच्च नारदेन स्पष्टीकृतम्—'ऋणं देयमदेयं च येन यत्र यया च यत्। दानग्रहण(३)धर्माभ्यामृणादानमिति स्मृतम्'॥ इति। तत्र प्रथममुत्तमर्णस्य दानविधिमाह तत्पूर्वकत्वादितरेषाम्।

अशीतिभाग इति। मासि मासि प्रतिमासं बन्धकं विश्वासार्थं यदाधीयते आधिरिति यावत्। बन्धकेन सह वर्तत इति सबन्धकः प्रयोगस्तस्मिन्सबन्धके प्रयोगे प्रयुक्तस्य द्रव्यस्य अशीतितमो भागो वृद्धिर्धर्म्या भवति। अन्यथा बन्धकरहिते प्रयोगे वर्णानां ब्राह्मणा-

(१) व्यवहाराणामाद्य घ। (२) इदं पदमग्रे ६४ तमं द्रष्टव्यम्। (३) धर्माभ्यां च ऋणादान०. ख० ग।

दानां क्रमेण द्वित्रिचतुःपञ्चकं शतं धर्म्यं भवति । ब्राह्मणेऽधमर्णे द्विकं शतं, क्षत्रिये त्रिकं, वैश्ये चतुष्कं, शूद्रे पञ्चकं, मासि मासीत्येव द्वौ वा त्रयो वा चत्वारो वा पञ्च वा द्वित्रिचतुःपञ्चा अस्मिन् शते वृद्धिर्दीयते इति द्वित्रिचतुःपञ्चकं शतम् । 'संख्याया अतिशदन्तायाः कन्' (५।१।२२) इत्यनुवृत्तौ 'तदस्मिन्वृद्ध्यायलाभशुल्कोपदा दीयते' (५।१।४७) इति कन्। (वृ(१)द्धेर्वृद्धिश्चक्रवृद्धिः प्रतिमासं तु कालिका । इच्छाकृता कारिता स्यात्कायिका कायकर्मणा ॥) इयं च वृद्धिर्मासि मासि गृह्यत इति कालिका । इयमेव वृद्धिर्दिवसगणनया विभज्य प्रतिदिवसं गृह्यमाणा कायिका भवति । तथा च नारदेन-'कायिका कालिका चैव कारिता च तथा परा । चक्रवृद्धिश्च शास्त्रेषु तस्य वृद्धिश्चतुर्विधा' ॥ इत्युक्त्वोक्तम्-'कायाविरोधिनी शश्वत्पणपादादिका-यिका । प्रतिमासं स्रवन्ती या वृद्धिः सा कालिका मता ॥ वृद्धिः सा कारिता नामाधमर्णेन स्वयं कृता । वृद्धेरपि पुनर्वृद्धिश्चक्रवृद्धिरुदाहृता' ॥ इति ॥ ३७ ॥

(मिता०) ग्रहीतृविशेषेण प्रकारान्तरमाह—

कान्तारगा इति । कान्तारमरण्यं तत्र गच्छन्तीति कान्तारगाः । ये वृद्ध्या धनं गृहीत्वाधिकलाभार्थमतिगहनं प्राणधनविनाशशङ्का-स्थानं प्रविशन्ति ते दशकं शतं दद्युः । ये च समुद्रगास्ते विं(२)शकं शतं मासि मासीत्येव । एतदुक्तं भवति-कान्तारगेभ्यो दशकं शतं सामुद्रेभ्यश्च विं(३)शकं उत्तमर्ण आदद्यान्मूलविनाशस्यापि शङ्कितत्वादिति ॥

(मिता०) इदानीं कारितां वृद्धिमाह—

दद्युरिति । सर्वे वा ब्राह्मणादयोऽधमर्णाः अबन्धके सबन्धके वा स्वकृतां स्वाभ्युपगतां वृद्धिं सर्वासु जातिषु दद्युः । क्वचिदकृतापि वृद्धिर्भवति । तथाह नारदः-'न वृद्धिः प्रीतिदत्तानां स्याद्यनाकारिता क्वचित् । अनाकारितमप्यूर्ध्वं वत्सरार्धाद्विवर्धते' ॥ इति । यस्तु याचितकं गृहीत्वा देशान्तरं गतस्तं प्रति कात्यायनेनोक्तम्-'यो याचितकमादयं तमदत्त्वा दिशं व्रजेत् । ऊर्ध्वं संवत्सरात्तस्य तद्धनं वृद्धिमाप्नुयात्' ॥ इति । यश्च याचितकमादाय याचितोऽप्यदत्त्वा देशा-

(१) धनुश्चिह्नगर्भितोऽत्यन्तः श्लोकः ख० पुस्तक एवास्ति ।

(२) विंशतिकं ख० । (३) याति घ० ।

न्तरं व(१)जति तं प्रति तेनैवोक्तम्-'कृतोऽकारमदत्त्वा यो याचितस्तु द्विजं व्रजेत् । ऊर्ध्वं मासत्रयात्तस्य तद्धनं वृद्धिमाप्नुयात्' ॥ इति । यः पुनः स्वदेशे स्थित एव याचितो याचितकं न ददाति तं याच(२)नकाल्लादार(३)भ्याकारितां वृद्धिं दापयेद्राजा । यथाह-'स्वदेशेऽपि स्थितो यस्तु न दद्याद्याचितः क्वचित् । तं ततोऽकारितां वृद्धिमनिच्छन्तं च दापयेत्' ॥ इति । अनाकारितवृद्धेरपवादो नारदेनोक्तः 'पण्यमूल्यं भृतिर्न्यासो दण्डो यश्च प्रकल्पितः । वृथादानाक्षिक(४)-पणा वर्धन्ते नाविवक्षिताः'॥इति । अविवक्षिता अनाकारिता इति॥३८॥

(मिता०) अधुना द्रव्यवि(५)शेषे वृद्धिविशेषमाह—

सन्ततिरिति । पशुस्त्रीणां सन्ततिरेव वृद्धिः । पशूनां स्त्रीणां पोषणासमर्थस्य तत्पुष्टिसन्ततिकामस्य प्रयोगः सम्भवति । ग्रहणं च क्षीरपरिचर्यार्थिनः ॥

(मिता०) अधुना प्रयुक्तस्य द्रव्यस्य वृद्धिग्रहणमन्तरेणापि चिरकालावस्थितस्य कस्य द्रव्यस्य कियती परा वृद्धिरित्यपेक्षित आह—

रसस्येति । रसस्य तैलघृतादेर्वृद्धिग्रहणमन्तरेण चिरकालावस्थितस्य स्वकृतया वृद्ध्या वर्धमानस्याष्टगुणा वृद्धिः परा । नातः परं वर्धते । तथा वस्त्रधान्यहिरण्यानां यथासंख्यं चतुर्गुणा त्रिगुणा द्विगुणा वृद्धिः परा । वसिष्ठेन तु रसस्य त्रैगुण्यमुक्तम् । 'द्विगुणं हिरण्यं त्रिगुणं धान्यम् । धान्येनैव रसा व्याख्याताः पुष्पमूलफलानि च । तुलाधृत(६)मष्टगुणम्' इति । मनुना तु धान्यस्य पुष्पमूलफलादीनां च पञ्चगुणत्वमुक्तम्-'धान्ये शदे लवे वाह्ये नातिक्रामति पञ्चताम्' इति । शदः क्षेत्र(७)फलं पुष्पमूलफलादि । लवो मेषोर्णाचमरीकेशादिः । वाह्यो बलीवर्दतुरगादिः । धान्यशदलववाह्याविषया वृद्धिः पञ्चगुणत्वे नातिक्रामतीति । तत्राधमर्णयोग्यतावशेन दुर्भिक्षादिकालवशेन च व्यवस्था द्रष्टव्या । एतच्च सकृदाहरणे च वेदितव्यम् । पुरुषान्तरसंक्रमणेन प्रयोगान्तरकरणे तस्मिन्नेव वा पुरुषे रेकसेकाभ्यां अनेकशः प्रयो(८)गान्तरकरणे सुवर्णादिकं द्वैगुण्याद्यातिक्रम्य

---

(१) तेन कथयतीत्येवं । (२) याचित ग० । (३) रूप वृद्धि ग० घ० ।
(४) अविवक्षिताकारितवृद्धिकाः ।
(५) विशेषित ग० घ० । (६) तुलाधृते त्रिगुण ग० घ० वृतीयमष्ट घ० ।
(७) क्षेत्रके घ० । (८) गान्तरीकरणे घ० ।

पूर्ववद्वर्धते । सकृत्प्रयोगेऽपि प्रतिदिनं प्रतिमासं प्रतिसंवत्सरं वा वृद्ध्याहरणेऽधमर्णदेयस्य द्वैगुण्यासम्भवात्पूर्वाहृतवृद्ध्या सह द्वैगुण्यमतिक्रम्य वर्धत एव । यथाह मनुः (८।१५१)-'कुसीदवृद्धिर्द्वैगुण्यं नात्येति सकृदाहृता' । इति । सकृदाहितेत्यपि पाठोऽस्ति । उपचयार्थं प्रयुक्तं द्रव्यं कुसीदं तस्य वृद्धिः कुसीदवृद्धिः सा द्वैगुण्यं नात्येति नाति(१)क्रामति । यदि सकृदाहिता सकृत्प्रयुक्ता । पुरुषान्तरसंक्रमणादिना प्रयोगान्तरकरणे द्वैगुण्यमत्येति । सकृदाहृतेति पाठे तु शनैः शनैः प्रतिदिनं प्रतिमासं प्रतिसंवत्सरं वाऽधमर्णादाहृता द्वैगुण्यमत्येतीति व्याख्येयम् । तथा गौतमेनाप्युक्तम्-'चिरस्थाने द्वैगुण्यं प्रयोगस्य' इति । प्रयोगस्येत्येकवचननिर्देशात्प्रयोगान्तरकरणे द्वैगुण्यातिक्रमोऽभिप्रेतः । चिरस्थान इति निर्देशात् शनैः शनैर्वृद्धिग्रहणे द्वैगुण्यातिक्रमो दर्शितः ॥ ३९ ॥

(वी० मि०) अथ ऋणोद्ग्राहणप्रकारमाह चतुर्भिः—

प्रपन्नं साधयन्नर्थं न वाच्यो नृपतेर्भवेत् ॥
साध्यमानो नृपं गच्छन्(२)दण्ड्यो दाप्यश्च तद्धनम् ॥४०॥

प्रपन्नमधमर्णेनाङ्गीकृतमर्थं साधयन्—

धर्मेण व्यवहारेण छलेनाचरितेन च ।
प्रयुक्तं साधयेदर्थं पञ्चमेन बलेन च ॥

इति मनूक्तप्रकारेण प्रत्याहरन् उत्तमर्णो नृपतेर्न वाच्यो भवेत् न निषेध्यो भवति । साध्यमान उक्तप्रकारेण योज्यमानस्तन्निवारणार्थं नृपं प्रति गच्छन्नधमर्णोऽ(३)परिक्षीणो दण्ड्यस्तद्धनमुत्तमर्णाय दाप्यश्च । चकारात् नृपमगच्छन्नपि बलादिना धनमप्रयच्छन्नधमर्णो धनं दाप्यो दण्ड्यश्चेति समुच्चीयते ॥ ४० ॥

(मिता०) ऋणप्रयोगधर्मा उक्ताः । सांप्रतं प्रयुक्तस्य धनस्य ग्रहणधर्मा उच्यन्ते—

प्रपन्नमिति । प्रपन्नमभ्युपगतमधमर्णेन धनं साक्ष्यादिभिर्भावितं वा साधयन्प्रत्याहरन् धर्मादिभिरुपायैरुत्तमर्णो नृपतेर्न वाच्यो नि-

---

(१) किंतु मूलवृद्धिर्द्विगुणैव भवतीति कुल्लूकः । (६) गच्छन् घ० ।
(२) गच्छेदिति मुद्रितपुस्तके पाठः ।
(३) अपरिक्षीण-इत्यारभ्य अप्रयच्छन्नधमर्ण-इत्यन्तो भागः ख० पुस्तके नास्ति ।

वारणीयो न भवति । धमादयश्चापार्या मनुना दर्शिताः (मनुः ८। ४९)—'धर्मेण व्यवहारेण छलेनाचरितेन च (१)प्रयुक्तं साधयेदर्थं पञ्चमेन बलेन च' ॥ इति । धर्मेण प्रीतियुक्तेन सत्यवचनेन व्यवहारेण साक्षिलेख्या(२)द्युपायेन । छलेन उत्सवादिव्याजेन भूषणादिग्रहणेन । आचरितेन अभोजनेन पञ्चमेनोपायेन बलेन निगडबन्धनादिना उपचयार्थं प्रयुक्तं द्रव्यमेतैरुपायैरात्मसात्कुर्यादिति । प्रपन्नं साधयन्नर्थं न वाच्य इति वदन् अप्रतिपन्नं साधयन् राज्ञा निवारणीय इति दर्शयति । एतदेव स्पष्टीकृतं कात्यायनेन—'पीडयेद्यो धनी कश्चिद्दणिकं न्यायवादिनम् । तस्मादर्थात्स हीयेत तत्समं चा(३)प्नुयाद्दमम्' ॥ इति । यस्तु धर्मादिभिरुपायैः प्रपन्नमर्थं साध्यमानो याच्यमानो नृपं गच्छेद्राजानमभिगम्य साधयन्तमभियुङ्क्ते स दण्ड्यो भवति, शक्त्यनुसारेण धनिने तद्धनं दाप्यश्च राज्ञा । दापने च प्रकरा दर्शिताः—'राजा तु स्वामिने विप्रं सान्त्वेनैव प्रदापयेत् । देशाचारेण चान्यांस्तु दुष्टान्संपीड्य दापयेत् ॥ रिक्थिनं सुहृदं वापि छलेनैव प्रदापयेत्' ॥ इति । साध्यमानो नृपं गच्छन्नित्येतत्स्मृत्याचारव्यपेतेनेत्यस्य प्रत्युदाहरणं बोद्धव्यम् ॥ ४० ॥

(वी० मि०) बहुषूत्तमर्णेषु केन क्रमेण ऋणं प्रति दाप्य इत्यत्राह—

गृहीतानुक्रमाद्दाप्यो धनिनामधमर्णिकः ॥
दत्त्वा तु ब्राह्मणायैव नृपतेस्तदनन्तरम् ॥ ४१ ॥

समानजातीयानां धनिनामुत्तमर्णानां मध्ये प्रथमं ब्राह्मणस्याऽनन्त(४)रं नृपतेः क्षत्रियस्य पश्चाद् गृहीतमपि दत्त्वा स्थितो वैश्यादेः ऋणं प्रति दाप्यः । तत्रापि वैश्यस्य दत्त्वा शूद्रस्य ऋणं दाप्य इति विशेषः न्यायसाम्यात् । श्रोत्रियस्य ब्राह्मणस्य राज्ञश्च ब्राह्मणन्तरर्णमदत्त्वैव देयम् । तदाह कात्यायनः—

नानर्णसमवाये तु यद्यत्पूर्वं कृतं भवेत् ।
तत्तदेवाऽग्रतो देयं राज्ञः श्रोत्रियतोऽनु च ॥
एकाहे ग्रहणं यत्र तत्र कुर्याद्दणं समम् ।
ग्रहणं लक्षणं लाभमन्यथा तु यथाक्रमम् ॥

---

(१) प्रपन्नं साधयन्नर्थं घ । (२) लेखाद्युपन्यासेन घ । (३) प्राप्नुयात् घ ।
(४) अनन्तर—नास्ति ख. पुस्तके ।

यस्य द्रव्येण यत्पुण्यं साधितं यो विभावयेत् ।
तद्द्रव्यमृणिकेनैव दातव्यं तस्य नान्यथा ॥
राज्ञ ऋणं श्रोत्रियात्प्रागेव दातव्यं पाठक्रमानुसारात् ॥ ४१ ॥

(मिता०) बहुपूत्तमर्णिकेषु युगपत्प्राप्तेष्वेकोऽधमर्णिकः केन क्रमेण दाप्यो राज्ञेत्यपेक्षित आह—

गृहीतेत्यादि । समानजातीयेषु धनिषु येनैव क्रमेण धनं गृहीतं तेनैव क्रमेणाधमर्णिको राज्ञा दाप्यः । भिन्नजातीयेषु तु ब्राह्मणादिक्रमेण ॥ ४१ ॥

(वी० मि०) प्रपन्नमप्यृणं साधयितुमशक्त उत्तमर्णो राजद्वारा साधयति चेत्तदा राज्ञा तत्सकाशात् विंशतितमो भागो ग्राह्य इत्यभिदधान एव प्रागुक्ताधमर्णदण्डस्य संख्यामाह—

राज्ञाधमर्णिको दाप्यः साधिताद्दशकं शतम् ॥
पञ्चकं च शतं दाप्यः प्राप्तार्थोऽप्यु(१)त्तमर्णिकः ॥ ४२ ॥

राज्ञा साधिताद्दापिताद्दणाद्दशकं शतं स्वस्मै अधमर्णिको दाप्यः । सुवर्णशते साधिते दश सुवर्णान् दण्ड्य(२)इति यावत । प्राप्तार्थस्तूत्तमर्णोऽपि पञ्चकं शतं स्वस्मै राज्ञा दाप्यः । सुवर्णशते पञ्च सुवर्णान् दाप्य इति यावत् । तुशब्देन प्राप्ते प्रागुत्तमर्णस्य दापनं व्यवच्छिद्यते । अपिशब्देन दण्ड्यत्वप्रयोजकरूपशून्यस्यापि साधनमात्रनिमित्तकं दानमिति सूचितम् । हिशब्दस्तु क्वचित्पाठः, तत्राप्ययमेवार्थः ॥ ४२ ॥

(मिता०) यदा पुनरुत्तमर्णो दुर्बलः प्रतिपन्नमर्थं धर्मादिभिरुपायैः साधयितुमशक्नुवन् राज्ञा साधितार्थो भवति तदाऽधर्मणस्य दण्डमुत्तमर्णस्य च भृतिदानमाह—

राज्ञेति । अधमर्णिको राज्ञा प्रतिपन्नार्थात्साधिताद्दशकं शतं दाप्यः । प्रतिपन्नस्य साधितार्थस्य दशममंशं राजाऽधमर्णिकाद्दण्डरूपेण गृह्णीयादित्यर्थः । उत्तमर्णस्तु प्राप्तार्थः पञ्चकं शतं भृतिरूपेण दाप्यः । साधितार्थस्य विंशतितमं भागमुत्तमर्णाद्राजा भृत्यर्थं गृह्णी-

---

(१) प्राप्तार्थो ह्युत्तमर्णिकः—इति मुद्रितपुस्तके पाठः ।

(२) दण्डय—इत्यारभ्य पञ्च सुवर्णान्–इत्यन्तं नास्ति ख० पुस्तके।

यादित्यर्थः । अप्रतिपन्नार्थसाधने तु दण्डविभागो दर्शितः—'निह्नवे भावितो दद्यात्' इत्यादिना ॥ ४२ ॥

(वी० मि०) निर्धनं त्वधमर्णं प्रत्याह—

हीनजातिं परिक्षीणमृणार्थं कर्म कारयेत् ॥
ब्राह्मणस्तु परिक्षीणः शनैर्दाप्यो यथोदयम् ॥ ४३ ॥

हीनजातिं उत्तमर्णादनुत्कृष्टजातिमधमर्णं परिक्षीणं निर्धनं ऋणनिस्तारार्थमुत्तमर्णः कर्म स्वापेक्षितं कृषिशुश्रूषणादि कारयेत् । ब्राह्मणस्त्वधमर्णः परिक्षीणोऽपि यथोदयं यथाधनोत्पत्ति शनैः शनैः अवश्यकर्तव्यकुटुम्बभरणाद्यविरोधेन स्वल्पं स्वल्पमपि धनं दाप्योन तु जात्या उत्तमर्णसमोऽपि कर्म कारणीयः । इदमुपलक्षणम् । उत्तमर्णादुत्कृष्टक्षत्रियादिरपि परिक्षीणः शनैर्दाप्यः । हीनजातित्वस्य कर्मकरणे प्रयोजकत्वेन ग्रन्थकृताऽभिधानात् ।

कर्मणा क्षत्रविट्शूद्रान् समहीनांस्तु दापयेत् ।

इति कात्यायनवचनाच्च । अत्र च कर्मणा ऋणनिस्तारो बोध्यः ॥ ४३ ॥

(मिता०) सधनमधमर्णिकं प्रत्युक्तम्, अधुना निर्धनमधमर्णिकं प्रत्याह—

हीनजातिमिति । ब्राह्मणादिरुत्तमर्णो हीनजातिं क्षत्रियादिजातिं परीक्षीणं निर्धन(१)मृणार्थं ऋणनिवृत्त्यर्थं कर्म स्वकर्म स्वजात्यनुरूपं कारयेत् तत्कुटुम्बानिरोधेन । ब्राह्मणस्तु पुनः परिक्षीणो निर्धनः शनैः शनैः यथोदयं यथासंभवमृणं दाप्यः । अत्र च हीनजातिग्रहणं समानजातेरप्युपलक्षणम् । अतश्च समानजातिमपि परिक्षीणं यथोचितं कर्म कारयेत् । ब्राह्मणग्रहणं च श्रेयोजातेरुपलक्षणम् । अतश्च क्षत्रियादिरपि परिक्षीणो वैश्यादेः शनैः शनैर्दाप्यो यथोदयम् । एतदेव मनुना स्पष्टीकृतम् (८।१७७)—कर्मणापि समं कुर्या(२)द्धनिकेनाधमर्णिकः । समोऽपकृष्टजातिश्च दद्याच्छ्रेयांस्तु तच्छनैः' ॥ इति । उत्तमर्णेन समं निवृत्तोत्तमर्णाधमर्णव्यपदेशमात्मानमधमर्णः कर्मणा कुर्यादित्यर्थः ॥ ४३ ॥

---

(१) मृणार्थं कर्म घ. । (२) द्धनिकायाधमर्णिक· ।

(वी० मि०) पूर्वोक्तां वृद्धिं क्वचिदपवदन्नेव तत्राऽधमर्णस्य कृत्यमाह—

दीयमानं न गृह्णाति प्रयुक्तं यः स्वकं धनम् ॥
मध्यस्थस्थापितं त(?)त्स्याद्वर्धते न ततः परम् ॥ ४४ ॥

अधमर्णेन दीयमानं स्वकमृणरूपं धनं य उत्तमर्णो वृद्धिलोभादिना न गृह्णाति तस्य तद्धनं मध्यस्थहस्तेऽधमर्णेन स्थापनीयं स्यात्तच्च ततः परं मध्यस्थस्थापनानन्तरं न वर्धते ॥ ४४ ॥

(मिता०) मध्यस्थस्थापितं न वर्धते—

दीयमानमिति । किञ्च—उपचयार्थं प्रयुक्तं धनं अधमर्णेन दीयमानमुत्तमर्णो वृद्धिलोभाद्यदि न गृह्णाति तदाधमर्णेन मध्यस्थहस्ते स्थापितं यदि स्यात्तदा ततः स्थापनादूर्ध्वं न वर्धते । अथ स्थापितमपि याच्यमानो न ददाति ततः पूर्ववद्वर्धत एव ॥ ४४ ॥

(वी० मि०) अथ ऋणं यादृशं यैः प्रतिदेयं यैश्च न प्रतिदेयं तदाह सप्तभिः श्लोकैः—

अविभक्तैः कुटुम्बार्थे यदृणं तु कृतं भवेत् ॥
दद्युस्तद्विक्थिनः प्रेते प्रोषिते वा कुटुम्बिनि ॥ ४५ ॥

अविभक्तैर्भ्रातृपित्रादिभिः कुटुम्बस्याऽवश्यभरणीयस्यार्थे भरणनिमित्तं यदृणं कृतं भवति तदृणं ऋक्थिनोऽविभक्ता भ्रात्रादयः सर्वे कुटुम्बिनि कुटुम्बार्थमृणादिकारिणि पित्रादौ प्रेते मृते प्रोषिते वा दद्युः । तुशब्देन ऋणकर्त्रैव देयमिति स्वासाधारणकार्यार्थं कृतस्य । परैः ऋक्थिभिर्दानं च व्यवच्छिद्यते ॥ ४५ ॥

(मिता०) इदानीं देयमृणं यदा येन च देयं तदाह—

दद्युरिति । अविभक्तैर्बहुभिः कुटुम्बार्थमेकैकेन वा यदृणं कृतं तदृणं कुटुम्बी दद्यात् । तस्मिन्प्रेते प्रोषिते वा तद्विक्थिनः सर्वे दद्युः ॥४५॥

(वी० मि०) पूर्वोक्ते उभयत्र सम्बध्यते—

न योषित्पतिपुत्राभ्यां न पुत्रेण कृतं पिता ॥
दद्यादृते कुटुम्बार्थान्न पतिः स्त्रीकृतं तथा ॥ ४६ ॥

पतिपुत्राभ्यां कृतमृणं योषित् ऋणकर्त्तुः पत्नी जननी वा नोत्तम-

---

(१) चेत्स्या०-इति मुद्रितपुस्तके पाठः ।

र्णाय प्रतिदद्यात्, पुत्रेण कृतमृणं पिता न दद्यात्। स्त्रिया पत्न्या तथा कुटुम्बार्थादृते कृतमृणं पतिर्न दद्यात्। इदमुपलक्षणम्। यदाह विष्णुः-'न स्त्रीकृतं पतिपुत्रौ' ॥ ४६ ॥

(मिता०) येन देयमित्यत्र प्रत्युदाहरणमाह—

न योषिदित्यादि। पत्या कृतमृणं योषिद्भार्या नैव दद्यात्। पुत्रेण कृतं योषिन्माता न दद्यात्। तथा पुत्रेण कृतं पिता न दद्यात्। तथा भार्याकृतं पतिर्न दद्यात्। कुटुम्बार्थादृत इति (१)सर्वशेषः। अतश्च कुटुम्बार्थं येन केनापि कृतं तत् कुटुम्बिना देयम्। तदभावे तदाऽयहैरदेयमित्युक्तमेव ॥ ४६ ॥

(वी० मि०) पितृकृतमपि किञ्चिदृणमदेयमित्याह—

सुराकामद्यूतकृतं दण्डशुल्कावशिष्टकम् ॥
वृथादानं तथैवेह पुत्रो दद्यान्न पैतृकम् ॥ ४७ ॥

सुरादिभिर्निमित्तैः कृतं दण्डं शुल्कं वा तदवशिष्टं च। त्रयाणामेकवद्भावो द्वन्द्वः। वृथा धर्ममनुद्दिश्य दानं दातुं प्रतिश्रुतमेतत्सर्वं पैतृकं इह ऐहिकाभियोगानिवृत्त्यर्थं पुत्रो न दद्यात्। पितुः परलोकशुद्ध्यर्थं त्विच्छया दद्यात्। एवकारेण पित्रा धर्मार्थं प्रतिश्रुतस्यादानं व्यवच्छिद्यते।

स्वस्थेनार्तेन चादेयं श्रावितं धर्मकारणात्।
अदत्त्वा तु मृते दाप्यस्तत्सुतो नात्र संशयः ॥

इति कात्यायनवचनात्। तथाशब्देन ऋष्यन्तरोक्तवाणिज्यादिसंग्रहः। तथा च गौतमः—'प्रातिभाव्यवणिक्शुल्कमद्यद्यूतदण्डान् पुत्रान(२)ध्यावहेयुः'। प्रातिभाव्यं दर्शनप्रत्ययप्राप्तिभाव्यम्। बृहस्पतिः—

सौराक्षिकं वृथादानं कामक्रोधपरिश्रुतम्।
प्रातिभाव्यं दण्डशुल्कशेषं पुत्रान्न दापयेत् ॥

व्यासः—

दण्डो वा दण्डशेषो वा शुल्कं तच्छेष एव वा।
न दातव्यस्तु पुत्रेण यच्च न व्यावहारिकम् ॥

---

(१) इत आरभ्य न दापयेदित्यतः पूर्वं यावन्नास्ति ख० पुस्तके।
(२) सर्वविशेषणं ख.।

व्यावहारिकं व्यवहारबहिःकृतं बलात्कारादिकारितम्। कामक्रोधकृत्यमाह कात्यायनः—

लिखित्वा मुक्तकं चापि देयं यत्तु प्रतिश्रुतम् ।
परपूर्वस्त्रियै तत्तु विद्यात्कामकृतं ऋणम् ॥
यत्र हिंसां समुत्पाद्य क्रोधाद्द्रव्यं विनाश्य वा ।
उक्तुष्टिकरं यत्तु विद्यात्क्रोधकृतं तु तत् ॥

अत्र दण्डग्रहणेनैव तच्छेषस्योपादानात् पुनस्तद्ग्रहणमतिमहति दण्डे दातव्यमिति, कियच्छेषस्तु सर्वथा न देयः । स्वल्पे तु दण्डे सर्वोऽपि न देय इति लभ्यते इति रत्नाकरः ॥४७॥

(मिता०) पुत्रपौत्रैर्ऋणं देयमिति वक्ष्यति तस्य पुरस्तादपवादमाह—सुरेति । सुरापानेन यत्कृतमृणं कामकृतं स्त्रीव्यसन(१)निमित्तं द्यूते पराजयनिमित्तं दण्डशुल्कयोरवशिष्टं वृथादानं धूर्तबन्दिमल्लादिभ्यो यत्प्रतिज्ञातम्-'धूर्ते वन्दिनि मल्ले च कुवैद्ये कितवे शठे । चाटचारणचौरेषु दत्तं भवति निष्फलम्' ॥ इति स्मरणात् । एतद्दणं पित्रा कृतं पुत्रादिः शौण्डिकादिभ्यो न दद्यात् । अत्र दण्डशुल्कावशिष्टकमित्यवशिष्टग्रहणात्सर्वं दातव्यमिति न मन्तव्यम् । 'दण्डं वा दण्डशेषं वा शुल्कं तच्छेषमेव वा । न दातव्यं तु पुत्रेण यच्च न व्यावहारिकम्' ॥ इत्यौशनसस्मरणात् । गौतमेनाप्युक्तम्-'मद्यशुल्कद्यूतकामदण्डान्पु(२)त्रानाध्यावहेयुः' इति । न पुत्रस्योपरि भवन्तीत्यर्थः । अनेनादेयमृणमुक्तम् ॥ ४७ ॥

(वी० मि०) न पतिः स्त्रीकृतं तथेत्युक्तमपवदति—

गोपशौण्डकशैलूषरजकव्याधयोषिताम् ॥
ऋणं दद्यात्पतिस्तासां यस्माद्वृत्तिस्तदाश्रया ॥ ४८ ॥

गोपो गोपालः शौण्डकः सुराकारकः शैलूषो नटः रजको(३) वस्त्ररञ्जनकर्ता व्याधो मृगजीवी एतेषां या योषितस्तासामृणं पतिः दद्यात् । यतस्तेषां गोपादीनां वृत्तिर्जीवनं तदाश्रया योषिदधीना । अत्र हेतुमन्निगदस्वरसादन्येषि योषिदुपजीविनः धीवरकुलालादयो योषित्कृतमृणं दद्युरिति गम्यते न योषित्पतिपुत्राभ्यामित्यन्तेन ॥४८॥

---

(१) वस्त्ररञ्जक इति ख० पुस्तकेऽधिकम् । (२) धर्तुकामेन-इति क० पुस्तके पाठः ।
(३) निर्वृत्तं ख० ग० ।

(मिता०) न पतिः स्त्रीकृतं तथेत्यस्यापवादमाह—

गोपेति । गोपो गोपालः । शौण्डिकः सुराकरः । शैलूषो नटः । रजको वस्त्राणां रञ्जकः । व्याधो मृगयुः । एतेषां योषिद्भिर्यद्दणं कृतं तत्पतिभिर्देयम् । यस्मात्तेषां वृत्तिर्जीवनं तदाश्रया योषिदधीना । यस्माद्वृत्तिस्तदाश्रयेति हेतुव्यपदेशादन्येऽपि ये योषिदधीनजीवनास्तेऽपि योषित्कृतमृणं दद्युरिति गम्यते ॥ ४८ ॥

(वी० मि०) भार्या पतिकृतमृणं न दद्यादित्युक्तं तत्र विशेषमाह—

प्रतिपन्नं स्त्रिया देयं पत्या वा सह यत्कृतम् ॥
स्वयं कृतं वा यद्दणं नान्यत् स्त्री दातुमर्हति ॥ ४९ ॥

पतिकृतमृणं केनापि निमित्तेन स्वयं प्रतिदेयतया प्रतिपन्नं स्वीकृतं यत्तत्पत्या सह वा यत्कृतमृणं तत्स्वयमेव वा स्त्रिया यद्दणं कृतं तत् स्त्रिया देयं नान्यद्दणं स्त्री दातुमर्हति । पत्येति पुत्रस्याप्युपलक्षणम् । यदाह कात्यायनः—

भर्त्रा पुत्रेण वा सार्द्धं केवलेनात्मना कृतम् ।

नारदः—

न स्त्री पतिकृतं दद्याद्दणं पुत्रकृतं तथा ।
म(१)र्तुकामेन वा भर्त्रा उक्ता देहि ऋणं प्रिये ॥
अप्रपन्नापि स तदा धनं यद्याश्रितं स्त्रिया ॥ ४९ ॥

(मिता०) पतिकृतं भार्या न दद्यादित्यस्यापवादमाह—

प्रतिपन्नमिति । मुमूर्षुणा प्रवत्स्यता वा पत्या नियुक्तया ऋणदाने यत्प्रतिपन्नं तत्पतिकृतमृणं देयम् । यच्च पत्या सह भार्यया ऋणं कृतं तदपि भर्तृभावे भार्यया अपुत्रया देयम् । यच्च (२)स्वयं कृतं ऋणं तदपि देयम् । ननु प्रतिपन्नादि त्रयं स्त्रिया देयमिति न वक्तव्यं, सन्देहाभावात् । उच्यते—'भार्या पुत्रश्च दासश्च त्रय एवाधनाः स्मृताः । यत्ते समधिगच्छन्ति यस्यैते तस्य तद्धनम्' ॥ इति वचनान्निर्धनत्वेन प्रतिपन्नादिष्वदानाश(३)ङ्कायामिदमुच्यते प्रतिपन्ने स्त्रिया देयमित्यादि । न चानेन वचनेन स्त्र्यादीनां निर्धनत्वमभिधीयते पारतन्त्र्यमात्रप्रतिपादनपरत्वात् । एतच्च विभागप्रकरणे स्पष्टीकरि-

---

(१) पुत्रानध्यावहेयुः. ख० ग० ।
(२) स्वयमेव ख. i (३) शंकयेदमुच्यते घ.।

प्यते । नान्यत्स्त्री दातुमर्हतीत्येतत्तर्हि न वक्तव्यं, विधानेनैवान्यत्र प्रतिषेधसिद्धेः । उच्यते—'प्रतिपन्नं स्त्रिया देयं पत्या वा सह यत्कृतम्' इत्येतयोरपवादार्थमुच्यते । अन्यत्सुराकामादिवचनोपात्तं प्रतिपन्नमपि पत्या सह कृतमपि न देयमिति ॥ ४९ ॥

(वी० मि०) पित्रा पितामहेन वा कृतस्य ऋणस्य तेन दानासम्भवे केन देयमित्यत्राह—

पितरि प्रोषिते प्रेते व्यसनाभिप्लुतेऽपि वा ।
पुत्रपौत्रैर्ऋणं देयं निह्नवे साक्षिभावितम् ॥ ५० ॥

प्रेषिते प्रवासिनि, प्रेते, व्यसनैरचिकित्स्यव्याध्यादिभिरभिप्लुते आक्रान्ते वा पितरि पितामहे वा तदीयमृणं निह्नवे ऋणग्रहीत्रा ऋणसंगोपने पुत्रपौत्राभ्यामृणापलापे वा साक्ष्यादिभिः प्रमाणैर्भावितमुत्तमर्णेन प्रमापितं सद्देयं पुत्रैः पौत्रैर्वा । अपिकारेण प्रव्रजितपरिग्रहः । 'धनग्राहिणि प्रेते प्रव्रजिते वा द्विदशाऽसमाः प्रवसिते वा पुत्रपौत्रैर्वा ऋणं देयं नातः परमनी(१)प्सुभि'रिति विष्णुवचनात् । द्विदशासमा इति कुटुम्बार्थकृतादृणादन्यत्रेति स्मृतिसारः । पुत्रपौत्रैरित्यनेन प्रपौत्रादिव्यवच्छेदः, 'नातः परमनीप्सुभि'रित्यभिधानात् । अत्र विशेषमाह व्यासः—

ऋणं पैतामहं देयं प्रतिभाव्यागतं सुतः ।
समं दाप्यस्तत्सुतस्तु न दाप्य इति निश्चयः ॥
समं वृद्धिशून्यं, तत्सुतः समदातुः सुतः ॥ ५० ॥

(मिता०) पुनरपि यदृणं दातव्यं येन च दातव्यं यत्र च काले दातव्यं तत्त्रितयमाह—

पितरीति । पिता यदि दातव्यमृणमदत्त्वा प्रेतो दूरदेशे गतोऽचिकित्सनीयव्याध्याद्यभिभूतो वा तदा तत्कृतम्(२)णमाख्यापनेऽवश्यं देयं पुत्रेण वा पितृधनाभावेऽपि पुत्रत्वेन पौत्रत्वेन च । तत्र क्रमोऽप्ययमेव—'पित्रभावे पुत्रः पुत्राभावे पौत्र' इति पुत्रेण पौत्रेण वा निह्नवे कृते अर्थिना साक्ष्यादिभिर्भावितमृणं देयं पुत्रपौत्रैरित्यन्वयः । अत्र पितरि प्रोषित इत्येतावदुक्तम्, कालविशेषस्तु नारदेनोक्तो

---

(१) नातः परमनीषिभिरिति ख० पुस्तके संशोधितोऽप्राकरणिकः पाठो दृश्यते ।
[२] कृतमृणमवश्यं घ० ।

व्यसना(१)ग्रस्तद्रविणार्हधुर्य्यपुत्रहीनस्य ऋक्थिनोऽधमर्णस्य ऋक्थग्राही येन केनापि प्रकारेण तत्स्वत्वास्पदीभूतद्रव्याभियोज्यः स उदासीनो व्यवस्थितः धनमृणरूपं दाप्यः । तदभावेऽधमर्णभार्याग्राही दाप्यः । तदभावे पूर्वोक्तविशेषणहीनोऽनन्याश्रितसर्वस्वः आसमन्ताद्भावेनाऽन्यैः ऋक्थग्राहिभिर्भ्रात्रादिभिः श्रितं यस्य तद्भिन्नः पुत्रो दाप्यः। चकारोऽनुक्तदातृसमुच्चयार्थः, तेन व्यसनाग्रस्तो द्रविणार्हो धुर्य्यः पुत्रोऽतादृशो वा पुत्रो वा गृहीतपितृसर्वस्वः तदीयर्णदानेऽधिकारी सर्वस्वग्राही । अत्राद्यन्तराभावे व्यसनाग्रस्तद्रविणार्हधुर्य्यपुत्रस्तदभावे तूदासीन ऋक्थग्राही तदभावे तथाविधस्य पुत्रहीनस्य ऋक्थिनः योषिद्ग्राही तदभावे पूर्वोक्तविशेषणशून्योऽपि पुत्रो धनं दाप्य इति पर्यवसितम् । एवकारः पुत्रहीनस्येत्यनन्तरं योज्यः, तेन धुर्य्यपुत्रवत ऋणं न ऋक्थग्राही योषिद्ग्राही वा दद्यादिति दर्शितम् । तथा च बृहस्पतिः—

ऋणभाग्व्यवहारी तु यदि सोपद्रवः सुतः ।
स्त्रीहारी तु तदैव स्यदभावे धनहारिणः ॥

कात्यायनोऽपि—

ऋणं तु दापयेत्पुत्रं यदि स्यान्निरुपद्रवः ।
द्रविणार्हश्च धुर्यश्च नान्यथा दापयेत्सुतम् ॥
व्यसनाभिप्लुतः पुत्रो बालो वा यत्र दृश्यते ।
द्रव्यहृद्दापयेत्तं तु तस्याभावे पुरन्ध्रिहृत् ॥

इयं च व्यवस्था व्यसनन्यायोभयानुसारिणी मिथानुमता चेति नैतद्विरुद्धं निबन्धान्तरालिखनमाहर्तव्यम् । 'पुत्रहीनस्य ऋक्थिन' इत्येतेनाऽपुत्रस्योत्तमर्णस्य ऋक्थिनः सपिण्डस्य स्थाने ऋणं प्रति दाप्याः । अधमर्णा इत्युच्यत इति तु मिताक्षरा । योषिद्ग्राहं विशिनष्टि कात्यायनः—

निर्द्धनैरनपत्यैस्तु यत्कृतं शौण्डिकादिभिः ।
तत्स्त्रीणामुपभोक्ता तु दद्यात्तद्धनमेव तु ॥

आदिपदेन स्वयंधीनवृत्तयो ग्राह्याः । तथा—

दीर्घप्रवासिनिर्धूतजडोन्मत्तादिलिङ्गिनाम् ।
जीवानामपि दातव्यं तत् स्त्रीद्रव्यसमाश्रितैः ॥

---

(१) व्यसनग्रस्त-इति ख० पुस्तके पाठः ।

नारदः—

कन्यैवाक्षतयोनिर्या पाणिग्रहणदूषिता ।
पुनर्भूः प्रथमा प्रोक्ता पुनःसंस्कारकर्मणा ॥
देशधर्मानवेक्ष्य स्त्री गुरुभिर्या प्रदीयते ।
उत्पन्नसाहसाऽन्यस्मै सा द्वितीया प्रकीर्तिता ॥
असत्सु देवरेषु स्त्री बान्धवैर्या प्रदीयते ।
सवर्णाय सपिण्डाय सा तृतीया प्रकीर्तिता ॥
स्त्री प्रसूताऽप्रसूता वा पत्यावेव तु जीवति ।
कामात्समाश्रयेदन्यं प्रथमा स्वैरिणी तु सा ॥
कौमारं पतिमुत्सृज्य या त्वन्यं पुरुषं श्रिता ।
पुनः पत्युर्गृहं यायात् द्वितीया सा प्रकीर्तिता ॥
मृते भर्तरि तु प्राप्तान्देवरादीनपास्य या ।
उपगच्छेत्परं कामात्सा तृतीया प्रकीर्तिता ॥
प्राप्ता देशाद्धनक्रीता क्षुत्पिपासातुरा तु या ।
तवाहमित्युपगता सा चतुर्थी प्रकीर्तिता ॥
अन्तिमा स्वैरिणीनां या प्रथमा या पुनर्भुवाम् ।
ऋणं तयोः पतिकृतं दद्याद्यस्ते समश्नुते ॥-॥ ५१ ॥

(मिता०) ऋणापाकरणे ऋणी तत्पुत्रः पौत्र इति त्रयः कर्तारो दर्शितास्तेषां च समवाये क्रमोऽपि दर्शितः । इदानीं कर्त्रन्तरसमवाये च क्रममाह—

रिक्थेति । अन्यदीयं द्रव्यमन्यस्य क्रयादिव्यतिरेकेण यत्स्वीयं भवति तद्रिक्थम् । विभागद्वारेण रिक्थं गृह्णातीति रिक्थग्राहः स ऋणं दाप्यः । एतदुक्तं भवति—यो यदीयं द्रव्यं रिक्थरूपेण गृह्णाति स तत्कृतमृणं दाप्यो न चौरादिः । योषितं भार्यां गृह्णातीति योषिद्ग्राहः स तथैवर्णं दाप्यः । यो यदीयां योषितं गृह्णाति स तत्कृतमृणं दाप्यः । योषितोऽविभाज्यद्रव्यत्वेन रिक्थव्यपदेशानर्हत्वाद्भेदेन निर्देशः । पुत्रश्चानन्याश्रितद्रव्यं ऋणं दाप्यः । अन्यमाश्रितमन्याश्रितं मातृपितृसम्बन्धि द्रव्यं यस्यासावन्याश्रितद्रव्यः न अन्याश्रितद्रव्योऽनन्याश्रितद्रव्यः पुत्रहीनस्य

रिक्थिन ऋणं दाप्य इति सम्बन्धः । एतेषां (१)समवाये क्रमश्च पाठक्रम एव । 'रिक्थग्राह ऋणं दाप्यस्तदभावे योषिद्ग्राहस्तदभावे पुत्र' इति । नन्वेतेषां समवाय एव नोपपद्यते—'न भ्रातरो न पितरः पुत्रा रिक्थहराः पितुः' इति पुत्रे सत्यन्यस्य रिक्थग्रहणासम्भवात् । योषिद्ग्राहोऽपि नोपपद्यते, (मनुः५।१६२) 'न द्वितीयश्च साध्वीनां क्वचिद्भर्तोपदिश्यते' इति स्मरणात् । तथा तद्दणं पुत्रो दाप्य इत्यप्ययुक्तम् । 'पुत्रपौत्रैर्ऋणं देयम्' इत्युक्तत्वात् । अनन्याश्रितद्रव्य इति विशेषणमप्यनर्थकं पुत्रे सति द्रव्यस्यान्याश्रयणासम्भवात्, सम्भवे च रिक्थग्राह इत्यनेनैव गतार्थत्वात् । पुत्रहीनस्य रिक्थिन इत्येतदपि न वक्तव्यम् । पुत्रे सत्यपि रिक्थग्राह ऋणं दाप्य इति स्थितम् । असति पुत्रे रिक्थग्राहः सुतरां दाप्य इति सिद्धमेवेति । अत्रोच्यते-पुत्रे सत्यप्यन्यो रिक्थग्राही सम्भवति । क्लीवान्धबधिरादीनां पुत्रत्वेऽपि रि(२)क्थहरत्वाभावात् । तथा च क्लीवादीननुक्रम्य 'भर्तव्याः स्युर्निरंशकाः' इति वक्ष्यति । तथा-'सवर्णापुत्रोऽप्य(४)न्यायवृत्तिर्न लभेतैकेषाम्' इति गौतमस्मरणात् । अतश्च क्लीवादिषु पुत्रेषु सत्सु अन्यायवृत्ते च सवर्णापुत्रे सति रिक्थग्राही पितृव्यतत्पुत्रादिः । योषिद्ग्राहो यद्यपि शास्त्राविरोधेन न सम्भवति तथाप्यतिक्रान्तनिषेध; पूर्वपतिकृतर्णापाकरणाधिकारी भवत्येव । योषिद्ग्राहो यश्चतसृणां स्वैरिणीनामन्तिमां गृह्णाति, यश्च पुनर्भुवां तिसृणां प्रथमाम् । यथाह नारदः-'परपूर्वाः स्त्रियस्त्वन्याः सप्त प्रोक्ता यथाक्रमम् । पुनर्भूस्त्रिविधा तासां स्वैरिणी तु चतुर्विधा ॥ कन्यैवाक्षतयोनिर्या पाणिग्रहणदूषिता । पुनर्भूः प्र(५)थमा प्रोक्ता पुनःसंस्कारकर्मणा ॥ देशधर्मानवेक्ष्य स्त्री गुरुभिर्या प्रदीयते । उत्पन्नसाहसान्यस्मै सा द्वितीया प्रकीर्तिता' ॥ उत्पन्नसाहसा उत्पन्नव्यभिचारा । 'अस्त्सु देवरेषु स्त्री बान्धवैर्या प्रदीयते । सवर्णाय सपिण्डाय सा तृतीया प्रकीर्तिता ॥ स्त्री प्रसूताऽप्रसूता वा पत्यावेव तु जीवति । कामात्समाश्रयेदन्यं प्रथमा स्वैरिणी तु सा ॥ कौमारं पतिमुत्सृज्य यान्यं पुरुषं श्रिता । पुनः पत्युर्गृहं यायात्सा द्वितीया प्रकीर्तिता ॥

---

(१)समवाय एककालावच्छेदेन, प्राप्तिः । (२) रिक्थग्राहाभावात् ख. ।

(३) भर्तव्यास्तु ख. भर्तव्याश्च घ. । (४) अन्यायवृत्तौ न. । (५) प्रथमा नाम ख. ग. ।

मृते भर्तरि तु प्राप्तान्देवरादीनपास्य या । उपगच्छेत्परं कामात्सा तृतीया प्रकीर्तिता ॥ प्रा(१)प्ता देशाद्धनक्रीता क्षुत्पिपासातुरा च या । तवाहमित्युपगता सा चतुर्थी प्रकीर्तिता ॥ अन्तिमा स्वैरिणीनां या प्रथमा च पुनर्भुवाम् । ऋणं तयोः पतिकृतं दद्याद्यस्तामुपाश्रितः' ॥ इति । तथान्योऽपि योपिद्ग्राह ऋणापाकरणेऽधिकारी तेनैव दर्शितः- 'या तु सप्रधनैव स्त्री सापत्या वान्यमाश्रयेत् । सोऽस्या दद्याद्ऋणं भर्तुरुत्सृजेद्वा तथैव ताम्' ॥ प्रकृष्टेन धनेन सह वर्तत इति सप्रधना । बहुधना यावत् । तथा 'अधनस्य ह्यपुत्रस्य मृतस्योपैति यः स्त्रियम् । ऋणं(२) वोढुः स भजते सैव चास्य धनं स्मृतम्' ॥ इति । पुत्रस्य पुनर्वचनं क्रमार्थम् । अनन्याश्रितद्रव्यं इति बहुषु पुत्रेषु रिक्थाभावेऽप्यंशग्रहणयोग्यस्यैवर्णापाकरणेऽधिकारी नायोग्यस्यान्धादेरित्येवमर्थम् । पुत्रहीनस्य रिक्थिन इत्येतदपि पुत्रपौत्रहीनस्य प्रपौत्रादयो यदि रिक्थं गृह्णन्ति तदा ऋणं दाप्या नान्यथेत्येवमर्थम् । पुत्रपौत्रौ च रिक्थग्रहणाभावेऽपि दाप्यावित्युक्तम् । यथाह नारदः-'क्रमादव्याहतं प्राप्तं पुत्रैर्यन्नर्णमुद्धृतम् । दद्युः पैतामहं पौत्रास्तच्चतुर्थान्निवर्तते' ॥ इति सर्वं निरवद्यम् । यद्वा योपिद्ग्राहाभावे पुत्रो दाप्य इत्युक्तम् । पुत्राभावे योपिद्ग्राह्यो दाप्य इत्युच्यते । पुत्रहीनस्य रिक्थिन इति रिक्थशब्देन योपिदेवोच्यते । 'सैव चास्य धनं स्मृतम्' इति स्मरणात् ; 'यो यस्य हरते दारान्स तस्य हरते धनम्' इति च । ननु योपिद्ग्राहाभावे पुत्र ऋणं दाप्यः पुत्राभावे योपिद्ग्राह इति परस्परविरुद्धम् । उभयसद्भावे न कश्चिद्दाप्य इति । नैष दोषः । अन्तिमस्वैरिणीग्राहिणः प्रथमपुनर्भूग्राहिणः सप्रधनस्त्रीहारिणश्चाभावे पुत्रो दाप्यः । पुत्राभावे तु निर्धननिरपत्ययोपिद्ग्राही दाप्य इति । एतदेवोक्तं नारदेन-'धनस्त्रीहारिपुत्राणामृणभाग्यो धनं हरेत् । पुत्रोऽसतोः स्त्रीधनिनोः स्त्रीहारी धनिपुत्रयोः' ॥ इति । धनस्त्रीहारिपुत्राणां समवाये यो धनं हरेत्स ऋणभाक् । पुत्रोऽसतोः स्त्रीधनिनोः स्त्री च धनं च स्त्रीधने ते विद्येते ययोस्तौ स्त्रीधनिनौ तयोः स्त्रीधनिनोरसतोः पुत्र एव ऋणभाक् भवति । धनिपुत्रयोरसतोः स्त्रीहार्यवर्णभाक् । स्त्रीहार्यभावे पुत्र ऋणभाक् पुत्राभावे स्त्रीहारीति विरो(३)धाभासपरिहारः पूर्व-

---

(१) प्राप्तोदृग्रामकृता ग. । (२) ऋणमेतु ग. । (३) विरोधाविरोधाभास ख. ।

वत् । पुत्रहीनस्य रिक्थिन इत्यस्यान्या व्याख्या । एते धनस्त्रीहारि· पुत्रा ऋणं कस्य दाप्या इ(१)त्यपेक्षायां उत्तमर्णस्य दाप्यास्तदभावे त· (२)त्पुत्रादेः, पुत्राद्यभावे कस्य दाप्या इत्येपक्षायामिदमुपातिष्ठते पुत्र· हीनस्य रिक्थिन इति । पुत्राद्यन्वयहीनस्योत्तमर्णस्य यो रिक्थी रि· क्थग्रहणयोग्यः सपिण्डादिस्तस्य रिक्थिनो दाप्याः । तथा च नार· देन-'ब्राह्मणस्य तु यद्देयं सान्वयस्य च(३) नास्ति चेत् । निर्वपेत्तत्स· कुल्येषु तद(४)भावेऽस्य बन्धुषु' ॥ इत्यभिहितम् । 'यदा तु न सकु· ल्याः स्युर्न च सम्बन्धिबान्धवाः । तदा दद्याद्द्विजेभ्यस्तु तेष्वसत्स्व प्सु निक्षिपेत्' ॥ इति ॥ ५१ ॥

(वी० मि०) ऋणदानरूपे विवादपदे 'ऋणं देयमदेयं चे·' त्यादिनाऽभिहिते यस्मै न देयमृणं तमभिदधान एव प्रसङ्गादन्य· दपि तादृशस्थले निषेधति—

भ्रातॄणामथ दम्पत्योः पितुः पुत्रस्य चैव हि ॥
प्रातिभाव्यमृणं साक्ष्यमविभक्ते न तु स्मृतम् ॥ ५२ ॥

अविभक्त इति भावे क्तः, तेन विभागाभावे भ्रातॄणां परस्परं दम्पत्योर्भार्यापत्योः पितृपुत्रयोश्च प्रातिभाव्यं लग्नकं ऋणं ऋणप्रदानं साक्ष्यं विवादपदार्थसाधकं साक्षित्वं न स्मृतं न स्मृत्यनुमतम् । अथ· शब्दः पितृव्यभ्रातृपुत्रादिसमुच्चयार्थः । चशब्दः संसृष्टिनां समुच्च· यार्थः । एवकारेण परस्परं प्रातिभाव्यादिकं न भवतीति लभ्यते । हिशब्दः पादपूरणार्थः । तुशब्दोऽनुमतेरसाधारणद्रव्यस्य च व्यवच्छे· दार्थः, तेन यदा प्रातिभाव्यं साक्षित्वं चापरो मन्यते तदा पुत्रादिः पित्रादेः प्रातिभूः साक्षी च भवत्येव । सौदायिके च द्रव्येऽविभक्तयो· रपि परस्परमृणव्यवहारो भवत्विति । विभागे तु भ्रात्रादीनां प्राति· भाव्यं भवत्येव, अविभक्त इत्यभिधानात् बाधकाभावाच्च । प्राति· भाव्ये साक्ष्ये चान्ये विशेषा वक्ष्यन्ते ॥ ५२ ॥

(मिता०) अधुना पुरुषविशेषे ऋणग्रहणं प्रतिषेधयन्प्रसङ्गादन्य· दपि प्रतिषेधति—

भ्रातॄणामिति । प्रतिभुवो भावः प्रातिभाव्यम् । भ्रातॄणां दम्पत्योः पितापुत्रयोश्चाविभक्ते द्रव्ये द्रव्यविभागात्प्राक्प्रातिभाव्यमृणं साक्ष्यं

(१) इति विवक्षायां ख. । (२) तत्स्त्रीपुत्रादेः घ. ।
(३) नचास्तिचेत् घ. । (४) भावे स्वबन्धुषु ख. ।

च न स्मृतं मन्वादिभिः । अपि तु प्रतिषिद्धं साधारणधनत्वात् । प्रातिभाव्यसाक्षित्वयोः पक्षे द्रव्यव्ययावसानत्वात्, ऋणस्य चावश्यप्रतिदेयत्वात् । एतच्च परस्परानुमतिव्यतिरेकेण । परस्परानुमत्या त्वविभक्तानामपि प्रातिभाव्यादि भवत्येव । विभागादूर्ध्वं तु परस्परानुमतिव्यतिरेकेणापि भवति । ननु दम्पत्योर्विभागात्प्रातिभाव्यादिप्रतिषेधो न युज्यते । तयोर्विभागाभावेन विशेषणानर्थक्यात् । विभागाभावश्चापस्तम्बेन दर्शितः—'जायापत्योर्न विभागो विद्यत' इति । सत्यम् । श्रौतस्मार्ताग्निसाध्येषु कर्मसु तत्फलेषु च विभागाभावो न पुनः सर्वकर्मसु द्रव्येषु वा । तथा हि—'जायापत्योर्न विभागो विद्यते' इत्युक्त्वा किमिति न विद्यते इत्यपेक्षायां हेतुमुक्तवान्—'पाणिग्रहणाद्धि सहत्वं कर्मसु तथा पुण्यफलेषु च' इति । हि यस्मात्पाणिग्रहणादारभ्य कर्मसु सहत्वं श्रूयते—'जायापती अग्निमादधीयाताम्' इति । तस्मादाधाने सहाधिकारादाधानसिद्धाग्निसाध्येषु कर्मसु सहाधिकारः । तथा 'कर्म स्मार्तं विवाहाग्नौ' इत्यादिस्मरणाद्विवाहसिद्धाग्निसाध्येष्वपि कर्मसु सहाधिकार एव । अतश्चोभयविधाग्निनिरपेक्षेषु कर्मसु पूर्तेषु जायापत्योः पृथगेवाधिकारः संपद्यते । तथा पुण्यानां फलेषु स्वर्गादिषु जायापत्योः सहत्वं श्रूयते 'दिविज्योतिरजरमारभेताम्' इत्यादि । येषु पुण्यकर्मसु सहाधिकारस्तेषां फलेषु सहत्वमिति वोद्धव्यं, न पुनः पूर्तानां भर्त्रनुज्ञयानुष्ठितानां फलेष्वपि । ननु द्रव्यस्वामित्वेऽपि सहत्वमुक्तम्—'द्रव्यपरिग्रहेषु च न हि भर्तुर्विप्रवासे नैमित्तिके दाने स्तेयमुपदिशन्ति' इति । सत्यम् । द्रव्यस्वामित्वं पत्न्या दर्शितमनेन न पुनर्विभागाभावः । यस्माद् द्रव्यपरिग्रहेषु चेत्युक्त्वा तत्र कारणमुक्तम्—'भर्तुर्विप्रवासे नैमित्तिकेऽवश्यकर्तव्ये दानेऽतिथिभोजनभिक्षाप्रदानादौ हि यस्मान्न स्तेयमुपदिशन्ति मन्वादयस्तस्माद्भा(१)र्याया अपि द्रव्यस्वामित्वमस्ति अन्यथा स्तेयं स्यात्' इति । तस्माद्भर्तुरिच्छया भार्याया अपि द्रव्यविभागो भवत्येव न स्वेच्छया । यथा वक्ष्य(२)ति—'यदि कुर्यात्समानंशान्पत्न्यः कार्याः समांशिकाः' इति ॥ ५२ ॥

---

(१) भार्यायामपि ख. । (२) प्रकृताध्यायस्य ११९ तमे पद्ये. ।

(वी० मि०) सलग्नके विशेषं वक्तुमारभते--

दर्शने प्रत्यये दाने प्रातिभाव्यं विधीयते ॥
आद्यौ तु वितथे दाप्यावितरस्य सुता अपि ॥ ५३ ॥
दर्शनप्रतिभूर्यत्र मृतः प्रायणिकोऽपि वा ॥
न तत्पुत्रा ऋणं दद्युर्दद्युर्दानाय यः स्थितः ॥ ५४ ॥
बहवः स्युर्यदि स्वांशैर्दद्युः प्रतिभुवो धनम् ॥
एकच्छायाश्रितेष्वेषु धनिकस्य यथारुचि ॥ ५५ ॥
प्रतिभूर्दापितो(१) यत्र प्रकाशं धनिनां धनम् ।
द्विगुणं प्रतिदातव्यं (२)धनिकैस्तस्य तद्भवेत् ॥ ५६ ॥
ससन्तति स्त्रीपशव्यं(३) धान्यं त्रिगुणमेव च ॥
वस्त्रं चर्तुर्गुणं प्रोक्तं रसाश्चाष्टगुणाः स्मृ(४)ताः ॥ ५७ ॥

दान इति स्वयमेव दानेऽभियोज्यादुद्ग्राह्याऽर्पणे चेत्यर्थः ।

एतच्च स्पष्टयति बृहस्पतिः—

अथैको दर्शयामीति साधुरेषोऽपरोऽब्रवीत् ।
दाताहमेतद् द्रविणमर्पयाम्यपरो वदेत् ॥
आद्यौ तु वितथे दाप्यौ तत्कालावेदितं धनम् ।
उत्तरौ च विसंवादे तौ विना तत्सुतावपि ॥

य एनमभियोज्यं दर्शयिष्यामि तवेत्याह स एकः प्रतिभूरेवमन्येऽपि योज्यम् । दाताहमित्यत्राऽपर इत्यनुषञ्जनीयम् । आद्यौ त्विति तुशब्देन आद्ययोः प्रतिभुवोः सुता न दाप्या इति दर्शितम् । वितथे दर्शनसाधुत्वयोरुक्तयोर्विसंवादे सुता अपि दाप्या इति विभक्तिपरिणामेनान्वयः अपिकारेण दानप्रतिभूसमुच्चयः । पूर्वोक्तमेव विवृणोति दर्शनेति श्लोकेनेति मिताक्षराकारः । वस्तुतस्तु जीवति प्रतिभुवि व्यवस्था प्रथमश्लोकेऽभिहिता, इतरस्यं प्रोषितस्येत्यर्थात् । मृते प्रतिभुवि द्वितीयश्लोकेनेत्यपौनरुक्त्यमिति तत्त्वम् ।

---

(१) यत्तु प्रकाशं धनिनो धनम्—इति मुद्रितपुस्तके पाठः ।
(२) ऋणिकै रिति मुद्रित पुस्तके पाठः ।
(३) सन्ततिः स्त्रीपशुष्वेव—इति मुद्रितपुस्तके पाठः ।
(४) रसश्चाष्टगुणस्तथा—इति मुद्रितपुस्तके पाठः ।

ये दानाय प्रतिभुवः स्थितास्तत्पुत्रा दद्युरित्यन्वयः । बहव इति। बहवः प्रतिभुवो यदि भवन्ति तदा स्वस्वत्वव्यवस्थापितैरंशैरुपलक्षितं धनमृणरूपं अधमर्णेन दानाभावे दद्युः । यत्र तुलांशो विशिष्य व्यवस्थापितस्तत्र समं स्यादिति न्यायेन व्यवस्था । बहव इत्यनेकत्वोपलक्षके, तेन यत्र द्वौ प्रतिभुवौ तत्रापीयं व्यवस्थेति ध्येयम् । एषु प्रतिभूषु एकच्छायाश्रितेषु धनिकस्योत्तमर्णस्य यथारुचि इच्छानुसारेण दद्युः । एकच्छाया एकसादृश्यं ममेच्छया यस्य कस्यापि पार्श्वे मया गृह्यत इति लग्नकस्वीकृतधनिकव्यवस्थावशात् स पूर्णाभियोगविषयदातृत्वे । एवंरूपे च प्रतिभूवां पुत्रैरपि दानाभियोज्यैः स्वपितृदेयमेव देयं, परं तु वृद्धिरहितमित्युक्तं प्राक् । प्रतिभुवा दत्तस्याऽधमर्णेन परिशोधनमाह प्रतिभूर्दापित इति । यद्धनं प्रतिभूः प्रकाशं ससाक्षिकं राजादिभिर्धनिनां कृते दापितस्तदधमर्णैस्तस्य प्रतिभुवः कृते द्विगुणं दातव्यं भवतीत्यर्थः । इदं च द्विगुणादिवृद्धियोग्यकाले द्रष्टव्यम् । प्रतिभूकृतदानादिनानन्तरं त्रिपक्षानन्तरं वृध्युपक्रमः ।

प्रातिभाव्यं तु यो दद्यात् पीडितः प्रातिभावतः ।
त्रिपक्षात्परतः सोर्धं द्विगुणं लब्धुमर्हति ॥

इति बृहस्पतिवचनात् । तथाऽन्यदपि प्रातिभाव्यं सम्बन्धेन प्रतिभुवा व्ययितं द्रव्यमृणिना देयम् । यदाह कात्यायनः—

यस्यार्थे येन यद्दत्तं धनिना पीडितेन तु ।
साक्षिभिर्भावितेनैव प्रतिभूस्तत्समाप्नुयात् ॥

उक्तस्य द्विगुणस्वस्यापवादमाह ससन्ततीति । स्त्री च पशुश्च स्त्रीपशव्यं तत्प्रतिभुवा दत्तं ससन्तति अधमर्णेन दानकाले यावती सन्ततिर्जाता तावत्सहितमधमर्णेन प्रतिभुवे देयमित्यर्थः । सन्ततिपदं च युगधर्मकर्मादेरप्युपलक्षकम् । सन्ततिः स्त्रीपशुष्वेवेति मिताक्षरायां पाठः । तदर्थश्च स्त्रीपशुषु सन्ततिवृद्धिरूपा या उत्तमर्णाधमर्णाभ्यां प्राक् व्यवस्थापिता सा प्रतिभुवेऽधमर्णेन देयेत्यर्थः । धान्यमिति । यत्र या वृद्धिः परा तत्र तद्वृद्धिसंहितं प्रतिभुवे देयमिति समुदायार्थः । एवकारेणाऽधिकवृद्धेर्गणनासिद्धाया व्यवच्छेदः । चकाराभ्यां धान्यादावेव पञ्चगुणत्वादेः क्षौद्रादावत्रानभिहितगुणत्वादेश्च समुच्चयः ॥ ५३-५७ ॥

(मिता०) अधुना प्रातिभाव्यं निरूपयितुमाह—

दर्शने इति । प्रातिभाव्यं नाम विश्वासार्थं पुरुषान्तरेण सह समयः । तच्च विषयभेदाद्त्रिधा भिद्यते । यथा—दर्शने दर्शनापेक्षायां एनं दर्शयिष्यामीति । प्रत्यये विश्वासे मत्प्रत्ययेनास्य धनं प्रयच्छ नायं त्वां वञ्चयिष्यते, यतोऽमुकस्य पुत्रोऽयं उर्वराप्रायभूरस्य ग्राम(१)रो वास्तीति । दाने यद्ययं न ददाति तदानीमहमेव दास्यामीति । प्रातिभाव्यं विधीयत इति प्रत्येकं स(२)म्बध्यते । आद्यौ तु दर्शनप्रत्ययप्रतिभुवौ वितथे अन्यथाभावे अदर्शने विश्वासव्यभिचारे च दाप्यौ राज्ञा प्रस्तुतं धनमुत्तमर्णस्य । इतरस्य दानप्रतिभुवः सुता अपि दाप्याः । वित(३)थ इत्येव शाठ्येन निर्धनत्वेन वाऽधमर्णेऽप्रतिकुर्वति (४)इतरस्य सुता अपीति वदता (५)पूर्वयोः सुता न दाप्या इत्युक्तम् । सुता इति वदता न पौत्रा दाप्या इति दर्शितम् ॥ ५३ ॥

(मिता०) एतदेव स्पष्टीकर्तुमाह—

दर्शनेति । यदा तु दर्शनप्रतिभूः प्रात्ययिको वा प्रतिभू(६)र्दिवं गतस्तदा तयोः पुत्राः प्रातिभाव्यायातं पैतृकमृणं न दद्युः । यस्तु दानाय स्थितः प्रतिभू(७)र्दिवं गतस्तस्य पुत्रा दद्युर्न पौत्राः । ते च मूलमेव दद्युर्न वृद्धिम् । 'ऋणं पैतामहं पौत्रः प्रातिभाव्यागतं सुतः । समं दद्यात्तत्सुतौ तु न दाप्याविति निश्चयः' ॥ इति व्यासवचनात् । प्रातिभाव्यव्यतिरिक्तं पैतामहमृणं पौत्रः समं यावद् गृहीतं तावदेव दद्यान्न वृद्धिम् । तथा तत्सुतोऽपि प्रातिभाव्यागतं पित्र्यमृणं सममेव दद्यात् । तयोः पौत्रपुत्रयोः सुतौ पौत्र(८)प्रपौत्रौ च प्रातिभाव्यायातं अप्रातिभाव्यं च ऋणं यथाक्रममगृहीतधनौ न दाप्याविति । यदपि स्मरणम्—'खादको वित्तहीनः स्याल्लग्नको वित्तवान्यदि । मूलं तस्य भवेद्देयं न वृद्धिं दातुमर्हति' इति । तदपि लग्नकः प्रतिभूः । खादकोऽधमर्णः । लग्नको यदि वित्तवान्मृतस्तदा तस्य पुत्रेण मूलमेव दातव्यं न वृद्धिरिति व्याख्येयम् । यत्र दर्शनप्रतिभूः प्रत्ययप्रतिभूर्वा बन्धकं पर्याप्तं गृहीत्वा प्रतिभूर्जातस्तत्र तत्पुत्रा अपि तस्मादेव बन्धकात् प्रातिभाव्यायातमृणं दद्युरेव । यथाह कात्यायनः—'गृहीत्वा

---

(१) वरोऽस्तीति वाः घ. । (२) सम्बन्धः ख. ।
(३) वितथेऽन्यथाभावे. । (४) दानप्रातिभुवः ।
(५) दर्शनप्रत्ययप्रतिभुवो । (६–७) दिष्टं गतः घ. । (८) प्रपौत्रपौत्रौ च. घ. ।

धन्धकं यत्र दर्शनेऽस्य स्थितो भवेत् । विना पित्रा धनात्तस्माद्दाप्यः स्यात्तद्दणं सुतः' ॥ इति । दर्शनग्रहणं प्रत्ययस्योपलक्षणम् । विना पि· त्रा पितरि प्रेते दूरदेशं गते वेति ॥ ५४ ॥

(मिता०) यस्मिन्ननेकप्रतिभूसम्भवस्तत्र कथं दा(१)प्यस्तत्राह—

बहव इति । यद्येकस्मिन्प्रयोगे द्वौ बहवो वा प्रतिभुवः स्युस्तदर्णं संविभज्य स्वांशेन दद्युः । एकच्छायाश्रितेषु प्रतिभूषु एकस्याधम· र्णस्य छाया सादृश्यं तामाश्रिता एकच्छायाश्रिताः । अधमर्णो यथा कृत्स्नद्रव्यदानाय स्थितस्तथा दा(२)ने प्रतिभुवोऽपि प्रत्येकं कृत्स्न· द्रव्यदानाय स्थिताः । एवं दर्शने प्रत्यये च ते(३)ष्वेकच्छायाश्रितेषु प्रतिभूषु सत्सु धनिकस्योत्तमर्णस्य यथारुचि यथाकामम् । अतश्च धनिको वित्ताद्य(४)पेक्षायां स्वार्थं यं प्रा(५)र्थयते स एव कृत्स्नं दा· (६)प्यो नांशतः । एकच्छाया(७)श्रितेषु यदि कश्चिद्देशान्तरं गतस्त त्पुत्रश्च संनिहितस्तदा धनिकेच्छया सर्वं दाप्यः । मृते तु कस्मिंश्चि· त्तत्सुतः स्वपित्रंशमवृद्धिकं दाप्यः । यथाह कात्यायनः—'एकच्छाया· प्रविष्टानां दाप्यो यस्तत्र दृश्यते । प्रोषिते तत्सुतः सर्वं पित्रंशं तु (८)मृते समम्' ॥ इति ॥ ५५ ॥

(मिता०) प्रातिभाव्यर्णदानविधिमुक्त्वा प्रतिभूदत्तस्य प्रतिक्रिया· विधिमाह—

प्रतिभूरिति । यद्द्रव्यं प्रतिभूस्तत्पुत्रो वा धनिकेनोपपीडितः प्र· काशं सर्वजनसमक्षं राज्ञा धनिनो दापितो न पुनर्द्वैगुण्यलोभेन स्व· यमुपेत्य दत्तम् । यथाह नारदः—'यं चार्थं प्रतिभूर्दद्याद्धनिकेनोपपी· डितः । ऋ(९)णिकस्तं प्रतिभुवे द्विगुणं प्रतिपा(१०)दयेत्'॥ इति । ऋ· णिकैरधमर्णैस्तस्य प्रतिभुवस्तद्द्रव्यं द्विगुणं प्रतिदातव्यं स्यात् । तच्च कालविशेषमनपेक्ष्य सद्य एव द्विगुणं दातव्यम् । वचनारम्भसाम· र्थ्यात् । एतच्च हिरण्यविषयम् । ननु इ(११)दं प्रतिभूरिति वचनं द्वैगु· ण्यमात्रं प्रतिपा(१२)दयति । तच्च पूर्वोक्तकालकल्पक्रमाद्यपेक्षया प्युपप· द्यते । यथा जातेष्टिविधानं शुचित्वाद्यपेक्षम् । अपि च सद्यः सवृद्धिक·

---

(१) दातव्यमित्याह घ. । (२) दाने प्रतिभुवः घ. । (३) तथैकच्छाया घ. । (४) चित्ताद्यपेक्षया घ. । (५) य. प्रार्थयते ख. । (६) दद्यादंशतः ख. । (७) नेष्वेकच्छाया ख. । (८) मृते सति घ. । (९) ऋणिकं तं ग. । (१०) प्रतिदापयेत् ग. । (११) इदं वचनं ग. घ. । (१२) न तु कालकल्पक्रमादिकम् ङ. ।

दानपक्षे पशुस्त्रीणां सद्यः सन्तत्यभावान्मूल्यदानमेव प्राप्नोतीति । तदसत्—'व(१)स्त्रधान्यहिरण्यानां चतुस्त्रिद्विगुणा परा' इत्यनेनैव कालकल्पक्रमेण द्वैगुण्यादिसिद्धेः । द्वैगुण्यमात्रविधाने चेदं वचनमनर्थकं स्यात् । पशुस्त्रीणां तु कालक्रमपक्षेऽपि सन्तत्यभावे स्वरूपदानमेव । यदा प्रतिभूरपि द्रव्यदानानन्तरं कियतापि कालेनाधमर्णेन्न संघटते तदा (२)सन्ततिरपि संभवत्येव। यद्वा पूर्वसिद्धसन्तत्या सह पशुस्त्रियो दास्यन्तीति न किंचिदेतत् । अथ प्रातिभाव्यं प्रीति(३)कृतम् । अतश्च प्रतिभुवा दत्तं प्रीतिदत्तमेव। न च प्रीतिदत्तस्य याचनात्प्राग्वृद्धिरस्ति । यथाह-'प्रीतिदत्तं तु यत्किंचिद्वर्धते न त्वयाचितम् । याच्यमानमदत्तं चेद्वर्धते पञ्चकं शतम्' ॥ इति । अतश्चाप्रीतिदत्तस्यायाचितस्यापि दानदिवसादारभ्य यावद्द्विगुणं कालक्रमेण वृद्धिरित्यनेन वचनेनोच्यत इति । तदप्यसत् । अस्यार्थस्यास्माद्वचनादप्रतीतेर्द्विगुणं प्रतिदातव्यमित्येतावदिह प्रतीयते । तस्मात्कालक्रममनपेक्ष्यैव द्विगुणं प्रतिदातव्यं वचनारम्भसामर्थ्यादिति सुष्ठूक्तम् ॥ ५६ ॥

(मिता०) प्रतिभूदत्तस्य सर्वत्र द्वैगुण्ये प्राप्तेऽपवादमाह--

सन्ततिरिति । हिरण्यद्वैगुण्यवत्कालानादरेणैव स्त्रीपश्वादयः प्रतिपादितवृद्ध्या दाप्याः । श्लोकस्तु व्याख्यात एव । यस्य द्रव्यस्य यावती वृद्धिः पराकाष्ठोक्ता, तद्द्रव्यं प्रतिभूदत्तं (४)खादकेन तया वृद्ध्या सह कालविशेषमनपेक्ष्यैव सद्यो दातव्यमिति तात्पर्यार्थः । यदा तु दर्शनप्रतिभूः संप्रतिपन्ने काले अधमर्णं दर्शयितुमसमर्थस्तदा त(५)द्गवेषणाय तस्य पक्षत्रयं दातव्यम् । तत्र यदि तं दर्शयति तदा भो(६)क्तव्योऽन्यथा प्रस्तुतं धनं दाप्यः । 'नष्टस्यान्वेषणार्थं तु दाप्यं पक्षत्रयं परम् । यद्यसौ दर्शयेत्तत्र मोक्तव्यः प्रतिभूर्भवेत् ॥ काले व्यतीते प्रतिभूर्यदि तं नैव दर्शयेत् । निबन्धं दा(७)पयेत्तं तु प्रेते चैष विधिः स्मृतः' ॥ इति कात्यायनवचनात् । ल(८)ग्नके विशेषनिषेधश्च तेनैवोक्तः-'न स्वामी न च वै शत्रुः स्वामिनाधिकृतस्तथा । निरुद्धो दण्डितश्चैव संदिग्धश्चैव न क्वचित् ॥ नैव रिक्थी न मित्रं च न चै·

---

(१) वस्त्रदान ख । (२) संततिरेव ख. । (३) प्रीतिकृतं च ख. ।
(४) खादकेनाधमर्णेन. । (५) तदन्वेषणाय ग. । (६) भोक्तव्यो नान्यथा ग. ।
(७) दापयेत्तत्तु प्रेते चैव ख. । (८) लग्नकः प्रतिभूः. ।

वात्यन्तवासिनः । राजकार्यनियु(१)क्ताश्च ये च प्रव्रजिता नराः ॥ न शक्तो धनिने दातुं दण्डं राज्ञे च तत्समम् । जीवन्वापि पिता यस्य तथैवेच्छाप्रवर्तकः ॥ नाविज्ञातो ग्रहीतव्यः प्रतिभूः स्वक्रियां प्रति' ॥ इति । सन्दिग्धोऽभिशस्तः । अत्यन्तवासिनो नैष्ठिकब्रह्मचारिणः ॥ इति प्रतिभूविधिः ॥ ५७ ॥

(वी० मि०) मासि मासि सम्बन्धके विशेषमाह प्रकरणसमाप्तिपर्यन्तेन—

आधिः प्रणश्येद्द्विगुणे धने यदि न मोक्ष्यते ॥
काले कालकृतो नश्येत्फलभोग्यो न नश्यति ॥ ५८ ॥

तत्राधिश्चतुर्विधः—स्वरूपप्रकारकालप्रमाणरूपोपाधिभेदात् । तथा(२) च बृहस्पतिः—

आधिर्बन्धः समाख्यातः स च प्रोक्तश्चतुर्विधः ।
जङ्गमः स्थावरश्चैव गोप्यो भोग्यस्तथैव च ॥
यादृच्छिकः सावधिश्च लेख्यारूढोऽथ साक्षि(३)मान् ।

जङ्गमस्थावरत्वादिचतुष्टयेन यथाक्रमं स्वरूपादिचतुष्टयनिरूपकेन चतुरङ्गं लेख्यारूढ इति साक्ष्यतिरिक्तप्रमाणवान् इत्यर्थः । वचनान्तराणि त्वेतदविरोधेनैव नेयानीति संक्षेपः । द्विगुणे धने जाते यदि गोप्याधिरधमर्णेन न मोक्ष्यते तदाऽधमर्णस्य नश्यति । कालकृतः कृतकालः, यदि अमुककाले मया नाधिर्मोक्ष्यते तदा तवैव स्वं भवतीति व्यवस्थापितकाले इति यावत् । एतादृशो भोग्यो गोप्यो वा आधिः काले तादृशव्यवस्थाविषयकालेऽधमर्णेन ऋणाप्रतिदाने नश्येदधमर्णस्य स्वत्वानाश्रयो भवतीत्यर्थ इति मिताक्षरादयः । रत्नाकरकृतस्तु कांस्यादावपरिभाष्याधिकृते आधातुरनुमतिं विना धनिकस्वत्वोचितव्यवहारस्य विशेषामदर्शनादन्यथैतद्वचनं व्याख्येयमित्याहुः । सा च व्याख्या यत्राऽधमर्ण एव परिभाषते द्विगुणे धने यदि न मया मोक्ष्यते आधिस्तदा तवैवायमिति तदा द्विगुणे धने जातेऽमोक्षणेऽधमर्णस्य प्रणश्येत् । अत्र हेतुः कालकृतः स्वत्वध्वंस उत्तमर्णसत्त्वेव व्यवस्थास्थापितः कालो यत्र स आधिर्व्यवस्थापितकाले न नश्येत् । फलभोग्य-

---

(१) प्रयुक्तास्तु घ. ।
(२) तदा—इति ख० पुस्तके पाठ । (३) साक्षिवान्—इति क०पुस्तके पाठ ।

स्तु भोग्याधिरकृतकालः समासहस्रेणापि न नश्यतीति द्विगुणे सति मया मोचनीय इत्येतावन्मात्रमपि सुदृढं व्यवस्थाप्य स्वामिना आहितः आधिः अर्थाद्धोप्यः स द्विगुणे मूलधने सति यदि नोन्मुच्यते तदा नश्यति । द्विगुण इति परमवृद्धिपरम् । भोग्याधिस्तु एवं परिभाषितोऽपि पतितव्यूहादिद्वारा द्विगुणे धने सत्यमोचितोपि न नश्यति । कालकृतः कृतकालः अस्मिन् काले यदि न मोच्यते तदा तवैवेति स्वीकृत्यादितः तस्मिन् अमोचितः सर्वोऽप्याधिर्नश्यति । एवं च द्विगुणे धन इति यथाश्रुतमेव ग्राह्यम् । शिष्टव्यवहारादिविरोधे तु कालविशेषोपलक्षणपरामिति व्याख्या तु साधीयसीति प्रतिभाति । प्रणश्येदित्यत्र विशेषमाह बृहस्पतिः—

पूर्णावधौ शान्तलाभे बन्धे स्वामी धने भवेत् ।
अनिर्गते दशाहे तु ऋणी प्रोज्झितुमर्हति ॥

व्यासश्च—

बन्धकस्य धनी स्वामी द्विसप्ताहं प्रतीक्ष्य च ।

इति । अत्र सुस्थिता(१)सुस्थितावधमर्णावादाय व्यवस्था ॥५८॥

(मिता०) धनप्रयोगे विश्वासहेतू द्वौ प्रतिभूराधिश्च । यथाह नारदः—'विश्र(२)म्भहेतू द्वावत्र प्रतिभूराधिरेव च' इति । तत्र प्रतिभूर्निरूपितः । इदानीमाधिर्निरूप्यते । आधिर्नाम गृहीतस्य द्रव्यस्योपरि विश्वासार्थमधमर्णेनोत्तमर्णोऽधिक्रियते आधीयत इत्याधिः । स च द्विविधः कृतकालोऽकृतकालश्च । पुनश्चैकैकशो द्विविधः—गोप्यो भोग्यश्च । यथाह नारदः—'अधिक्रियत इत्याधिः स विज्ञेयो द्विलक्षणः । कृतकालेऽपनेयश्च यावद्देयोद्यतस्तथा ॥ स पुनर्द्विविधः प्रोक्तो गोप्यो भोग्यस्तथैव च' ॥ इति । कृतकाल आधानकाल एवामुष्मिन्काले दीपोत्सवादौ मयायमाधिर्मोक्तव्योऽन्यथा तवैवाधिर्भविष्यतीत्येवं (३)निश्चिते काले उपनेय आत्मसमीपे नेतव्यः । मोचनीय इत्यर्थः । देयं दानम् । देयमनतिक्रम्य यावद्देयम् । उद्यतः नियतः, स्थापित इत्यर्थः । यावद्देयमुद्यतो यावद्देयोद्यतः गृहीतधनप्रत्यर्पणावधिरनिरूपितकाल इत्यर्थः । गोप्यो रक्षणीयः ॥ एवं चतुर्विधस्याधे-

(१) अत्र सुस्थितावध०—इति ख० पु० पाठः ।
(२) विश्रम्भो विश्वास० । (३) निरूपिते ख. ग. ।

विशेषमाह—

आधिरिति। प्रयुक्ते धने स्वकृतया वृद्ध्या कालक्रमेण द्विगुणीभूते यद्याधिरधमर्णेन द्रव्यदानेन न मोक्ष्यते तदा नश्यति। अधमर्णस्य धने प्रयोक्तुः स्वं भवति। कालकृतः कृतकालः, आहिताग्न्यादिषु पाठात्कालशब्दस्य पूर्वनिपातः। स तु काले निरूपिते प्राप्ते नश्येत् द्वैगुण्यात्प्रागूर्ध्वं वा। फलभोग्यः फलं भोग्यं यस्यासौ फलभोग्यः क्षेत्रारामादिः स कदाचिदपि न नश्यति। कृतकालस्य गोप्यस्य भोग्यस्य च तत्कालातिक्रमे नाश उक्तः—'काले कालकृतो नश्ये'दिति। अकृतकालस्य भोगस्य नाशाभाव उक्तः—'फलभोग्यो न नश्यती'ति। पारिशेष्यादाधिः प्रणश्येदित्येतदकृतकालगोप्याधिविषयमवतिष्ठते। द्वैगुण्यातिक्रमेण निरूपितकालातिक्रमेण च विनाशे चतुर्दशदिवसप्रतीक्षणं कर्तव्यं बृहस्पतिवचनात्—'हिरण्ये द्विगुणीभूते पूर्णे काले (१)कृतावधेः। बन्धकस्य धनी स्वामी द्विसप्ताहं प्रतीक्ष्य च॥ तदन्तरा धनं दत्त्वा ऋणी बन्धमवाप्नुयात्'॥ इति॥ नन्वाधिः प्रणश्येदित्यनुपपन्नम्, अधमर्णस्य स्वत्वनिवृत्तिहेतोर्दानविक्रयादेरभावात्। धनिनश्च स्वत्वहेतोः प्रतिग्रहक्रयादेरभावात्। मनुवचनविरोधाच्च (८।१४३)—'न चाधेः कालसंरोधान्निसर्गोऽस्ति न विक्रयः' इति। कालेन संरोधः कालसंरोधाच्चिरकालमवस्थानं तस्मात्कालसंरोधाच्चिरकालावस्थानादाधेर्न निसर्गोऽस्ति नान्यत्राधीकरणमस्ति न च विक्रयः। एवमाधीकरणविक्रयप्रतिषेधाद्धनिनः स्वत्वाभावोऽवगम्यत इति। उच्यते—आधीकरणमेव लोके सोपाधिकस्वत्वनिवृत्तिहेतुः। आधिस्वीकारश्च सोपाधिकस्वत्वापत्तिहेतुः प्रसिद्धः। तत्र धनद्वैगुण्ये निरूपितका(२)लप्राप्तौ च द्रव्यदानस्यात्यन्तनिवृत्तेरनेन वचनेनाधमर्णस्यात्यन्तिकी स्वत्वनिवृत्तिः उत्तमर्णस्य चात्यन्तिकं स्वत्वं भवति। न च मनुवचनविरोधः। यतः (मनुः८ १४३)—'न त्वेवाधौ सोपकारे कौसीदीं वृद्धिमाप्नुयात्' इति। भोग्याधिं प्रस्तुत्येदमुच्यते—'न चाधेः कालसंरोधान्निसर्गोऽस्ति न विक्रयः' इति। भोग्यस्याधेश्चि(३)रकालावस्थानेऽप्याधीकरणविक्रयनिषेधेन धनिनः (४)स्वत्वं नास्तीति। इहाप्युक्तं 'फलभोग्यो न नश्यती'ति।

---

(१) कृतावधौ ध.। (२) काले प्राप्ते च ख.। (३) श्चिरन्तनकाला घ.।
(४) स्वत्वं न भवति ख.।

गोप्याधौ तु पृथगारब्धं मनुना (८।१४४)--'न भोक्तव्यो बलादाधिः भुञ्जानो वृद्धिमुत्सृजेत्' इति । इहापि वक्ष्यते--'गोप्याधिभोगे नो वृद्धि'रिति । 'आधिः प्रणश्येद्विगुणे' इति गोप्याधिं प्रत्युच्यते इति सर्वमविरुद्धम् ॥ ५८ ॥

गोप्याधिभोगे नो वृद्धिः सोपकारेऽथ हापिते ॥
नष्टो देयो विनष्टश्च दैवराजकृतादृते ॥ ५९ ॥

(वी० मि०) गोप्याधेस्ताम्ररजतादेरुपभोगेऽल्पेपि वृद्धिमर्हत्यपि नो भवति समयातिक्रमात् । तथा सोपकारे भोग्यरूपोपकारकारिणि गवादौ तथा हापिते सम्यक् व्यवहाराक्षमत्वं नीते आधौ न वृद्धिः । नष्टो भङ्गादिना सर्वथा व्यवहारक्षमतां गतः, विनष्टो नाशं प्राप्तः, चकाराच्चोरहृतः धनिकेनाऽऽधिर्देयः अधमर्णाय । दैवराजकृताद्दोषादृत इति हापितादौ सर्वत्राऽन्वेति । धनिकदोषेणेति तदर्थः । अथशब्देन हापितात्पूर्वोक्तेन उभयस्मिन् । दैवराजकृतादृत इत्यस्याऽन्वयव्यवच्छेदः । यदि तु न ददाति तदा मूलनाशः स्यात् ।

विनष्टे मूलनाशः स्याद्दैवराजकृतादृते ।

इति नारदवचनात् । यत्र तु ऋणापेक्षया बहुमूल्यं रत्नाद्याधीकृतं नष्टं विनष्टं वा तत्र स्वद्रव्याधिकं यदाधीकृतमूल्यं तदधमर्णाय सर्वं दद्यात् ।

भुक्ते चासारतां प्राप्ते फलहानिः प्रजायते ।
बहुमूल्यं यत्र नष्टमृणिकं तत्र तोषयेत् ॥

इति बृहस्पतिवचनात् ।

गृहीतदोषान्नष्टश्चेद्बन्धो हेमादिको भवेत् ।
ऋणं सलाभं संशोध्यं तन्मूल्यं दाप्यते धनी ॥

इति व्यासवचनाच्च ।

यः स्वामिनाननुज्ञातमाधिं भुङ्क्ते विचक्षणः ।
तेनार्द्धवृद्धिर्भोक्तव्या तस्य भोगस्य निष्कृतिः ॥

इति मनुवचनं तु अभोग्याधेर्दासादेरपेक्षिते भोगे योजनीयम् । तादृशे तु सर्ववृद्धिहानिर्ग्रन्थकृतोक्तेति न विरोधः ॥ ५९ ॥

(मिता०) किञ्च—

गोप्येति । गोप्याधेस्ताम्रकटाहादेरुपभोगे न वृद्धिर्भवति । अ-

लपेऽप्युपभोगे महत्यपि वृद्धिर्हातव्या समयातिक्रमात् । तथा सोपकारे उपकारकारिणि बलीवर्दताम्रकटाहादौ भोग्याधौ सवृद्धिके हापिते हानिं व्यवहाराक्षमत्वं गमिते नो वृद्धिरिति सम्बन्धः । नष्टो विकृतिं गतः ताम्रकटाहादिश्छिद्रभेदनादिना पूर्ववत्कृत्वा देयः । तत्र गोप्याधिर्नष्टश्चेत्पूर्ववत्कृत्वा देयः । उपभुक्तोऽपि चेद्वृद्धिरपि हातव्या। भोग्याधिर्यदि न(१)ष्टस्तदा पूर्ववत्कृत्वा देयः । वृद्धिसद्भावे (२)वृद्धिरपि हातव्या । विनष्ट आत्यन्तिकं नाशं प्राप्तः सोऽपि देयो मूल्यादिद्वारेण । तद्दाने सवृद्धिकं मूल्यं लभते । यदा न ददाति तदा मूलनाशः-'विनष्टे मूलनाशः स्याद्दैवराजकृतादृते' इति नारदवचनात्। दैवराजकृतादृते । दैवमग्न्युदकदेशोपप्लवादि । दैवकृताद्विनाशाद्विना। तथा स्वापराधरहिताद्राजकृतात् । दैवराजकृते तु विनाशे सवृद्धिके मूल्यं दातव्यमधमर्णेनाध्यन्तरं वा । यथाह-'स्रोतसापहृते क्षेत्रे राज्ञा चैवापहारिते । आधिरन्योऽथ कर्तव्यो देयं वा धनिने धनम्' ॥ इति । तत्र स्रोतसापहृत इति दैवकृतोपलक्षणम् ॥ ५९ ॥

आधेः स्वीकरणात् सिद्धौ रक्ष्यमाणोऽप्यसारताम् ॥
यातश्चेदन्य आधेयो धनभाग्वा धनी भवेत् ॥ ६० ॥

(वी० मि०) आधेः स्वीकरणात् गोप्यस्य स्वाधीनीकरणात् भोग्यस्य च भोगात् सिद्धिः, न तु साध्यलेख्यादिमात्रेण ।

आधिस्तु द्विविधः प्रोक्तो जङ्गमः स्थावरस्तथा ।
सिद्धिरस्योभयस्यापि भोगो यद्यस्ति नान्यथा ॥

इति नारदवचनात्। एतेन-'आधौ प्रतिग्रहक्रीते पूर्वैव बलवत्तरा' इति वचने स्वीकारान्ता क्रिया बलवती। पूर्वा स्वीकाररहिता तु पूर्वापि न बलवतीत्यर्थः पर्यवस्यति। स चाधी रक्ष्यमाणोऽपि यद्यसारतां (३)कालेन दिवसेन यातस्तदान्य आधिरधमर्णेनाधेयो धनमृणरूपं वा धनिने दद्यादित्यर्थः। अपिर्विरोधार्थः । गवादौ दैवाद्वन्धकावस्थायां नष्टे मूलहानिरित्यत्रापि जात्याचार एव मानम् ॥ ६० ॥

---

(१) नष्टश्चेत्तदा घ. । (२) वृद्धिर्हातव्या ख. ।
(३) कालं—इति क० पु० पाठः ।

(मिता०) अपि च—

आधेरिति । आधेर्भोग्यस्य गोप्यस्य च स्वीकरणादुपभोगादाधिग्रहणसिद्धिर्भवति न साक्षिलेख्यमात्रेण । यथाह नारदः—'आधिस्तु द्विविधः प्रोक्तो जङ्गमः स्थावरस्तथा । सिद्धिरस्योभयस्यापि भोगो यद्यस्ति नान्यथा' ॥ इति । अस्य च फलम्—'आधौ प्रतिग्रहे क्रीते पूर्वा तु बलवत्तरा' इति । या स्वी(१)कारान्ता क्रिया सा पूर्वा बलवती । स्वीकाररहिता तु पूर्वापि न बलवतीति । स चाधिः प्रयत्नेन रक्ष्यमाणोऽपि कालवशेन यद्यसारतामविकृत एव सवृद्धिकमूल्यद्रव्यापर्याप्ततां गतस्तदाधिरन्यः कर्तव्यो धनिने धनं वा देयम् । रक्ष्यमाणोऽप्यसारतामिति वदता आधिः प्रयत्नेन रक्षणीयो धनिनेति ज्ञापितम् ॥ ६० ॥

चरित्रबन्धककृतं सवृद्ध्या दापयेद्धनम् ॥
सत्यङ्कार(२)कृतं द्रव्यं द्विगुणं प्रतिदापयेत् ॥ ६१ ॥

(वी० मि०) चरित्रेण शोभनाचरितेन बन्धककृतं उत्तमर्णेनात्मसात्कृतं यद्बहुमूल्यं ऋणाद्प्यल्पमूल्यं वा तत्र स राजादिर्वृद्ध्या सहितं धनं अधमर्णं दापयेत् । द्विगुणे धने आधिः प्रणश्यति । यद्वा चरित्रं पुण्यं यत्र बन्धकं कृतं तत्राऽधमर्णीयत्वं न पुण्यस्य नश्यति, किन्तु वृद्धिसहितं धनं दापयेदित्यर्थः । सत्यङ्कारो द्विगुणेऽपि द्रव्ये न तवाधिर्भविष्यति किन्तु द्विगुणं द्रव्यमेव मया दातव्यमिति व्यवस्थाविशेषकृतमाधीकृतं द्रव्यं द्विगुणं प्रतिदापयेदन्यथा त्वाधिर्नश्यतीत्यर्थः । साम्प्रदायिकास्तु दातव्यक्रयव्यवस्थानिर्वाहाय यदङ्गुलीयकादि विक्रेतृहस्ते कृतं द्रव्यं तद्व्यवस्थातिक्रमे विक्रेत्रा कृते तेन द्विगुणं क्रेत्रे देयम् । यदि तु क्रेत्रैव व्यवस्थातिक्रमः कृतस्तदा स एव विक्रेत्रे तद्द्रव्यं द्विगुणीकृत्य दद्यादिति प्रसङ्गादुक्तं ग्रन्थकृतेति व्याचक्षते ॥ ६१ ॥

(मिता०) 'आधिः प्रणश्येद्विगुणे' इत्यस्यापवादमाह—

चरित्रेति । चरित्रं शोभनचरितं चरित्रेण बन्धकं चरित्रबन्धकं तेन यद्द्रव्यमात्मसात्कृतं पराधीनं वा कृतम् । एतदुक्तं भवति—धनिनः स्वच्छाशयत्वेन बहुमूल्यमपि द्रव्यमाधीकृत्याऽधमर्णेनाल्पमेव द्रव्यमात्मसात्कृतम् । यदि वाधमर्णस्य स्वच्छाशयत्वेनाल्पमूल्यमार्धि

---

(१) स्वीकारान्तक्रिया पूर्वा ख ।

(२) सत्याकारकरं—इति क. पुस्तके, सत्यङ्कारकरं— इति ख. पुस्तके पाठयोर्भेदः ।

गृहीत्वा वहुद्रव्यमेव धनिनाऽधमर्णाधीनं कृतमिति । तद्धनं स नृपो वृद्ध्या सह दापयेत् । अयमाशयः-एवं(१)रूपं वन्धकं द्विगुणीभूतेऽपि द्रव्ये न नश्यति किन्तु द्रव्यमेव द्विगुणं दातव्यमिति । तथा सत्यङ्कारकृतम् । करणं कारः । भावे घञ् । सत्यस्य कारः सत्यङ्कारः-'कारे सत्यागदस्य' इति मुम् । सत्यङ्कारेण कृतं सत्यङ्कारकृतम् । अयमभिसन्धिः-यदा वन्धकार्पणसमय एवेत्थं परिभाषितं द्विगुणीभूतेऽपि द्रव्ये मया द्वि(२)गुणं द्रव्यमेव दातव्यं नाधिनाश इति तदा तद्विगुणं दापयेदिति । अन्योऽर्थः चरित्रमेव वन्धकं चरित्रवन्धकं, चरित्रशब्देन गङ्गास्नानाग्निहोत्रादिजनितमपूर्वमुच्यते । यत्र तदेवाधीकृत्य यद्द्रव्यमात्मसात्कृ(३)तं तत्र तदेव द्विगुणीभूतं दातव्यं नाधिनाश इति । आधिप्रसङ्गादन्यदुच्यते सत्यङ्कारकृतमिति । क्रयविक्रयादिव्यवस्थानिर्वाहाय यदङ्गुलीयकादि परहस्ते कृतं तद्व्यवस्थातिक्रमे द्विगुणं दातव्यम् । तत्रापि येनाङ्गुलीयकाद्यर्पितं स एव चेद्व्यवस्थातिवर्ती तेन तदेव दातव्यम्, (४)इतरश्चेद्व्यवस्थातिवर्ती तदा तदेवाङ्गुलीयकादि द्विगुणं प्रतिदापयेदिति ॥ ६१ ॥

उपस्थितस्य मोक्तव्य आधिः स्तेनोऽन्यथा भवेत् ॥
प्रयोजकेऽसति धनं कुलेऽन्यस्याधिमाप्नुयात् ॥ ६२ ॥
तत्कालकृतमूल्यो वा तत्र तिष्ठेदवृद्धिकः ॥
विना धारणकाद्वापि विक्रीणीत ससाक्षिकम् ॥ ६३ ॥

(वी० मि०) धनदानेनाधिमोचनार्थमुपस्थितस्याधिर्धनिना मोक्तव्योऽधमर्णाय दातव्योऽन्यथा वृद्धिलोभादिनाऽमोचने स उत्तमर्णः स्तेनः चौरवद्दण्ड्यो भवेत् । एतच्चाऽविमोचनविरोधि व्यवस्थाप्यं वलवत्त्वादिति ध्येयम् । राजदैवकृताद्दत इति सर्वत्राऽन्वययोग्येऽन्वेति । प्रयोजके धनप्रयोक्तरि असति मृते प्रोषिते प्रव्रजिते वा कुले प्रयोक्तृदायभागिनि क्रमेण पुत्रादौ धनं सवृद्धिकं न्यस्य निधाय स्वीयमाधिमाप्नुयादिति । यदि तु कोऽप्युत्तमर्णस्य प्रोषितस्य धनग्राहको नास्ति तदा तत्काले कृतमूल्यः आधिः तत्र प्रयोक्तृगृहे वृद्धिरहितस्तिष्ठेत् धनिकदोषेण धनग्रहणाभावे तदूर्ध्वं वृद्धिर्न भव-

---

(१) प्रतिपादयेत् घ. । (२) एवंविधं घ. । (३) द्विगुणं भूतमेव द्रव्यं घ. ।
(४) कृतं तदा तत्र ख. । (५) इतरं चेत् ख. ।

तीत्यर्थः । धारणकोऽधमर्णेनाधिमोचनोचितसमये सन्निहितस्तिष्ठति तदा उत्तमर्णः ससाक्षिकं तमाधिं विक्रीणीत, तत्र स्वकीयं धनं गृहीत्वाऽवशिष्टं राज्ञे दद्यादिति विवेकः । अपिकारेणाऽधमर्णदायादसङ्ग्रहः ॥ ६२-६३ ॥

(मिता०) किञ्च—

उपस्थितस्येति । धनदानेनाधिमोक्षणायोपस्थितस्याधिर्मोक्तव्यो धनिना न वृद्धिलोभेन स्थापयितव्यः । अन्यथा अमोक्षणे स्तेनश्चौरवद्(१)ण्ड्यः स्यात् । असंनिहिते पुनः प्रयोक्तरि कुले तदाप्तहस्ते सवृद्धिकं धनं विधायाधमर्णकः स्वीयं बन्धकं गृह्णीयात् ॥ ६२ ॥

(मिता०) अथ प्रयोक्ताप्यसंनिहितस्तदाप्ताश्च धनस्य ग्रहीतारो न सन्ति यदि वा असंनिहिते प्रयोक्तर्याधिविक्रयेण धनदित्साधमर्णस्य तत्र किं कर्तव्यमित्यपेक्षित आह—

तत्कालेति । तस्मिन्काले यत्तस्याधेर्मूल्यं तत्परि(२)कल्प्य तत्रैव धनिनि तमाधिं वृद्धिरहितं स्थापयेन्न तत ऊ(३)र्ध्वं विवर्धते । यावद्धनी धनं गृहीत्वा तमाधिं मुञ्चति, यावद्वा तन्मूल्यद्रव्यंसृ(४)णे प्रवेशयति ॥

(मिता०) यदा तु द्विगुणीभूतेऽपि धने द्विगुणं धनमेव ग्रहीतव्यं न त्वाधिनाश इति विचारितमृणग्रहणकाल एव तदा द्विगुणीभूते द्रव्ये असंनिहिते वाऽधमर्णे धनिना किं कर्तव्यमित्यत आह—

विनेति । धारणकादधमर्णाद्धिना अधमर्णेऽसंनिहिते साक्षिभिस्तदाप्तैश्च सह तमाधिं विक्रीय तद्धनं गृह्णीयाद्धनी । वाशब्दो व्यवस्थितविकल्पार्थः । यदर्णग्रहणकाले द्विगुणीभूतेऽपि धने धनमेव ग्रहीतव्यं न त्वाधिनाश इति न विचारितं तदा 'आधिः प्रणश्येद्विगुणे' इत्याधिनाशः । विचारिते त्वयं पक्ष इति ॥ ६३ ॥

(वी० मि०) भोग्याधौ विशेषमाह—

यदा तु द्विगुणीभूतमृणमाधौ तदा खलु ॥
मोक्ष्य आधिस्तदुत्पन्ने प्रविष्टे द्विगुणे धने ॥ ६४ ॥

ऋणमाधौ भोगद्वारा द्विगुणीभूतं यदि तदा तस्मिन् द्विगुणधने

---

(१) दण्ड्यो भवति ख । (२) कल्प्यते तत्रैव ख. ।
(३) ऊर्ध्वं धनं वर्धते ग. । (४) मृणिने ख. ।

स्वसङ्क्रान्ते सत्युत्तमर्णेनाऽऽधिर्मोक्तव्य इत्यर्थः । अयमेव क्षयाधिरित्युच्यते । इदं च धनिकस्य तथाऽभ्युपगमपरम् । 'अन्त्यवृद्धौ प्रविष्टायामपि न स्थावरमृते वचना'दिति विष्णुवाक्यैकमूलकत्वादिति मिश्राः । अधर्मभीरुणा तदा स आधिर्मोच्यः ।

भोगाय द्विगुणादूर्ध्वं चक्रवृद्धिश्च गृह्यते ।
मूलं च सोदयं पश्चाद्धार्धुषं तत्तु गर्हितम् ॥

इति बृहस्पतिवचनात्, न तु विशेषव्यवस्थामन्तरेण न वर्द्धतेऽपीत्यप्याहुः ॥ ६४ ॥

इति श्रीमत्० याज्ञवल्क्यव्याख्याने ऋणादानप्रकरणम् ।

(मिता०) भोग्याधौ विशेषमाह—

यदेति । यदा प्रयुक्तं धनं स्वकृतया वृद्ध्या द्विगुणीभूतं तदाधौ कृते तदुत्पन्ने आध्युत्पन्ने द्रव्ये द्विगुणे धनिनः प्रविष्टे धनिनाधिर्मोक्तव्यः । यदि वादावेवाधौ दत्ते द्विगुणीभूते द्रव्ये त्वयाधिर्मोक्तव्य इति परिभाषया, कारणान्तरेण वा भोगाभावेन यदा द्विगुणीभूतमृणं तदा, आधौ भोगार्थं धनिनि प्रविष्टे तदुत्पन्ने द्रव्ये द्विगुणे सत्याधिर्मोक्तव्यः । अधिकोपभोगे तदपि देयम् । सर्वथा सवृद्धिकमू(१)लर्णापाकरणार्थाध्युपभोगविषयमिदं वचनम् । तमेनं क्षयाधिमाचक्षते लौकिकाः । यत्र तु वृद्ध्यर्थ एवाध्युपभोग इति परिभाषा तत्र द्वैगुण्यातिक्रमेऽपि यावन्मू(२)लदानं तावदुपभुङ्क्ते एवाधिम् । एतदेव स्पष्टीकृतं बृहस्पतिना—'ऋणी बन्धमवाप्नुयात् । फलभोग्यं पूर्णकालं दत्त्वा द्रव्यं तु सामकम् ॥ यदि प्रकर्षितं तत्स्यात्तदा न धनभाग्धनी । ऋणी च न लभेद्बन्धं परस्परगतं विना' ॥ इति । अस्यार्थः—फलं भोग्यं यस्यासौ फलभोग्यः (३) बन्ध आधिः । स च द्विविधः सवृद्धिकमूला(४)पाकरणार्थो वृद्धिमात्रापाकरणार्थश्च । तत्र च सवृद्धिमूलापाकरणार्थं बन्धं पूर्णकालं पूर्णः कालो यस्यासौ पूर्णकालस्तमाप्नुयादृणी । यदा सवृद्धिकं मूलं फलद्वारेण धनिनः प्रविष्टं तदा बन्धमाप्नुयादित्यर्थः । वृद्धिमात्रापाकरणार्थं तु बन्धकं सामकं दत्त्वाप्नुयादृणी । समं मूलं, समभेव सामकम् । अस्यापवादमाह—यदि प्रकर्षितं तत्स्यात् । तत् बन्धकं प्रकर्षितमतिशयितं वृ-

---

(१) मूल्यापाकरणा ख. । (२) मूल्यदानं ख. ।
(३) बन्धक. आधिः ख. । (४) मूल्यापा ख. ।

द्धेरप्यधिकफलं यदि स्यात्तदा न धनभाग्धनी सामकं नः लभते धनी । मू(१)लमदत्त्वैव ऋणी बन्धमवाप्नुयादिति यावत् । अथ त्वप्रकर्षितं तद्बन्धकं वृद्धयेऽप्यपर्याप्तं तदा सामकं दत्त्वापि बन्धं न लभेताधमर्णः । (२)वृद्धिशेषमपि दत्त्वैव लभेतेत्यर्थः । पुनरुभयत्रापवादमाह । परस्परमतं विना उत्तमर्णाधमर्णयोः परस्परानुमत्यभावे 'यदि प्रकर्षितम्' इत्याद्युक्तम् । परस्परानुमतौ तूत्कृष्टमपि बन्धकं यावन्मूलदानं तावदुपभुङ्क्ते धनी निकृष्टमपि मूलमात्रदानेनैवाधमर्णो लभत इति ॥ ६४ ॥

इति ऋणादानप्रकरणम् ।

(वी० मि०) निक्षेपं विवादपदमधिकृत्याह—

वासनस्थमनाख्याय हस्तेऽन्यस्य य(३)दर्प्यते ॥
द्रव्यं तदौपनिधिकं प्रतिदेयं तथैव तत् ॥ ६५ ॥
न दाप्योऽपहृतं तं तु राजदैविकतस्करैः ॥
भ्रेषश्चेन्मार्गिते दत्ते दाप्यो दण्डं च तत्समम् ॥ ६६ ॥
आजीवन् स्वेच्छया दण्डो दाप्यस्तं चापि सोदयम् ॥
याचितान्वाहितन्यासनिक्षेपादिष्वयं विधिः ॥ ६७ ॥

वासनं निक्षेप्यद्रव्याधारभूतसम्पुटादि तत्रस्थं यद्द्रव्यं संख्यादिकमनाख्याय अकथयित्वाऽन्यस्य हस्ते रक्षणार्थं विस्रम्भाद्दर्प्यते तदौपनिधिकं नाम निक्षेपविशेषः । निक्षेपसामान्यलक्षणं तु—

स्वं द्रव्यं यत्र विस्रंभान्निक्षिपत्यविशंकितः ।
निक्षेपो नाम तत्प्रोक्तं व्यवहारपदं बुधैः ॥

इति नारदोक्तमवसेयम् ।

कुलजे वृत्तसम्पन्ने धर्मज्ञे सत्यवादिनि ।

इत्यादि मनूक्तं विश्वासप्रपञ्चनमात्रं, तत्रौपनिधिकं द्रव्यं तथैवानाख्यायैव पूर्ववन्मुद्रादिचिन्हितं प्रतिदेयं स्थापकाय । तत्रोपनिधिं राज्ञा दैविकेनाग्निना तस्करेण चौरेण वाऽपहृतं स्थापकायोपनिधि-

---

(१) मूल्यमदत्त्वैव ख. । (२) वृद्धिशेषमदत्त्वैव ख. ।
(३) समर्पयेत्—इति क. पु. पाठः ।

गृहीता न दाप्यः । यदि तु निक्षेप्त्रा मार्गिते प्रार्थिते तथाप्यदत्ते तस्मिन् द्रव्ये राजदैविकादिकृतो भ्रेषो भ्रंशः स्यात्तदा तमुपनिधिं मूल्यद्वारा निक्षेप्त्रे तत्समं च दण्डं राज्ञे दाप्य एव स्थापकः। चकारेण निक्षे(१)प्तृसमुच्चयः । स्वेच्छया न तु निक्षेप्त्रनुमत्या तमुपानिधिमाजीवन् उपयुञ्जानो वृध्यादिलाभानुसारेण राज्ञा दण्डयस्तं चोपनिधिं सोदयं वृद्धिसहितं निक्षेप्त्रे दाप्यः । अत्र च वृद्धिमाह कात्यायनः—

निक्षेपं वृद्धिशेषं च क्रयं विक्रयमेव च ।
याच्यमानो न चेद्दद्याद्धर्धते पञ्चकं शतम् ॥

मनुः—

चौरैर्हृतं जले भग्नमग्निना दग्धमेव च ।
न दद्याद्यदि तस्मात्स न संहरति किञ्चन ॥

किंचित्संहृत्य गृहीत्वा शेषमन्यत्र निक्षिपत्युपेक्षते वा सर्वं मम न देयं भवत्विति तत्सर्वं देयमेवेत्यर्थः । व्यासः—

भक्षितं सोदयं दाप्यः समं दाप्य उपेक्षितम् ।
किञ्चिन्न्यूनं प्रदाप्यः स्याद्द्रव्यमज्ञाननाशितम् ॥

मनुः—

उपधाभिश्च यः काश्चित्परद्रव्यं हरेन्नरः ।
ससहायः स हन्तव्यः प्रकाशं विविधैर्वधैः ॥

वधस्ताडनादिः । याचितेति । अयमुपनिधावुक्तो विधिः प्रकारो राजदैविकादिस्थले, दानादानरूपो याचितादिषु बोध्यः । विवाहाद्युत्सवार्थं वस्त्रालङ्कारादिकं प्रतिदेयतयाङ्गीकृत्य याचित्वानीतं याचितं अन्वाहितं स्वामिना एकस्य हस्ते निहितं द्रव्यं तेनाप्यनु पश्चादन्यस्य हस्ते तस्याधातुर्वचनान्निहितन्यासो गृहस्वामिनेऽदर्शयित्वा तत्परोक्षमेव तदीयजनहस्ते प्रक्षेपो गृहस्वामिने समर्पणीयमिति शिल्पिनेऽलङ्कारादिघटनाय द्रव्यसमर्पणं च साक्षादाख्याय । समर्पणं निक्षेपः । आदिपदेन गौतमोक्ताऽवक्रीतादिसङ्ग्रहः । तथा च 'पुत्रानध्याभवेयु'रित्यधिकारे गौतमः—'निध्यन्वाधियाचितावक्रीताधयो नष्टाः सर्वाननिन्दितान् पुरुषापराधेने'ति । अवक्रीतं भाटकेनानीतम् । निक्षेप्तुः सत्त्वे निक्षेपद्रव्यं तस्यैव प्रत्यर्पयेदित्याह—

(१) निक्षेप—इति ख. पु 'पाठ' ।

स्थापितं येन विधिना येन यच्च यथाविधि ।
तथैव तस्य दातव्यं न देयं प्रत्यनन्तरे ॥

प्रत्यनन्तरः पुत्रादिः । मनुः—

स्वयमेव तु यो दद्यान्मृतस्य प्रत्यनन्तरे ।
न स राज्ञा नियोक्तव्यो न निक्षेप्तुश्च बन्धुभिः ॥

विशेषव्यवस्थायां तु जीवत्यपि निक्षेप्तरि प्रत्यनन्तरे दानं भवत्येवेत्युक्तप्रायं याचितकं प्रकृत्याह कात्यायनः—

प्राप्ते काले कृते कार्ये न दद्याद्याचितोऽपि सन् ।
तस्मिन्नष्टे हृते वापि गृहीत्वा मूल्यमाहरेत् ॥

नष्टे दैविकेनापि ॥ ६७ ॥

इति श्रीमत्० याज्ञवल्क्यव्याख्याने निक्षेपप्रकरणम् ।

(मिता०) उपनिधिं प्रत्याह—

वासनेति । निक्षेपद्रव्यस्याधारभूतं द्रव्यान्तरं वासनं करण्डादि तत्स्थं वासनस्थं यद्द्रव्यं रूपसंख्यादिविशेषमनाख्याय अकथयित्वा मुद्रितमन्यस्य हस्ते रक्षणार्थं विस्रम्भाद्दीयते स्थाप्यते तद्द्रव्यमौपनिधिकमुच्यते । यथाह नारदः-'असंख्यातमविज्ञातं समुद्रं यन्निधीयते । तज्ज्ञानीयादुपनिधिं निक्षेपं गणितं विदुः' ॥ इति । प्रतिदेयं तथैव तत् । यस्मिन्स्थापितं तेन यथैव पूर्वमुद्रादिचिह्नितमर्पितं तथैव स्थापकाय प्रतिदेयं प्रत्यर्पणीयम् ॥ ६५ ॥

(मिता०) प्रतिदेयमित्यस्यापवादमाह—

नेति । तमुपनिधिं राज्ञा दैवेनोदकादिना तस्करैर्वापहृतं नष्टं न दाप्योऽसौ यस्मिन्नुपहितम् । धनिन एव तद्द्रव्यं नष्टं यदि जिह्मकारितं न भवति । यथाह नारदः-'ग्रहीतुः सह योऽर्थेन नष्टो नष्टः सदायिनः । दैवराजकृते (१)तद्वन्न चेत्तज्जिह्मकारितम्' ॥ इति ॥

(मिता०) अस्यापवादमाह—

भ्रेष इति । स्वामिना मार्गिते याचिते यदि न ददाति तदा तदुत्तरकालं यद्यपि राजादिभिर्भ्रेषो नाशः सञ्जातस्तथापि तद्द्रव्यं मूल्यकल्पनया धनिने ग्रहीता दाप्यो राज्ञे च तत्समं दण्डम् ॥ ६६ ॥

---

(१) तद्वद्भवेत्तज्जिह्मे ख. तद्वद्भवेदजिह्मेत्यपि पाठः ।

(मिता०) भोक्तारं प्रति दण्डमाह—

आजीवन्निति। यः स्वेच्छया स्वाम्यननुज्ञयोपनिहितं द्रव्यमाजीव(१)न्नुपभुङ्क्ते व्यवहरति वा प्रयोगादिना लाभार्थमसावुपभोगानुसारेण लाभानुसारेण च दण्ड्यस्तं चोपनिधिं सोदयमुपभोगं सवृद्धिकं व्यवहारे सलाभं धनिने दाप्यः। वृद्धिप्रमाणं च कात्यायनेनोक्तम्-'निक्षेपं वृद्धिशेषं च क्रयं विक्रयमेव च। याच्य(२)मानो न चेद्दद्याद्धर्मते पञ्चकं शतम्' ॥ इति। एतच्च भक्षिते द्रष्टव्यम्। उपेक्षाज्ञाननष्टे तु तेनैव विशेषो दर्शितः-'भक्षितं सोदयं दाप्यः समं दाप्य उपेक्षितम्। किंचिन्न्यूनं प्रदाप्यः स्याद्द्रव्यमज्ञाननाशितम्' ॥ इति। किञ्चिन्न्यूनमिति चतुर्थांशहीनम् ॥

(मिता०) उपनिधेर्धर्मान् याचितादिष्वतिदिशति—

याचितेति। विवाहाद्युत्सवेषु वस्त्रालंकारादि याचित्वानीतं याचितम्। यदेकस्य हस्ते निहितं द्रव्यं तेनाप्यनु पश्चादन्यहस्ते स्वामिने देहीति निहितं तदन्वाहितम्। न्यासो नाम गृहस्वामिनेऽदर्शयित्वा तत्परोक्षमेव गृहजनहस्ते प्रक्षेपो गृहस्वामिने समर्पणीयमिति। समक्षं तु समर्पणं निक्षेपः। आदिशब्देन सुवर्णकारादिहस्ते कटकादिनिर्माणाय न्यस्तस्य सुवर्णादेः, प्रतिन्यासस्य च परस्पर-प्रयो(३)जनापेक्षया त्वयेदं मदीयं रक्षणीयं मयेदं त्वदीयं रक्ष्यते इति न्यस्तस्य ग्रहणम्। यथाह नारदः-'एष एव विधिर्दृष्टो याचितान्वाहितादिषु। शिल्पिषूपनिधौ न्यासे प्रतिन्यासे तथैव च' ॥ इति। एतेषु याचितान्वाहितादिष्वयं विधिः। उपनिधेर्यः प्रतिदानादिविधिः स एव वेदितव्यः ॥ ६७ ॥

इति उपनिधिप्रकरणम्।

---

(१) आजीवत्युप ख. आजीवन्फलं भुंक्ते ग.।

(२) याच्यमान ग.। (३) पेक्षायां त्वयेदं ख।

(वी० मि०) 'प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्तित'-मित्युक्तम् । अत्र भुक्तिर्निरूपिता, सम्प्रति साक्षिणोऽधिकृत्याह सम्पूर्णप्रकरणेन—

तपस्विनो दानशीलाः कुलीनाः सत्यवादिनः ॥
धर्मप्रधाना ऋजवः पुत्रवन्तो धनान्विताः ॥ ६८ ॥
त्र्यवराः साक्षिणो ज्ञेयाः श्रौतस्मार्तक्रियापराः ॥
यथाजाति यथावर्णं सर्वे सर्वेषु वा स्मृताः ॥ ६९ ॥
स्त्रीबालवृद्धकितवमत्तोन्मत्ताभिशस्तकाः ॥
रङ्गावतारिपाखण्डिकूटकृद्विकलेन्द्रियाः ॥ ७० ॥
पतितार्त्तार्थसम्बन्धिसहायरिपुतस्कराः ॥
साहसी दृष्टदोषश्च निर्भूताद्यास्त्वसाक्षिणः ॥ ७१ ॥
उभयानुमतः साक्षी भवत्येकोऽपि धर्मवित् ॥
सर्वः सङ्ग्रहणे साक्षी चौर्यपारुष्यसाहसे ॥ ७२ ॥

तपस्विनः तपश्चरणशीलाः, दानशीलाः दाननिरताः, कुलीनाः साङ्कर्यादिदोषशून्यकुलोत्पन्नाः, सत्यवादिनः सत्यवचनशीलाः, धर्मप्रधाना मुख्योद्देश्यधर्मकाः, ऋजवोऽकुटिलचित्ताः, त्रयोऽधमः कल्पो येषां ते त्र्यवराः—

नव सप्त पञ्च वा स्युश्चत्वारस्त्रय एव च ।

इति बृहस्पतिवचनात् । श्रौती अग्निहोत्रादिः, स्मार्ती सन्ध्योपासनादिः क्रिया, नित्यकर्तव्यतत्पराः प्रत्यहं तदनुष्ठातारः, यथाजाति जात्यनुसारेण, तेन मूर्द्धावसिक्तानां मूर्द्धावसिक्ता, अम्बष्ठानामम्बष्ठाः साक्षिणः स्त्रीणां स्त्रिय इत्यादि पर्यवस्यति । यथावर्णं ब्राह्मणस्य ब्राह्मणाः साक्षिण इत्यादि । स्वजातिस्ववर्णयोरभावे तु सर्वेषु वादिषु सर्वे मूर्द्धाभिषिक्तादयो ब्राह्मणादयश्च साक्षिणः स्मृता मन्वादिस्मृतावभिहिता एते साक्षिणः प्रशस्ता ज्ञेयाः । स्त्र्यादयस्त्वसाक्षिणः । बालः षोडशवर्षाभ्यन्तरवयस्कः, वृद्धोऽशीत्यूर्ध्ववयस्कः, कितवोऽक्षदेवनशीलः, मत्तो मद्यादिना, उन्मत्तः उन्मादवान्, अभिशस्तो ब्रह्महत्याद्यभिशापवान्, रङ्गावतरी नटः, पाखण्डी वेदबाह्यः,

कूटकृत् कपटप्रायव्यवहारशीलः, विकलेन्द्रियः चक्षुःश्रोत्रादिहीनः, पतितो ब्रह्महादिः, आप्तः सुहृत्, अर्थसम्बन्धी वादिकथ-सम्बन्धी, सहायो वादिसाहाय्यकर्ता, रिपुर्वादिशत्रुः, तस्क-रः चौरः, साहसी प्रसह्य मारणादिकारी, दृष्टदोषो वादान्तरे-ऽसत्याभिधायी, निर्धूतः कुलबहिष्कृतः, आद्यपदेन श्रोत्रियप्र-व्रजितादयः । उभयत्रा इत्युक्तमपवदति उभयानुमत इति । उभाभ्यां वादिप्रतिवादिभ्यां साक्षित्वेनाऽनुमतः सन् । धर्मविदिति सकलसाक्षिगुणोपलक्षकम् । ईदृश एकोपि साक्षी भवति । स्त्रीबाले-त्याद्युक्तमपवदति-सङ्ग्रहणे स्त्रीसङ्ग्रहणे, चौर्ये, पारुष्ये वाक्पारुष्ये, साहसे मनुष्यमारणादौ सर्वः स्त्र्यादिरपि यथोक्तसाक्षिकगुणशून्य श्च साक्षी भवतीत्यर्थः । चकारेण 'ज्ञेया' इत्यत्रान्वितेन मन्वाद्युक्तगु-णान्तरवतां समुच्चयः । तुशब्देन स्त्र्यादिभिन्नानां तपस्वीत्यादियथा-गुणशून्यानामसाक्षित्वं व्यवच्छिनत्ति । अपिशब्देन 'उभौ तु श्रोत्रि-यौ ग्राह्या'विति बृहस्पतिवचनोक्तसमुच्चयः । अत्र वाशब्दसमुच्चि-ता आद्यशब्दसङ्ग्रहीताश्च साक्षिणः सिद्धवद्विशिष्य लिख्यन्ते । तत्र ग्रहिणप्रयेणन (?)सर्ववर्णहितकर्तारः सर्वधर्मविदो लोभा(१)नाकर्षणी-या बाह्याभ्यन्तरशौचशालिनः वाजपेयादियाजिनोऽधीयानाः एते संहितोक्ताश्च साक्षिणो निगादकोपन्यस्ताः प्रशस्ताः । तत्र बृहस्पतिः—

लिखितो लेखितो गूढः स्मारितः कुल्यदूतकौ ।
यादृच्छिकश्चोत्तरश्च कार्यमध्यगतः परः ॥
नृपोऽध्यक्षस्तथा ग्रामः साक्षी द्वादशधा स्मृतः ।
प्रभेदमेषां वक्ष्यामि यथावदनुपूर्वशः ॥
स्वजातिर्लिखिता येन येन स्वं पितृनाम च ।
निवासश्च स विज्ञेयः साक्षी लिखितसंज्ञकः ॥
अर्थिना च क्रियाभेदैस्तस्य कृत्वा ऋणादिकम् ।
प्रत्यक्षं लिख्यते यस्तु लेखितः स उदाहृतः ॥
कुड्य(२)व्यवहितो यश्च श्राव्यते ऋणभाषितम् ।
विनिन्हुते यथाभूतं गूढसाक्षी स कीर्तितः ॥

---

(१) लोभानुकर्ष० इति ख० पु० पाठ ।
(२) कुड-इति क० पुस्तके, कुण्ड-इति तु ख० पुस्तके पाठः ।

आहूय यः(१) कृतः साक्षी ऋणन्यासक्रियादिके ।
स्मार्यतेऽर्थं मुहुर्यश्च स्मारितः सोऽभिधीयते ॥
विभागदाने विपणे ज्ञातिर्यश्चोपदिश्यते ।
द्वयोः समानो धर्मज्ञः कुल्यः स परिकीर्तितः ॥
अर्थिप्रत्यर्थिवचनं शृणुयात्प्रेषितस्तु यः ।
उभयोः सम्मतः साधुर्दूतकः स उदाहृतः ॥
क्रियामाणे च कर्तव्ये यः कश्चित्स्वयमागतः ।
अत्र साक्षित्वमस्माकमुक्ते याद्दच्छिकस्तु सः (२) ॥
यः साक्षी तु दिशं गच्छन् मुमूर्षुर्वा यथाक्रमम् ।
अन्यं संश्रावयेत्तं तु विद्यादुत्तरसाक्षिणम् ॥
साक्षिणामपि यः साक्ष्यमुपर्युपरि भाषते ।
श्रवणाच्छ्रावणाद्वापि स साक्ष्युत्तरसंज्ञितः ॥
उभाभ्यां यस्य विश्वस्तं कार्यं वा विनिवेदितम् ।
गूढचारी स विज्ञेयः कार्यमध्यगतस्तथा ॥
अर्थिप्रत्यर्थिनोर्वाक्यं यच्छ्रुतं भूभृता स्वयम् ।
स एव तत्र साक्षी स्याद्विसंवादे द्वयोरपि ॥
निर्णीते व्यवहारे तु पुनर्न्यायो यदा भवेत् ।
अध्यक्षः सभ्यसहितः साक्षी स्यात्तत्र नान्यथा ॥
दूषितं घातितं यत्तु सीमायां तु समन्ततः ।
अकृतोऽपि भवेत्साक्षी ग्रामस्तत्र न संशयः ॥

लिखितलेखितयोर्भेदमविज्ञाय नारदे त्वेकादशविधः साक्षी कथितः । अथ साक्ष्यानर्हाः-श्रोत्रियः, तापसः, प्रव्रजितः, कोपितः, व्याधः, दासः, वैदिके कर्मणि अश्रद्धः, तैलिकः, प्रमादी, ग्रामयाजकः, एकपाकभोक्ता, चरः, सपिण्डः, सकुल्यो, महापथयायी, समुद्रयायी, वणिक्, व्यङ्गयः, आचारहीनः, क्लीबः, नृत्यकर्ता, नृत्येऽभिनेता, वात्यः, दारत्यागी, अग्नित्यागी, अयाज्ययाजकः, विषजीवी, आहितुण्डिकः, गरदोऽग्निदः, हालिकः, शूद्रः, अपात्रभूतः, उपपातकी, अतिखिन्नः, वेदविरुद्धकर्मकरणशीलः, स्वकर्मत्यागी, अकृतसमावर्तनो द्विजः, जडः, तिलविक्रयी, विप्रलम्भकारी, भूताविष्टो,

(१) सः-इति क० ख० पुस्तकयोः पाठः ।
(२) यः-इत्युभयसंमतः पाठ ।

नृपद्विष्टः, नक्षत्रसूचकः, पराभिशापप्रदायी, हीनाङ्गो, भग्नवृत्तिः, कुनखी, श्यावदन्तः श्वित्री, मित्रद्रोही, धूर्तः, शौण्डिक, ऐन्द्रजालिकः, लुब्धः, उग्रकर्मा, श्रेणिगणविरोधी, चित्रकरः, वृषभनाटनेन भिक्षाटनशीलः, मिथ्याधर्माचारकल्पकः, त्यक्तप्रव्रज्यः, राजपुरुषः, मनुष्यपशुमांसास्थिमधुक्षीराम्बुसर्पिषां वेदस्य विक्रेता, वृद्धिजीवी, परिच्छेदकरणाय कार्येषु नियुक्तः, खलो, हीनसेवकः, पित्रा सह विवदमानः, परस्परभेदकारी चेति । तत्र नारदः—

असाक्ष्यपि हि शास्त्रेषु दृष्टः पञ्चविधो बुधैः ।
वचनाद्दोषतो भेदात्स्वयमुक्तिर्मृतान्तरः ॥
श्रोत्रियाद्या वचनतः स्तेनाद्या दोषदर्शनात् ।
भेदाद्विप्रतिपत्तिः स्याद्विवादे यत्र साक्षिणाम् ॥
राज्ञा परिगृहीतेषु साक्षिष्वेकार्थनिर्णये ।
वचनं यत्र भिद्येत ते स्युर्भेदादसाक्षिणः ॥
स्वयमुक्तिर्न निर्दिष्टः स्वयमेवैत्य यो वदेत् ।
मृतान्तरोऽर्थिनि प्रेते मुमूर्षुश्राविताहते ॥

श्रोत्रियादीनां वेदाध्ययनाद्यासक्तत्वेन विवादपदविस्मरणशीलतया न ते साक्षिणः कार्याः । अकृतास्तु ते जानन्तो भवन्त्येव साक्षिणः । तदुक्तम्-'उभौ तु श्रोत्रियौ ग्राह्या'विति । श्रोत्रियाद्यान् व्याकरोति ।

श्रोत्रियास्तापसा वृद्धा येन प्रव्राजिता नराः ।
असाक्षिणस्ते वचनान्नात्र हेतुरुदाहृतः ॥

मुमूर्ष्विति । मुमूर्षुणा धनिकेन यः साक्षी स्वदायादेभ्यो यमियद्धेनं सत्यं धारयत्ययं तु जानातीति श्रावितः स मृतान्तरोऽपि साक्षी भवत्येव । अर्थिनि मृते तत्पुत्रादिना अज्ञातत्वादनुपन्यस्तेऽर्थे कासौ साक्षी स्यादिति मृतन्तरोऽसाक्षी । अत्र प्रशस्तसाक्ष्यलाभेऽप्रशस्तो निषिद्धः साक्ष्युपादेयः । कण्ठतो निषिद्धस्तु सर्वथा नोपादेय इति विवक्तव्यमित्युक्तप्रायम् ॥ ७२ ॥

(मिता०) 'प्रमाणं लिखितं भुक्तिः साक्षिणश्चेति कीर्तितम्' इत्युक्तं तत्र भुक्तिर्निरूपिता । सांप्रतं साक्षिस्वरूपं निरूप्यते । साक्षी च साक्षाद्दर्शनाच्छ्रवणाच्च भवति । यथाह मनुः (८।८४)-'समक्षदर्शनात्साक्ष्यं श्रवणाच्चैव सिद्ध्यति' इति । स च द्विविधः कृतो-

हरिदाससंस्कृतग्रन्थमालासमाख्य—

काशीसंस्कृतसीरीज़—पुस्तकमाला ।

इयं काशी—संस्कृतग्रन्थमाला विभागशः प्रकाशिता भवति । एतस्यां प्राचीनाः नवीनाश्च दुर्लभाः सुलभाश्च अत्युपयुक्ताः संस्कृतग्रन्थाः काशिकराजकीयसंस्कृतपाठशालीयैः पण्डितैरन्यैरपि विद्वद्भिः संशोधिताः क्रमेण संमुद्रिता भवन्ति । अस्यां प्रकाश्यमाणानां ग्रन्थानां मूल्यं सूचीपत्रे प्रकाशितं वर्तते । परंतु एतस्या नियमेनाऽविच्छिन्नतया निश्चितग्राहकमहाशयानां प्रतिमुद्राशतकं पञ्चविंशतिमुद्राः (कमिशन) परावर्तिता भवेयुः मार्गव्ययश्च न पृथक् दातव्यो भवेत् ।

तत्र मुद्रितग्रन्थनामानि ।	मूल्यम् ।
१ नलपाकः नलविरचितः । संपूर्णः (पाकशास्त्रम् १)	रु० १—८
२ संक्षेपशारीरकम् । रामतीर्थस्वामिकृतान्वयार्थबोधिनीटीकासहितम् । (वेदान्तं १)	रु० ८—०
३ वैशेषिकदर्शनम् । पं० श्रीदुण्ढिराजशास्त्रिकृतविवरणोपेताभ्यां प्रशस्तपादभाष्योपस्काराभ्यां समन्वितम् (वैशेषिकं १)	रु०२—८
४ श्रीसूक्तम् । विद्यारण्यपृथ्वीधरश्रीकण्ठाचार्यकृतभाष्यत्रयेण टिप्पण्या च समलङ्कृतम् । (वैदिकं १)	रु० ०—६
५ लघुशब्देन्दुशेखरः (भैरवी) चन्द्रकलाटीकासहितः तत्पुरुषादिसमाप्तिपर्यन्तः । (व्याकरणं १)	रु० ८—०
६ कारिकावली मुक्ता० दिन० राम० शब्दखण्डसहिता तथा "गुणनिरूपणदिनकरीय" महामहोपाध्याय पं० श्रीलक्ष्मणशास्त्रिकृतव्याख्यासहिता । (न्यायं १)	रु० ६—०
७ पञ्चकिरणम् । वार्तिकाभरणालङ्कृतवार्तिकटीकया-तत्त्वचन्द्रिकासमवेतविवरणेन च समन्वितम् । (वेदान्तं २)	रु० ०—८
८ अलङ्कारप्रदीपः । पण्डितवरविश्वेश्वरपाण्डेयनिर्मितः । (काव्यं १)	रु० ०—८
९ अनङ्गरङ्गः महाकविकल्याणमल्लविरचितः । (कामशास्त्रं १)	रु० ०—१२
१० जातकपारिजातः । श्रीवैद्यनाथशर्मणा विरचितः । (ज्यो० १)	रु० २—०
११ पारस्करगृह्यसूत्रम् । कात्यायनसूत्रीयश्राद्ध-शौच-स्नान-भोजन-कल्पसहितम् । (कर्मकाण्डम् १)	रु० ०—८
१२ पुरुषसूक्तम् । सायणभाष्य-महीधरभाष्य-मंगलभाष्य-निम्बार्कमतभाष्यचतुष्टयसहितम् । (वैदिकं २)	रु० १—४
१३ श्रीमत्सनत्सुजातीयम्—श्रीमच्छङ्करभगवत्पादविरचितभाष्येण नीलकण्ठीव्याख्यया च संवलितम् । (वेदान्तं ३)	रु० १—४
१४ कुमारसंभवं महाकाव्यम् । महाकवि-श्रीकालिदासवि० । सञ्जीवनी-शिशुहितैषिणी-टीकाद्वयोपेतम् सम्पूर्णम् । (काव्यं २)	रु० १—८

१५ श्रुतबोधश्छन्दोग्रन्थः । आनन्दवर्द्धिनीतात्पर्यप्रकाशाख्यसंस्कृत-
भाषाटीकासहितः । (छंदः १) रु० ०—६
१६ कारिकावली । मुक्तावली-न्यायचन्द्रिकाटीकाद्वयसहिता सटि-
प्पणा । (न्यायं २) रु० १—०
१७ पारस्करगृह्यसूत्रम् । काण्डद्वये हरिहर-गदाधर० तृतीयकाण्डे ह-
रिहर-जयराम-प्रणीतभाष्येण समलङ्कृतम् । हरिहरभाष्यस-
हितस्नानत्रिकण्डिकासूत्र—गदाधरभाष्यसहितश्राद्धनवक-
ण्डिकासूत्रैः यमलजननशान्ति-पृष्टोदिवि-शौच-भोजन—
कामदेवकृतभाष्यसहितोत्सर्गपरिशिष्टसूत्रैः परिष्कृतं-टिप्प-
ण्यादिभिः सहितं च । (कर्मकाण्डं २) रु० ३—०
१८ संक्षेपशारीरकम्-मधूसूदनीटीकासहितम् संपूर्णं (वेदान्तं४) रु० ८—०
१९ लघुजूटिका-अर्थात् अभिनवा परिभाषेन्दुशेखरपरिष्कृतिनि-
र्मितिः । (व्याकरणं २) रु० ०—८
२० कातीयेष्टिदीपकः । (दर्शपौर्णमासपद्धतिः) महामहोपाध्याय-
पं० श्रीनित्यानन्दपन्तपर्वतीयविरचितः । (कर्मकाण्डं) रु० १—०
२१ सप्तपाठि-श्रीशिवमहिम्नस्तोत्रम् श्रीगन्धर्वराज पुष्पदन्ताचार्य-
विरचितम् । हरिहरपक्षीय-मधुसूदनीटीकया (संस्कृतटी-
का-संस्कृतपद्यानुवाद-भाषाटीका-भाषापद्यानुवाद-भाषा-
बिम्ब) पञ्चमुखीनाम्न्या टीकया-शक्तिमहिम्नस्तोत्रेण च
समन्वितम् । (स्तोत्रवि० १) रु० १—०
२२ बौद्धाऽऽचार्यश्रीधर्मकीर्तिप्रणीतः सटीकन्यायबिन्दुः—भाषा-
टीकासहितः (बौद्धन्याय वि० १) रु० १—८
२३ सपरिष्कृत-दर्पणसहितवैयाकरणभूषणसारः (व्याकरणं ३) रु० ४—०
२४ न्यायवार्त्तिकतात्पर्य्यटीका-श्रीवाचस्पतिमिश्रविरचिता । सम्पूर्ण
(न्यायविभाग ३) रु० ६—०
२५ मीमांसान्यायप्रकाशः (आपदेवीयः) श्रीचिन्नस्वामिशास्त्रिकृतया
सारविवेचिन्या व्याख्यया सहितः (मीमांसा १) रु० २—०
२६ पौरोहित्यकर्मसारः (टिप्पणीसमलंकृतः) प्रथमो भागः श्रीरमा-
कान्तशर्मणा संगृहीतः । (कर्मकाण्डवि० ३) रु० ०—४
२७ लघुशब्देन्दुशेखरः म० म० श्रीनागेशभट्टविरचितः । अव्ययी-
भावान्तो भागः, म०म० पण्डित श्रीनित्यानन्दपन्त-पर्वतीय-
कृतशेखरदीपकाख्येन टिप्पणेन समुज्ज्वलितः । (व्या०४) रु० ५—८
२८ रघुवंशमहाकाव्यम् । महाकविश्रीकालिदासविरचितम् पञ्चसर्गा-
त्मकम् । म० म० श्रीमल्लिनाथसूरिकृतसञ्जीविनीटीकया
पं० श्रीकनकलालठक्कुरकृताऽर्थप्रकाशिकाटीकया च सम-
लङ्कृतम् । (काव्यवि० ३) रु० ०—१२

२९ कामसूत्रम् । श्रीवात्स्यायनमुनिप्रणीतं बहुयत्नैरासादितया पूर्णया जयमङ्गलरचितया टीकया समेतम् । बहुखण्डितपाठान् परिपूर्य,सूत्राङ्कांश्च संयोज्य, परिष्कृत्य संशोधितम् । (काम०२) रु० ८—०

३० न्यायकुसुमाञ्जलिः । न्यायाचार्यपदाङ्कितश्रीमदुदयनाचार्यविरचितः । महामहोपाध्यायरुचिदत्तकृतमकरन्दोद्भासितमहामहोपाध्यायवर्द्धमानोपाध्यायप्रणीतप्रकाशसहितः। (न्यायं४) रु० ६—०

३१ परिभाषेन्दुशेखरः । म० म० श्रीनागेशभट्टरचितः । म० म० भैरवमिश्रविरचितया भैरवीत्यपराख्यया परिभाषाविवृत्या-तत्त्वप्रकाशिकया टीकया च सहितः । (व्याकरणं ४) रु० ३—०

३२ अर्थसंग्रहः । पूर्वमीमांसासारसंग्रहरूपः । श्रीलौगाक्षिभास्करविरचितः। श्रीमत्परमहंसपरिव्राजकाचार्यश्रीरामेश्वरशिवयोगिभिक्षविरचितमीमांसार्थकौमुद्याख्यव्याख्यासहितः।(मीमां०२) रु०१—०

३३ न्यायवार्त्तिकम् न्यायदर्शनवात्स्यायनभाष्योपबृंहणम् । परमर्षिभारद्वाजोद्द्योतकरविरचितम् । महर्षि-गोतमादिचरितसम्वलितबृहत्भूमिकासहितम् । (न्यायं ५) रु० ६—०

३४ शुक्लयजुर्वेदसंहिता । वाजसनेयिमाध्यन्दिनशाखीया । श्रीमदुव्वटाचार्यविरचितमन्त्रभाष्येण श्रीमन्महीधराचार्यविरचितवेददीपेन च सहिता । (भाग १-२-३-४)(वैदिकं ३) रु० ८—०

३५ शुक्लयजुर्वेदकाण्वसंहिता । श्रीसायणाचार्यविरचितभाष्यसहिता । १ अध्यायादारभ्य २० अध्यायपर्यन्ता । (वैदिकं ४) रु० ६—०

३६ सिद्धान्तलेशसंग्रहः । श्रीमदप्पयदीक्षितविरचितः । श्रीमत्परमहंसपरिव्राजकाचार्यकृष्णानन्दतीर्थविरचितया कृष्णालङ्काराख्यया व्याख्यया समलंकृतः । (वेदान्तं ४) रु० ६—०

३७ काशिका । श्रीपाणिनिमुनिविरचितव्याकरणसूत्राणां वृत्तिः विद्वद्वर-वामन-जयादित्यविनिर्मिता । (व्याकरणं ५) रु० ६—०

३८ प्राकृतप्रकाशः । भामहकृतः । श्रीमद्वररुचिप्रणीतप्राकृतसूत्रसहितः । टिप्पण्या च संयोजितः । (व्याकरणं ६) रु० १—४

३९ जीवन्मुक्तिविवेकः श्रीमद्विद्यारण्यस्वामिविरचितः । भाषानुवादसमेतः । (वेदान्तं ५) रु० २—०

४० श्रीनारदीयसंहिता । ब्रह्मणोपदिष्टो नारदमहामुनिप्रोक्तो ज्यौतिषग्रन्थः । (ज्योतिषं २) रु० ०—६

४१ मेदिनीकोशः-मेदिनीकारविरचितः । (कोशं १) रु० १—८

४२ मीमांसादर्शनम् । श्रीशबरस्वामिविरचितभाष्यसहितम् (भाग१—२) (मीमांसा ३) रु० १०—०

४३ न्यायदर्शनम् । श्रीगोतममुनिप्रणीतम् । श्रीवात्स्यायनमुनिप्रणीतभाष्यसहितम् । श्रीविश्वनाथन्यायपञ्चाननभट्टाचार्यविरचितन्यायसूत्रवृत्त्यनुगतम् । टिप्पण्यादिसहितम् (न्यायं ६) रु० ३—०

४४ दानमयूखः। विद्वद्धुरश्रीनीलकण्ठभट्टविरचितः। (धर्मशास्त्रं १) रु०
४५ कालमाधवः। विद्वद्धुरश्रीमाधवाचार्यविरचितः। (धर्मशास्त्रं २) रु
४६ भास्वती। श्रीमच्छुतानन्दविरचिता । श्रीमातृप्रसाद (दैवज्ञ पण) पाण्डेयेन कृताभ्यां छात्रबोधिनीनाम संस्कृतसोदाहर भाषाटीकाभ्यां सहिता। (ज्योतिषं ३) रु०
४७ फक्किकाप्रकाशः। उपाध्यायोपाह्वव्याकरणकेसरीविरुदाङ्कितमैथि लेन्द्रदत्तशर्मविरचितः । पं० सीतारामशर्मकृतटिप्पण्य विभूषितः। (व्याकरणं ७) रु०
४८ मिताक्षरा। श्रीगौडपादाचार्यकृतमाण्डूक्यकारिकाव्याख्या--श्रीम त्परमहंसपरिव्राजकाचार्यस्वयम्प्रकाशानन्दसरस्वतीस्वामि कृता। शंकरानन्दकृतमाण्डूक्योपनिषद्दीपिका च। (वेदा०६) रु
४९ काव्यप्रकाशः। श्रीमम्मटाचार्यविरचितः। पं० श्रीहरिशङ्करशर्म मैथिलेन संगृहीतया नागेश्वरीटीकयाऽलङ्कृतः। (काव्य०४) रु
५० अधिकरणकौमुदी । श्रीदेवनाथठक्कुरकृता। (मीमां० ४) रु
५१ रघुवंशमहाकाव्यम्। महाकविश्रीकालिदासविरचितम् महाप पाध्याय श्रीमल्लिनाथकृतसंजीवनीटीकयोपेतम् पं० श्रीव लालठक्कुरेण विरचितया भाववोधनीटिप्पण्या ङ्कृतम् सपूर्णम्। (काव्य ५
५२ काथवाधः। साजनीकृत टीकोपेतः। दत्तात्रेय सम्प्रदायाऽनुग
५३ रसचन्द्रिका । पर्वतीय-पण्डितप्रवर-श्रीविश्वेश्वर निर्मिता (काव्य०

पत्रादिप्रेषणस्थानम्
२२—१—२७

जयकृष्णदास—हरिदास
चौखम्बा संस्कृत सीरीज़
विद्याविलास प्रेस, गोपालमंदिर
बनारस सिटी